# सारस्वती सुषमा

## वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[ त्रैमासिकी ]

२३ वर्षे ४ अङ्कः

वै० संवत् २०२५

प्रकाशनतिथिः

फाल्गुनपूर्णिमा, वै० सं० २०२५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# सारस्वती सुषमा

## वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[ त्रैमासिकी ]

प्रधानसम्पादकः

**श्रीबदरीनाथशुक्लः**

सहायकसम्पादकः

**उमाशङ्करत्रिपाठी**

२३ वर्षे ४ अङ्कः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# विषयानुक्रमणिका


१. प्रतिभा वाक्यार्थः—श्रीरामप्रसादत्रिपाठी, प्राचीनव्याकरणदर्शनागमविभागाध्यक्षः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी । २६६-३१२

२. सत्तात्रैविध्यम्—डा० पो० सुब्रह्मण्यशास्त्री, नागपुरविश्वविद्यालयः (म०प्र) ३१३-३१६

३. रसानाथर्वणादपि—डा० रमाशङ्करजैतली, संस्कृतविभागः, राजस्थान-विश्वविद्यालयः, जयपुरम् । ३१७-३२७

४. पुराणलक्षणसमीक्षा—श्रीश्रीकृष्णमणित्रिपाठी, व्याख्याता, पुराणेतिहास-विभागः; वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी । ३२८-३३८

५. विपन्नाशेषयोगि बौद्धदर्शनम्—श्रीवंशीधरत्रिपाठी, प्रधानाचार्यः श्री स्वा० ब्र० आदर्शसंस्कृतमहाविद्यालयः, नया बाजार, बस्ती । ३३६-३४२

६. आचार्यमम्मटकृतकाव्यलक्षणवैशिष्ट्यम्—श्रीसुदर्शनमिश्रः, एम० ए०, अनुसन्धाता, काशी हिन्दू-विश्वविद्यालयः, वाराणसी । ३४३-३४८

७. ललितविस्तरस्य पाठसमीक्षणापेक्षा—प्रो० डा० शान्तिभिक्षुशास्त्री, संस्कृत-विभागाध्यक्षः, विद्यालङ्कारविश्वविद्यालयः, लङ्का । ३४६-३५४

८. विश्वतत्त्वप्रकाशकः स्याद्वादः—श्रीदयाचन्द्रः, साहित्याचार्यः, श्रीगणेश-दिगम्बरजैनसंस्कृतमहाविद्यालयः, सागरः । ३५५-३६६

६. कारकस्वरूपम्—श्रीश्रीकान्तपाण्डेयः, अनुसन्धाता, वाराणसेयसंस्कृत विश्वविद्यालयः । ३७०-३७७

१०. कर्मठः (इतिहासात्मिका तुलनात्मिका गुणदोषनिरूपणात्मिका च समीक्षा)—डा० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री', अनुसन्धान-संस्थानसदस्यः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी । ३७८-३८४

११. सम्पादकीयम्—श्रीबदरीनाथशुक्लस्य ३८५-३८८


—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# सारस्वती सुषमा

## वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

२३ वर्षः } फाल्गुनपूर्णिमा, संवत् २०२५ { ४ अङ्कः

# प्रतिभा वाक्यार्थः

श्रीरामप्रसादत्रिपाठी, प्राचीनव्याकरणदर्शनागमविभागाध्यक्षः,
वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी ।

विषयमिममधिकृत्य लिख्यमाने निबन्धेऽधस्तना अंशा विवेचनीया भविष्यन्ति—१. प्रतिभापदार्थः, २. प्रतिभाभेदाः, ३. प्रतिभाहेतुफले, ४. वाक्यस्य लक्षणम्, ५. वाक्यस्य भेदाः, ६. अर्थपदार्थः, ७. वाक्यस्य तदर्थस्य च विषये पुनरपि भेदत्रयम्, ७. (क) बाह्यं ध्वनिरूपं वाक्यं बाह्यसत्तादिरर्थः, ७. (ख) आन्तरं स्फोटरूपं वाक्यमान्तरो घटसत्तादिरर्थः, किन्तु बाह्यार्थेन तादात्म्याध्यासमापन्नः, ७. (ग) आन्तरं स्फोटात्मकं वाक्यमान्तर एव वाक्यार्थः प्रतिभामात्रविषयः; ८. दृष्टिसृष्टेरुपक्रमः, ९. तत्स्वरूपम्, १०. विज्ञानवादादत्र विशेषः, ११. दृष्टिसृष्टिवादे प्रमाणानि, १२. उपसंहारः ।

## १. प्रतिभापदार्थः

अत्र निबन्धे प्रतिभेति[1] विधेयदलम्, वाक्यार्थ इति तूद्देश्यदलम् । तत्र प्रथमं तावत् प्रतिभापदार्थ एव विमृश्यते, अपूर्वं जिज्ञास्यत्वेन प्रधानत्वात् । तत्र प्रतिभात्यर्थोऽनया सा प्रतिभेति व्युत्पत्तौ प्रतिपूर्वकाद् भाधातोः करणेऽङ् प्रत्ययः 'आतश्चोपसर्गे' इति सूत्रेण । एवं चान्तःकरणस्य बुद्ध्यभिधाना निश्चयात्मिका वृत्तिरेव[1] प्रतिभेति प्रतिभाति । उक्तं च श्रीभर्तृहरिणा—

---

१. मनोबुद्धिरहंकारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥ वे० प०...

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ॥इति[१] ।

अत्र–"देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थमतिव्यतिरिक्तैव जायते, तां च वाक्यार्थं वैयाकरणा आहुः ।" इति [२]टीकाकृदुक्त्या पदार्थमतिभिन्ना या वाक्यार्थमतिः सा प्रतिभेति स्फुटमायाति ।

इयं च स्वसंवेदनसिद्धैव, इदं तदिति रूपेण प्रतिपन्नाऽपि निरूपयितुं न शक्या[३] ।

नियतसाधनाऽवच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा प्रतिभा, इति कमलशीलाचार्याः[४] ।

प्रतिभा संस्कारविशेष इति मम्मटाचार्याः[५] ।

समस्तलोकस्य नेत्रभूतः सकलेतिकर्तव्यतासम्पादकः प्रतिनियतसंस्कारजन्यः शक्तिविशेषः प्रतिभा, इति मण्डनमिश्राः[६] ।

इदमित्थमनेन कर्तव्यमित्येवंरूपेतिकर्तव्यताजननी विच्छिन्नप्रतिपत्तिकपदार्थोपश्लेषसम्पादिकाऽऽसंविदितस्वभावा शब्दजन्या भावना प्रतिभा, इति वाचस्पतिमिश्राः ।

प्रतिभानं प्रतिभेति भावेऽङ्प्रत्यये बुद्धेर्व्यापारविशेषः प्रतिभा, इति केचन शाब्दिकाः[७] । एवमेव नानाविधा प्रतिभा तत्र तत्र व्याख्याता[८] ।

## २. प्रतिभाभेदाः

एवं च बुद्धिविशेषरूपा, तज्जनकसंस्कारविशेषरूपा, तज्जन्यव्यापारविशेषरूपा वा त्रिविधा प्रतिभा ज्ञातव्या ।

पुनः प्रकारान्तरेण सा षड्विधा । उक्तं च—

स्वभावचरणाभ्यासयोगादृष्टोपपादिताम् ।
विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः ॥ इति ॥

---

१. वाक्यपदीयम्–२ काण्डः १४४ श्लो० ।
२. ,, ,, ,, पुण्यराजकृता ।
३. ,, २ ,, १४५ ,, ।
४. तत्त्वसंग्रहः–पृ० २८६ ।
५. काव्यप्रकाशः
६. विधिविवेकः पृ० २४८ ।
७. 'आतश्चोपसर्गे, पा० सू० (अ० ३–पा० ३ सू० १०६)
८. ध्वन्यालोकलोचनम् १–६ । ध्वन्यालोके–४-६ । व्यक्तिविवेकः पृ० १०८ । काव्यकौतुके मा० च० कृते काव्ये ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयं भावः—स्वाभाविकी प्रतिभा प्रथमा, यथा परस्याः प्रकृतेः प्रथमं सत्तालक्षणमात्मानं महान्तं प्रत्यानुगुण्यं सुषुप्तावस्थस्य प्रबोधाऽनुगुण्यमिव, फलसत्तामात्रं निद्रायाः। चरणनिमित्तिका प्रतिभा द्वितीया, यथा चरणेनैवावधृतप्रकाशविशेषाणां वशिष्ठादीनाम्। अभ्यासनिमित्तिका तृतीया, यथा कूपतटाकादिखनकानाम्। योगनिमित्तिका चतुर्थी, यथा योगिनामव्यभिचारेण पराभिप्रायज्ञानादिषु। अदृष्टहेतुका पञ्चमी, यथा रक्षःपिशाचादीनां परावेशान्तर्धानादिषु। विशिष्टैरुपहिता षष्ठी, यथा सञ्जयादीनां कृष्णद्वैपायनादिभिः।

एवं प्रतिभा बहुविधा वाक्यनिबन्धना वाक्यप्रतिपाद्या च।[१] वस्तुतो भेदानां संकलनं नैव सम्भवति, प्रतिप्राणि प्रतिविषयं च प्रतिभानामानन्त्यात्।

## ३. प्रतिभाया हेतुफले

ईदृशीनां प्रतिभानां हेतुफले अप्यवश्यं विचारणीये। वाक्यार्थ इत्यत्र अर्थपदस्य फलपरतायां प्रतिभाया वाक्यहेतुकत्वे सिद्धेऽन्येषामपि हेतूनां विचारणीयत्वात्, फलस्याऽपि ईषन्निबन्धफलतया विचारणीयत्वाच्च। तत्र प्रथमं पुनः पुनः प्रवृत्तिदर्शनरूपाभ्याससहितः शब्द एव कारणतयोच्यते। यथा बालानां तिरश्चां चार्थप्रतिपादने या प्रतिभा समुत्पद्यते सा तु वक्तृसमुच्चरितशब्दाधीनैव[२]।

वाचस्पतिमिश्रास्त्वभ्यासजन्यभावनायाः प्रतिभाहेतुतां वदन्ति। उच्यते च तैः—"नाभिधानाधीनोऽर्थबोधः शब्दात्, अपि तु अभ्यासाधीनः। यथा हि खलु कशाङ्कुशाभिघातादयोऽनभिधायका अपि वाजिगजादीनामभ्यासात् स्वतः प्रवृत्तिनिवृत्तिहेतुमर्थप्रतिभासां प्रतिभां भावयन्तः प्रवर्तका निवर्तकाश्च। तथा संक्षेपतः सर्वः शब्दो व्युत्पन्नानामव्युत्पन्नानां चेह जन्मनीत्यर्थः। अयं च प्राग्भवीयोऽभ्यासोऽवश्याभ्युपेय इत्यत्र दृष्टान्तमाह-बालानां तिरश्चां चेत्यादि" अभ्यासात्प्रतिभाहेतुरितिश्लोकव्याख्यावसरे[3]। इतः प्रागेव अभ्यासपदस्याभ्यासजनितभावनायां लक्षणा तैः प्रतिपादिता। किं च 'तथा संक्षेपतः सर्वः शब्दः' इति तदीयवाक्ये शब्दपदमपि शब्दाभ्यासजन्यभावनापरं बोध्यम्, पूर्वग्रन्थानुरोधात्। किं च 'प्रतिभां भावयन्तः प्रवर्तका निवर्तकाश्च' इति कथनेन तत्तत्कार्ये प्रवृत्तिस्तत्तत्कार्यान्निवृत्तिश्च प्रतिभाया एव साक्षात् फलमित्यप्यायाति। यच्चाग्रेऽनुपदमेव फलविवेचनाऽवसरे स्मारयिष्यते।

---

१—वा० प०—का० २, कारि० १५३ टीका पु० कृता।

२—वा० प०—का० २—श्लो० ११८।

३—न्यायकणिका-विधिविवेकः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जन्मान्तराभ्यासस्य प्रतिभाहेतुत्वं वाक्यपदीयेऽप्युक्तम् —

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ॥ इत्यादिना[१]।

किञ्च स्वभावस्य, आचरणस्य, योगस्य, अदृष्टस्य, विशिष्टपुरुषानुग्रहादीनां च प्रतिभाहेतुत्वं स्पष्टमुक्तं श्रीहरिणा[२]। एवं च स्वभावादृष्टादीनामानन्त्येन हेतूनामप्यानन्त्यं भवितुमर्हति। तत्र प्रवृत्तिनिवृत्ती एव नहि प्रतिभायाः प्रयोजनम् अपि तु समस्ता इतिकर्तव्यता इति पूर्वप्रसङ्गतो निर्णीतप्रायमेव। किं च समस्तानां वेदानां माता गायत्री, तत्र प्रतिभायाः संस्कारायैव सर्वशक्तिमतः परमेश्वरस्योपासना विहिताऽस्ति। किं च समस्तं लोकव्यवहारं सम्पादयन्ती इयं प्रतिभा भगवती एव मनुष्यजीवनलक्ष्यं चरमं पुरुषार्थं सम्पादयतीत्यहो अस्या महनीयं प्रयोजनं कथं वक्तुं पारयेयम्।

## ४. वाक्यस्य लक्षणम्

अथ प्रतिभापदार्थादिकं निरूप्योद्देश्यदलप्रविष्टस्य वाक्यस्य लक्षणं निरूप्यते। तत्र एकतिङ् वाक्यमित्याह भगवान् कात्यायनः[३]। आख्यातं सविशेषणं वाक्यमित्याह भगवान् पतञ्जलिः[४]। द्वितीयलक्षणे आख्यातमित्यनेन तिङन्तमुच्यते, कारकादि च विशेषणतया ग्राह्यम्, तिङ्प्रकृतिभूतधातुपदार्थस्य क्रियारूपस्य विशेष्यत्वं बोध्यम्। एवं च कारकादिविशेषणयुतं क्रियामुख्यविशेष्यकबोधजनकं सुबन्ततिङन्तरूपपदघटितसमुदायात्मकं वस्तु वाक्यमिति सम्पन्नम्। क्रियायाः प्राधान्यं तिङन्तस्थले भाष्याद्[५] भावप्रधानमाख्यातमिति निरुक्ताच्चापि[६] आयाति।

सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता, इतिकोशोक्तलक्षणमप्येतदनुगुणमेव।

एवं च तिङन्तद्वयघटितमपि एकं वाक्यं भवति। तिङ्ङतिङ इति सूत्रेऽतिङ इति गृह्णता सूत्रकृताप्यनुमोद्यत इदं लक्षणम्। एकतिङ् वाक्यमिति वार्तिकस्यैकतिङर्थमुख्यविशेष्यकबोधजनकेत्यर्थकरणे तु मुनित्रयसम्मतमेकमेव वाक्यलक्षणं सम्पद्यते।

असाधारणधर्मरूपं लक्षणमुक्त्वा स्वरूपभूतमपि लक्षणमुच्यते। तस्य ध्वनिसमूहविलक्षणत्वात्। तथाहि—तत्तदर्थनिरूपिता वृत्तिर्न प्रत्येकं वर्णेषु स्थातुमर्हति। अर्थबोधस्यावृत्ति-

---

१—वा० प० (का० २ श्लो० १५०)
२—विधिविवेकः—कमलशीलोक्त; । पृ० २८६
३—म० भा०—अ० २ पा० १ सू० १
४—,, ,, — ,, ,,
५—,, ,, — ,, १ पा० ३ ,, १
६—निरुक्ते नै० का० १ अध्यायः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रसङ्गात्। नाऽपि वर्णसमुदाये, वर्णानामुच्चरितप्रध्वंसितया समुदायस्यासम्भवात्। उच्चरितप्रध्वंसित्वं चोक्तमिदं महाभाष्ये—"यावद् गकारे वाग् वर्तते न तावदौकारे, यावच्चौकारे, न तावद् विसर्गे। येनैव यत्नेनैको वर्ण उच्चार्य्यते, तेनैव विच्छिन्ने तस्मिन्, तं यत्नमुपसंहृत्यान्यं यत्नमुपादाय वर्णान्तरमुच्चार्यते" इति।[1]

अतस्तावद्भिर्वर्णरूपध्वनिभिरभिव्यज्यमानोऽन्तःकरणावच्छिन्न आत्मैव स्फोटपदाभिधेयो वृत्त्याश्रयो भवितुमर्हति[2]।

एवं चापरिच्छिन्नमपि तत्तदुपाधिभूतध्वनिरूपरूषिततया परिच्छिन्नमिव वाक्यपदादिरूपेण नानात्वमाप्नोतीदं स्फोटतत्त्वम्[3]।

## ५. वाक्यस्य भेदाः

तत्रायं वाक्यस्फोटोऽखण्डसखण्डभेदाभ्यां द्विविधः। अखण्डपक्षेऽपि वाक्यजातिस्फोटः, अनवयवबाह्यवाक्यव्यक्तिस्फोटः, अनवयवाभ्यन्तरवाक्यव्यक्तिस्फोटः, इत्येवं त्रिविधः। सखण्डपक्षेऽपि आख्यातशब्दः, क्रमवच्छब्दः, संघातशब्दः, आद्यं पदम्, पृथक्सर्वपदं साकाङ्क्षम्, इत्येवं पञ्चविधः। तत्राऽप्यभिहिताऽन्वयवादे आख्यातशब्दः, क्रम इति स्वरूपद्वयम्। अन्विताभिधानवादेऽवशिष्टं स्वरूपत्रयम् बोध्यमिति विवेकः। उक्तं च वाक्यपदीये—

आख्यातशब्दः संघातो जातिः संघातवर्तिनी।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम्॥ इति।[4]

एवमेव वाक्यस्य बहवो भेदा दर्शिता वाक्यपदीये। विस्तरभिया नेहोपन्यस्यन्ते। अन्ततश्चाखण्ड एव स्फोटलक्षणः शब्दो वाक्यमिति सिद्धान्तितमस्ति।[5]

## ६. अर्थपदार्थः

वाक्यस्य लक्षणं स्वरूपं भेदाँश्चोक्त्वेदानीमर्थपदस्यार्थो विमृश्यते। स च यद्यपि बहुविधस्तथाऽपि प्रकृते धनवचनः प्रयोजनवचनो वा अर्थशब्द इत्येकः पक्षः। अभिधेयवचनो

---

१. म० भा०—अ० १ पा० ४ सू०

२. म० भा०, नवाह्निकम् 'येनोच्चारितेन...स शब्दः। म० भा०—अ० १ पा० १ सू०

३. म० भा०—नवा०—उद्द्योतः।　　४. वा० प०—का० २—श्लो० १—२—टीका पुञ्जराजकृता च

५. द्वितीयकाण्डे वा० प०—यथैक एव सर्वार्थ इत्यादिना...देवदत्तादयो वाक्ये तथैव स्युरनर्थका इत्यन्तेन ग्रन्थेन, 'अव्यक्तः क्रमवान्...इत्यादिना व्यावृत्तभेदो येनाऽर्थः, इत्यन्तेन ग्रन्थेन चोक्तः पक्षः समर्थितः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेति द्वितीयः पक्षः। तत्र प्रथमे पक्षे वाक्यस्यार्थो धनं प्रतिभा, इत्यायाति। वाक्यं स्वामि प्रतिभा तत्स्वमिति यावत्। यो हि प्रतिभां कामयते स वाक्यरूपस्वामिनः समक्षं तत्प्राप्तये याचनां करोतु। लक्ष्मीकामो यथा भगवन्तं विष्णुं याचते।

अत्र कल्पे प्रयोजनवचन इति द्वितीयव्याख्याने प्रतिभा वाक्यफलमिति भवति। तत्र यद्यपि वाक्यस्य प्रवृत्तिर्निवृत्तिर्वा फलमनुभूयते, तथाऽपि प्रतिभां द्वारीकृत्यैव न साक्षादिति विशेषः[1]। एवं च फलकोटावपि प्रतिभैव साक्षात्तिष्ठति।

यथाऽनुमानप्रमाणे साक्षात्परम्परया वा प्रत्यक्षं क्वचित् पूर्वत्र वर्तत एवेति तस्योपजीव्यता। तथैव प्रतिभायामपि साक्षादभ्यासाद्दृष्टादिद्वारा वा वाक्यं कारणतयोपास्यत एवेति तस्यात्र सुष्ठूपजीव्यता संगच्छते।

किं च यदि प्रवृत्तिनिवृत्ती एव वाक्यार्थ इत्यभ्युपेयते[2], तदा प्रतिभापदं प्रतिभाजन्ये लाक्षणिकं बोध्यम्। एवं च वाक्यं करणं प्रतिभा व्यापारः, प्रवृत्तिनिवृत्तिर्वा फलमिति सम्पद्यते। धनवचनपक्षे कार्यकारणभावस्य न विवक्षाऽत्र तु तद्विवक्षेति विवेकः। अभिधेयवाच्यर्थशब्द इति मुख्ये पक्षे त्वभिधाशब्दस्याभिधामात्रविषये लक्षणा करणीया[3]। एवं चाभिधामात्रविषयो वाक्यार्थो वाक्याऽभिधेय इति पर्यवस्यति।

अत्र व्याख्याने मात्रपदेन चक्षुरादिप्रमाणानां व्यवच्छेदो बोध्यः। अयमाशयः—वाक्येन प्रतिपाद्यमानोऽर्थः क्रियाकारकरूपः, वाक्यात्मकशब्दरूपः, विशेष्यत्वरूपः सर्वोऽपि प्रतिभयैव प्रकाश्यते न तु चक्षुरादिभिः।

## ७. वाक्यवाक्यार्थयोर्भेदत्रयम्

एवं चेदानीं वाक्यवाक्यार्थावधिकृत्य पुनरपि तादृशं भेदत्रयं निरूप्यते येन निबन्धस्य मुख्यमुद्देश्यं सन्निहितं भविष्यति।

१–तत्र बाह्यं ध्वनिरूपं वाक्यम्, बाह्य एव घटादिरर्थ इति प्रथमः कल्पः।

२–आन्तरं स्फोटात्मकं वाक्यमान्तरो घटादिर्बाह्यघटादितादात्म्यमापन्नोऽर्थ इति द्वितीयः कल्पः।

---

१ न्या० क०, वि० वि०

२. "आख्यातशब्देन हि व्यावहारिकस्य प्रवृत्तिनिवृत्तिलक्षणस्यालौकिकस्य कारकसंभिन्नस्य वाक्यार्थस्याभिधाने सति नामपदानि नियमायाऽनुवादाय वा प्रयुज्यमानान्याख्यातपदवाच्यस्यैवार्थस्य संस्कारकारीणि विज्ञायन्ते" स्याद्वादरत्नाकरः।

३. वै० सि० ल० म०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३–आन्तरं स्फोटात्मकं वाक्यमान्तर एव वाक्यार्थः प्रतिभामात्रविषयः प्रतिभासमसमयश्च। द्वितीये तु कल्पेऽन्यसमयेऽपि पदार्थसत्ता इति विशेष इति तृतीयः कल्पः। अयमेव तृतीयः कल्पः 'प्रतिभा वाक्यार्थः, इति सिद्धान्तमनुपतिष्यति।

७. (क) तत्र प्रथमः कल्प आलोच्यते। अयमपि पक्षो महाभाष्ये निर्दिष्टोऽस्ति, 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते, इत्यादिना। इमे बाह्या अर्थाः प्रत्यक्षादिसिद्धा एव। तत्र जातिव्यक्तिलिङ्गसंख्याकारकाणि क्रियात्वक्रिये शब्दस्य स्वरूपं चेत्यादयो विशेषणविशेष्यभावो विशेष्यत्वरूपो वा संसर्गो वाक्यार्थं इत्युच्यते।[१]

तत्र शब्दस्य स्वरूपे या वृत्तिः सा तु स्वरूपत एव न तु धर्मविशेषपुरस्कारेण। उक्तं च—

अर्थस्वरूपे शब्दानां स्वरूपाद् वृत्तिरिष्यते। इति[२]।
वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया। इति च[३]।

समर्थः पदविधिरितिसूत्रभाष्यात्तु विषयताऽपि शब्दशक्येति स्फुटमायाति। तथाहि—'राजपुरुष इत्यत्र का तर्हि वृत्तिर्न्याय्या? जहत्स्वार्था इत्यभिधाय राजपुरुषमानय इत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, इत्याशङ्क्य सिद्धान्तिनोक्तम्—नैष दोषः, जहदप्यसौ स्वार्थं नात्यन्ताय जहाति। यः परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति, न तु हिक्कितहसितकण्डूयितानि। न चायमर्थः परार्थविरोधी विशेषणं नाम, तस्मान्न हास्यति, इति।[४]

'परार्थविरोधी, इत्यनेन हि राजरूपस्यार्थस्य पुरुषं प्रति विशेषणतयोपस्थितौ राजरूपोऽर्थः स्वतो न विरोधी किन्तु तन्निष्ठं विशेष्यत्वादिकमेवेति विरोधित्वेन तदेव गृह्यते, त्याज्यते च।

विषयतायाः पदाशक्यत्वे तु तत्त्यागेऽपि तस्याः स्वार्थत्वाभावाद् जहत्स्वार्था इति कथनं कथं संगच्छेत?

अत्र पक्षे ध्वनिसमूहो वाक्यम्। बाह्य एव घटादिस्तस्यार्थः। अत्र बाह्य एवेत्येवकारेण आन्तरव्यावृत्तिः। आन्तरस्य स्वरूपमनुपदमेव वक्ष्यते।

---

१. वै० सि० लघुमञ्जूषा—स्फोटनिरूपणम्। २. वाक्यपदीयम्—२ का०—२६३ कारिका। ३. वाक्यपदीयम्—२ का०—२६४ कारिका। ४. पा० सू०—अ० २ पा० १ सू० १।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

७. (ख) आन्तरस्फोटरूपं वाक्यं ध्वनिव्यङ्ग्यमान्तर एवार्थस्तद्वाच्य इति द्वितीयः कल्प इदानीं क्रमप्राप्त आलोच्यते । तत्र शब्दस्य स्फोटरूपता पूर्वं प्रमाणितैव । तस्य आन्तरत्वं ध्वनिव्यङ्ग्यत्वं च किञ्चिद् विमृश्यते ! तत्र अन्तरे बुद्धौ भव आन्तर इत्युच्यते । अत्र पक्षे शब्दस्य विभुत्वेऽपि ध्वनिरूपरूषितत्वेन परिच्छिन्नतया हृदयरूपदेशाऽवच्छिन्नाकाशसम्बद्धतया स्फोटस्यान्तरत्वम् । अयं भावः—चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति[१] ॥ इति ऋङ्मन्त्रे परापश्यन्तीमध्यमावैखर्य्यश्चतस्रो वाच उक्ताः । तत्र परा वाक् आत्मज्योतिरेव तस्यां साक्षात्कृतायां तु मोक्षलक्ष्म्या अवाप्तिरेव ।

उक्तं च—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥[२] इति ।

एषा च सर्वगताऽपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते । ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनसंस्कारः । तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं 'परा वाक्' इत्युच्यते । उक्तं च हरिणा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[३] इति ।

तदेव नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तं मनोविषयः 'पश्यन्ती' इत्युच्यते एतद्द्वयं सूक्ष्मतमसूक्ष्मतरमीश्वराधिदैवं योगिनां निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते । तदेव हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्तं तत्तदर्थतत्तच्छब्दविशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्या परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा 'मध्यमा, वाणीत्युच्यते । सैव चास्यपर्यन्तमागच्छता तेन वायुना कण्ठदेश गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणाऽपि ग्रहणयोग्या विराडधिदेवत्या 'वैखरी' वागित्युच्यते । तत्र मध्यमायां यो नादांशस्तस्यैव स्फोटरूपता[४] । मध्यमायाश्च हृदयदेशाऽवछिन्नाकाशधर्मतया स्फोटस्यान्तरत्वं स्फुटम्[५] । इदं च स्फोटतत्त्वम् अर्थवत्सूत्रे[६], वचोऽशब्दसंज्ञायामिति सूत्रं[७] च विदधता

---

१—उद्धृतः—म० भा०—नवाह्निकभागतः । २—महाभारतम् ।
३—वा० प० १ का० १ कारिका । ४—वै० सि० ल० म०—शक्त्याश्रयनिरू० ।
५— वै०सि०ल०म०- स्फोटनिरू० । ६—अ० १ पा० २ सू० ४५ ।
७—अ० ७ पा० ३ सू० ६७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवता पाणिनिना स्मर्यते। यदि स्फोटात्मकः शब्दो न स्यात्तर्हि अर्थविषयकबोधजनकतारूपा शक्तिः कुत्र तिष्ठेत्? तदाश्रयीभूतशब्दस्यासत्त्वे प्रातिपदिकसंज्ञाविधायकमर्थवत्सूत्रं किं कुर्यात्? एवमेवाशब्दसंज्ञायां 'वाच्यम्' शब्दस्य संज्ञायां 'वाक्यम्' इत्यभिप्रेत्य 'वचोऽशब्दसंज्ञायाम्' इति सूत्रकरणमपि स्फोटवादं व्यनक्ति। यतश्च वाक्यमेव शब्दो न तु वर्णो नाऽपि पदम्। तस्य निराकाङ्क्षप्रतिपत्तिजनकत्वाभावात्। वाक्यस्याऽपि निराकाङ्क्षप्रतिपत्तिजनकत्वं तु स्फोटवादमन्तरा कथं संघटेत? इति।

महाभाष्येऽपि "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः" इत्यादिना[1] बहुत्र[2] समर्थितोऽयं स्फोटवादः। अत्रोच्चारितेनेत्यस्य उच्चारितप्रकाशितेनेत्यर्थः कृतोऽस्ति भाष्यटीकायाम्[3]।

श्रीहरिणा स्वीये वाक्यपदीये तु पदे पदे स्मारितोऽयं स्फोटवादः[4]।

अथ वाक्यार्थस्य आन्तरत्वं निरूप्यते। तत्रान्तरोऽर्थ इत्यनेन बुद्धिदेशस्थ इत्युच्यते। उक्तं च श्रीनागेशभट्टेन—'अर्थश्च बौद्ध एव ज्ञानविषयः शक्तिग्रहविषयश्च। ज्ञानं च वृत्तिरूपं बुद्धिधर्म एव, इति[5]। अनेन ग्रन्थेनार्थस्य बुद्धिदेशस्थत्वं पूर्वमेव, पश्चात् शाब्दज्ञानविषयत्वमित्यायाति। उक्तं च श्रीहरिणाऽपि—

यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः।
स बाह्यं वस्त्विति ज्ञातः शब्दार्थः सम्यगिष्यते॥
शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥ इति।[6]

अत्राबहीरूपोऽपि बहीरूपतया अध्यस्त इति पुञ्जराजः[7]। अध्यासे बीजं चान्तःकरणस्य रागादिदोष एव। अत एव बाह्यार्थानयनमप्युपपद्यते। यत्र हि आन्तरस्यार्थस्य बाह्यार्थेन सह संवादस्तत्र शब्दस्य प्रामाण्यम्, विसंवादे तु अप्रामाण्यमिति व्यवस्था[8]।

---

१—म० भा०-नवा०-अ० १ पा० १ आ० १। २—म० भा० नवा० अ० १ पा० १ सू० ६९।
३— ,, ,, ,, १ ,, १ आ० १ प्रदीपटीका।
४—वा० प०—का० १ कारि० १-७९-८१-८८। ५—सि० ल० मञ्जूषा—बौद्धार्थप्र०।
६—वा० प० का० २-कारि० १३४-। वा० प० का० ३-कारि०-५।
७— ,, ,, २ ,, १३४-टीका। ८—लघु मञ्जूषा—बौद्धार्थप्र०।



CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपदेशेऽजनुनासिक इदितिसूत्रे महाभाष्ये 'को देवदत्तः ? इति प्रश्ने 'अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुरीदृशो देवदत्तः' इत्युक्तम्[१]। तत्र एकस्यां व्यक्तौ भेदाभावादीदृश इति कथनं न युज्यतेऽन्येषां मते। अस्मन्मते तु एतैः शब्दैर्बुद्धौ यादृशोऽर्थो भासते तादृशो बाह्य इति व्याख्याने सर्वं समञ्जसं भवति। ईदृशतादृशशब्दाभ्यां प्रत्यभिज्ञाविषयत्वं सुष्ठु प्रतिपाद्यते। हेतुमति चेति सूत्रे भाष्येऽपि 'कंसं घातयति' इत्येतदुपपादनाय 'तेषामुत्पत्तिप्रभृत्याविनाशाद् ऋद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति' इति कथनेन[२] बौद्धपदार्थसत्ता स्फुटं प्रतीयते। तत्र हि कथावाचकेन विदुषा बौद्धकृष्णद्वारा बौद्धकंसस्य बौद्धं हननं प्रतिपाद्यते।

एवमेव पङ्क्तिविंशति ......इति सूत्रे मतुप्सूत्रादौ[४] च आन्तरपदार्थस्य पर्याप्तचर्चाऽस्ति महाभाष्ये कैयटे च।

कार्यमात्रमुत्पत्तेः प्राङ् नाशोत्तरं चासदपि बुद्धिविषयतया सिद्धमेवेत्यर्थकम् 'बुद्धिसिद्धं तु तदसत्' इति सूत्रं[५] कुर्वता महर्षिगोतमेनाऽपि उक्तविषये स्वसम्मतिर्दीयत एव।

किं च शशशृङ्गं नाऽस्तीत्यादौ बुद्धिसिद्धस्यैव शशशृङ्गस्य बाह्यसत्ता निषिध्यते। घटोऽस्ति, घटो नाऽस्ति इत्यादौ बुद्धिसत्तासमाविष्टस्य घटस्य बाह्यसत्तातदभावबोधनाय 'अस्ति नास्ति' इत्युभयोरुच्चारणं सार्थकं भवति।

७ ( ग ) अथ आन्तरं स्फोटात्मकं वाक्यमान्तर एव वाक्यार्थ इति तृतीयः सिद्धान्तपक्ष आलोच्यते। यत्र वाक्यार्थस्य प्रतिभामात्रविषयत्वं सुष्ठु सिध्यति।

अत्र श्रीवाचस्पतेरुक्तिं स्मृतिं च प्रमाणयति श्रीनागेशभट्टः[६]। तथा हि—चेतनो हि नामरूपे बुद्धावलिख्य घट इति नाम्ना कम्बुग्रीवादिरूपेण च बाह्यं घटं निष्पादयति। निर्वर्त्यस्याऽपि अन्तःसंकल्पात्मना सिद्धस्य घटस्य कर्मकारकत्वं 'घटं करोति' इत्यादौ। यदाहुः—बुद्धिसिद्धं तु तदसत्, इति[७]। तथा हि—चित्तस्य द्रव्यरूपो वृत्त्याख्यः परिणामः।

---

१—म० भा०–१ अ० ३ पा०–२ सू०।
२—म० भा०–अ० १ पा० ३ सू० २६।
३—म० भा०–अ० ५ पा० १ सू० ५९।
४—म० भा०–अ० ५ पा० २ सू० ९४।
५—न्यायदर्शनम्, अ० ४ – पा० १ सू० ५०।
६—सि० ल० मञ्जूषा–बौद्धार्थप्र०।
७—न्या० द०–अ० ४ – पा० १ – सू० ५'

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इन्द्रियप्रणाल्या निर्गत्य चित्तं विषयेण संयुज्य सूक्ष्मावस्थारूपविषयवासनावशात् तत्तद्विषयाकारेण परिणमति, न तु तस्यां बाह्यविषयप्रतिबिम्बः। स्वप्नादौ बाह्यविषयाभावेन तत्प्रतिबिम्बासम्भवात्।

उक्तं च—

विप्र! पृथिव्यादि चित्तस्थं न बहिष्ठं कदाचन।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ॥ इति।[१]

किं चात्र पक्षे इदं रजतमित्यादिभ्रमस्थले सन्निकृष्टस्य प्रतिभासमात्रशरीरस्यैव रजतादेरारोपः शुक्त्यादौ, न तु दूरस्थस्य हट्टस्थस्य, इत्यपि महल्लाघवमस्ति।[२]

## ८. दृष्टिसृष्टेरुपक्रमः

किं च दृष्टिसृष्टिवादोऽप्यस्यैव तृतीयपक्षस्य परमपोषकः। व्याकरणशास्त्रे योगिराजेन श्रीहरिणा समर्थितोऽयं वादः।

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते ॥ इति।[३]

अत्र स्वयं वृषभदेवेन व्याख्यायते—यथाऽपरेषामिन्द्रियेषु विषयमात्राशक्तयः प्रतिलयं गच्छन्ति। तथेन्द्रियमात्राशक्तयो बुद्धिषु। बुद्धिमात्राशक्तयः प्रतिसंहृतक्रमे वागात्मनि। सा चेयं स्वप्नप्रबोधवृत्तिः प्रविभक्तपुरुषानुकारा महत्यपि वाक्तत्त्वे कारणे नित्यमवस्थिता इति।[४] किं चात्र प्रतिभा बुद्धिः सैव आत्मा स्वरूपं यस्य संसारस्य सोऽयं प्रतिभात्मा, इत्येवमादिरीत्योक्तवादः सुव्यक्तो भवति।

## ९. तत्स्वरूपम्

दृष्टिसृष्टेरिदं स्वरूपम्—दृष्टिर्ज्ञानं तत्समसमयैव रजतादीनां सृष्टिः। पूर्वं पश्चाद्वा तेषामग्रहात्। अग्रहकालेऽवस्थानासम्भवात्। ज्ञाननाशेन सहैव नाशश्च। न त्ववयवादिक्रमेणोत्पत्तिर्गौरवात्।

दृश्यते च योगिनां सामर्थ्यातिशयेन नानाशरीरनिर्माणं यौगपद्येनैव। नहि तत्रावयवादिक्रमः सम्भवति। किं च सोऽयं घट इति प्रत्यभिज्ञाऽपि न घटादीनां स्थैर्यसाधने क्षमते। तथा हि—यत्र यं घटादिकं साक्षात्कृत्य यः कश्चिन्निमीलिताक्षो भवति, तदा केनचित् तं घटम-

---

१—सि० ल० म०—बौद्धार्थप्र०।
२—,, ,,— ,,
३—वा० प०—१ का० ११८ कारि०।
४— ,, ,,— ११८ ,, टीका वृषभकृता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पनीय तत्स्थाने तादृशं घटान्तरमवस्थापितम् । अनन्तरमुन्मीलिताक्षस्य तस्य भवति प्रत्यभिज्ञा सोऽयं घट इति । नह्यनया प्रत्यभिज्ञया द्वयोर्घटयोरैक्यं साधयितुं शक्यम् । कुतस्तरां स्थैर्यम् [१]।

## १०. विज्ञानवादादत्र विशेषः

ननु विज्ञानवादिनां बौद्धाचार्याणां मतेऽपि विज्ञानमात्रशरीरमेव सर्वं जगदिति तन्मतसाम्यमेवागतमत्र दृष्टिसृष्टिवादे इति चेत्, न, क्षणिकविज्ञानस्यैव तन्मते आत्मत्वस्वीकारात् । अस्मन्मते तु कूटस्थस्य त्रिकालाबाध्यस्य वाग्रूपचित आत्मत्वाभ्युगमात् । तथा च श्रुतिः—सच्चिदानन्दं ब्रह्म, नित्यं विज्ञानमानन्दं ब्रह्म, वाग्वै ब्रह्म, इति । किं च तन्मते विज्ञानस्यार्थाकारः परिणामः । अत्र त्वन्तःकरणस्य । किं च तन्नये वासनासहकारेण जगत्स्रष्टृत्वम् । अत्र शाब्दिकनये स्वातन्त्र्याख्यकालशक्तिसहकारेण । तन्मते सर्वं विज्ञानं स्वलक्षणमात्रविषयकं निर्विकल्पकम् । अपोहादिविषयकं सविकल्पकं वा भ्रमरूपम्, असदर्थाऽवभासनात् । अस्मिन् मते औपनिषदं तत्त्वमस्यादिवाक्योत्थं शब्दब्रह्मविषयकं निर्विकल्पकं विषयाबाधेन सर्वथा प्रमाणमित्यादिर्विशेषो द्रष्टव्यः । किं चाद्वैतिनां नये दृश्यस्य प्रातिभासिकस्य आविद्यकस्य अविद्यावृत्तिरूपात् चिद्रूपाद्वा विज्ञानात् पृथक् सत्त्वमभ्युपेयते । अविद्योपादानकत्वेऽप्यविद्यावृत्तितद्विषययोर्भेदाभ्युपगमात् । विज्ञानवादे तु दृश्यस्य विज्ञानाकारतैव न तु विज्ञानाद् भेदः, इत्यादिरपि भूयान् विशेषः[२]।

## ११. दृष्टिसृष्टिवादे प्रमाणानि

अत्र पूर्वं श्रुतेः प्रामाण्यमुच्यते । तथा हि—'यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति, एवमेव एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः' इति श्रुतिः सुप्तोत्थिताज्जीवात् प्राणादिसृष्टिं प्रतिपादयति । नहि स्थितस्य प्राणादेः सृष्टिः सम्भवति । नाऽपि दृष्टिसृष्ट्यभावे तदानीं प्राणादेः स्थित्यभावः सम्भवति । न च तदानीं प्राणोपलम्भाच्छ्रुतिरियमुपचरितार्थेति वाच्यम् । 'न तु तद्द्वितीयमस्ति, ततोऽन्यद्विभक्तं यत्पश्येत्' इत्यादिश्रुत्या अविशेषेण सुषुप्तपुरुषदृष्टस्य सर्वस्यैव प्रपञ्चस्य तदानीमभावबोधनात् । तद्भोगानुकूलशरीरप्राणहिताहितसाधनविषयेन्द्रियाणां तद्भोगजनकादृष्टविरामे अभावस्यैवौचित्यात् । अन्यपुरुषोपलभ्यमानस्य सुषुप्तपुरुषप्राणशरीरादेस्तु घटादिसृष्टिवत् तद्दृष्टिसमकालैव सृष्टिः । तस्मात् सुषुप्तपुरुषमालक्ष्य तद्दृश्यसर्वलयप्रतिपादकं श्रुतिवाक्यं दृष्टिसृष्टिपक्षस्य समर्थकं बोध्यम् ।

---

१ ब्रह्मसूत्रशाङ्करभाष्यम्, भामतीप्रकाशविकासयुतम् । पृ० ११७।१८ ।

२ चित्रनिबन्धावली ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भागवतेऽपि—

ईक्षेत विभ्रममिदं मनसो विलासं, दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥

इत्यनेन स्फुटमेव उपर्य्युक्तः पक्षः समर्थ्यते ।

एवमेव वेदान्तसिद्धान्तमुक्तावल्यां सिद्धान्तलेशसंग्रहेऽद्वैतसिद्ध्यादिग्रन्थरत्नेषु बहुत्राऽयं पक्षः स्पष्टं समर्थितोऽस्ति । अत्र वादे सर्वा अनुपपत्तयः स्वप्नदृष्टान्तेन परिहर्तव्याः[१] ।

## १२. उपसंहारः

एवं च यावद्दर्शनं तावत्सृष्टिरिति वादे दर्शनस्यैव प्राधान्येन वाक्यार्थस्यान्तरसत्तैव मुख्या सत्ता । बाह्यसत्ता तु दर्शनसत्ताधीनतया गौणी, इत्यागतमान्तरं वाक्यं वाक्यार्थश्चेति । अतश्च वाक्यार्थः प्रतिभा-प्रतिभामात्रविषय इति स्फुटं सिद्धम् । अत्र मात्रपदेन प्रतिभातिरिक्तस्य सर्वस्य प्रमाणस्य व्यवच्छेदः । यद्यपि प्रतिभासमकाला अन्ये बाह्या अपि घटादयश्चक्षुरादिगोचरा भवन्ति, तथाप्येतन्मते तत्प्रतीतेर्भ्रमरूपतया नाऽस्ति काऽप्यनुपपत्तिः । यद्यपि प्रतिभाया अपि वागात्मनि लय उक्त इति तत्रापि सत्यत्वं नास्त्येव, तथाऽपि बाह्यापेक्षया तत्त्वमस्त्येव ।

वृद्धिरादैच्, इत्युपक्रम्य 'अ अ' इत्युपसंहरन् व्याकरणदर्शनमूलप्रतिष्ठापको महर्षिपाणिनिरपि दृष्टिसृष्टिं समर्थयन् वाक्यार्थस्य प्रतिभामात्रविषयत्वं बाढं समर्थयति । तथा हि वृद्धिरादैच् इत्यारभ्य इदानीं यावद् यद् मया प्रक्रियासमर्थनं कृतम्, तत्सर्वं बालोपलालनमात्रम् । उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति । वस्तुतस्त्वेतत्सर्वम् 'अ अ' इति 'न न' इति यावत् । 'अ मा नो ना, प्रतिषेधे इति प्रतिषेधार्थकस्य अशब्दस्य द्विः प्रयोगात् । 'अथात आदेशो नेति नेति, इतिवत् ।

नन्वेवं प्रतिषेधरूपप्रलयस्य सर्वान्ते प्रतिपादनेनाष्टाध्याय्या अन्तेऽमङ्गलवाद आपतति इति चेत्, न, अकारो वासुदेवः, इति सर्वमिदं 'वासुदेवो वासुदेवः, इत्येव सत्यं न तु तदन्यत् किञ्चित्तत्त्वम् । 'सर्वं खल्विदं ब्रह्म, इति श्रुतेः इत्यर्थस्याऽपि 'अ अ, इतिसूत्रेण श्लेषेण बोधनात् ।

---

१ ब्र० सू० शा० भा० । भामती प्र० वि० युतम् । पृ० १२२ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं च सच्चिदानन्दं ब्रह्म इत्येवं रूपेण सद्रूपं चिद्रूपमानन्दरूपं च यद् ब्रह्म श्रुतिषु प्रसिद्धम्, तदेव 'वाग्वै ब्रह्म' इतिश्रुत्या वाग्रूपतया प्रतिपाद्यमानं व्याकरणदर्शनेन परिबृंहितम्। यदनन्तं बृहत् तदेव ब्रह्म, यस्य बृहत्ताया इयत्तया परिच्छेदः कर्तुं नैव शक्यते। एतादृशं ब्रह्म 'एकोऽहं बहु स्याम्,' स एकाकी न रेमे, इति कृत्वा 'नामरूपे व्याकरवाणि, इत्येवं रीत्या अनन्तैर्नामभिरनन्तैश्चार्थैः स्वस्वरूपं वर्धयति। तत्र शब्दरूपेण वृद्धौ जायमानायामकारात्मकं ब्रह्म आ इति विवृतम्, तदुपश्लिष्टम् ऐ औ इति च विवृतम्। एतदेव च वृद्धिरादैजित्यत्र संकेतितं भगवता सूत्रकृता।

सर्वान्ते पुनस्तस्यैव अकाररूपस्य सच्चिदानन्दस्य 'अ अ' इति द्विरुक्त्या स्मारणेन तत्रैव सत्यत्वं मत्वा सर्वैरवस्थातव्यमिति मोक्षस्वरूपसंकीर्तनेन च महते मङ्गलाय सञ्जातमिदं व्याकरणदर्शनमिति ब्रह्मसत्तासमर्थिका वाक्यवाक्यार्थयोरान्तरसत्ताऽस्य दर्शनस्य चरमः सिद्धान्तः। अतश्चान्तरसत्तामात्रे सिद्धे सर्वोऽपि वाक्यार्थः प्रतिभामात्रविषय इति वाक्यार्थत्वाऽवच्छेदेन प्रतिभामात्रविषयत्वं सुष्ठु विधेयतामनुभवति।

अन्ततश्चैकस्या एव ब्रह्मरूपपरावाच एतौ द्वौ विवर्तौ प्रतिभावाक्यार्थौ उद्देश्यविधेयभूतौ।

उक्तं च—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति।

अन्ते च किञ्चिद् हार्दं निवेद्य विरन्तुमीहे।

प्रतिभा प्रतिभा सर्वा वाक्यार्थ इति कीर्तिता।
एकात्मनो विवर्तौ द्वौ, नैव पार्थक्यमर्हतः॥
प्रतिभावतां हि रामाय प्रसादोऽयं समर्पितः।
अनेन प्रीयतां गौरी नाथो वाराणसीपतिः॥

इति शम्।

—:o:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# सत्तात्रैविध्यम्

डा० पो० सुब्रह्मण्यशास्त्री, नागपुर-विश्वविद्यालयः (म० प्र०)

उपनिषत्सु जीवन्मुक्तानां, तत्त्वदर्शिनां चानुभवा निर्दिष्टा इत्यद्वैतिनः संगिरन्ते। "श्रुत्यादयोऽनुभवाश्च यथासंभवमिह प्रमाणम्" इत्याचार्यपादैर्दर्शितम्। तदाश्रयेण गौडपादैः कारिकाः, आचार्यैरुपनिषद्भाष्याणि ब्रह्मसूत्रभाष्यं च लिखितानीति निश्चिनुमः। शाङ्करा-द्वैतेऽध्यासवादोऽतीव मुख्य इति विदितमेव। अध्यासाश्रयेण पारमार्थिकव्यावहारिकसत्त्वे एवाचार्यैः निर्दिष्टे। अर्वाचीनाद्वैतिभिः, विशेषतो विवरणानुयायिभिः प्रातिभासिकसत्यमपि गृहीत्वा सत्यत्रैविध्यं प्रपञ्चितम्।

अद्वितीयम्, परिनिष्पन्नम्, अपरिच्छिन्नम्, निर्गुणं ब्रह्मतत्त्वं परमार्थसत्यमिति कथ्यते। लौकिकस्य जगतो व्यवहारदशायामेव सत्यत्वं भाति। रज्ज्वां प्रतीयमानस्य सर्पस्य प्रतिभाससत्यतै-वास्ति। प्रातिभासिकसत्यत्वं तु कल्पितमेव। प्रवृत्त्युपयोगि च व्यावहारिकसत्यत्वम्। प्रवृत्तिश्च कर्तृभोक्त्राद्यधीना।

त्रिविधसत्यत्वं च विज्ञानवादे परिनिष्पन्न-परतन्त्र-परिकल्पितनामभिर्दृश्यते। माध्यमकवादे संवृतिसत्त्यं परमार्थसत्त्यं च दृश्येते।

व्यावहारिकसत्यत्वं नाम अन्यवस्त्वधीनत्वम्। अतो यद्भाति तत्सर्वं परतन्त्रमेव। यथा वस्तु भासते तत्तस्य कल्पितं स्वरूपम्। वस्तुनः प्रातिभासिकं स्वरूपं कल्पितमिति भावः। परमार्थं सत्त्यं च स्वस्वभावेन भाति। तस्य अन्यथा भानं नास्ति। अतः "योऽस्ति कल्पितसंवृत्या, परमार्थेन नास्त्यसौ। परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः" (मा० का० प्र० ४ का० ७३) इति गौडपादाचार्यैरभाणि। असत्पदार्थतुल्यं किमप्यस्ति। ज्ञातृज्ञेयद्वयरूपत्वेन परमार्थो न दृश्यते। परमार्थस्य का नास्तिता? अद्वयधर्मत्वं हि परमार्थसत्यत्वम्। द्वैतान्निवृत्तोऽभावदर्शनादप्रवृत्तो निश्चलेन चित्तेन ब्रह्मस्थितिं प्राप्नोतीत्युक्तम्।

यद्भाति तदसद् वस्तु। तथापि तस्य सत्यत्वं कल्प्यते। कल्पितं चात्यन्तं न विद्यते। ग्राह्यग्राहकवद् द्वैतं सर्वं चित्तस्पंदितम्। एतच्चित्तं च निर्विषयं नित्यमसंगमिति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संप्रदायविद्भिः प्रपञ्चितम्। ग्रहणं ग्राहकञ्च विज्ञानस्पंदिते। असत्यभूते द्वैतेऽभिनिवेशोऽस्ति। तथापि ग्राह्यग्राहकादिद्वैतं वस्तुतो नास्त्येव।

अभूतकल्पो वैपाकिक-नैमित्तिक-प्रातिभासिकरूपैः संदृश्यते। प्रथमो मूलविज्ञानस्य विपाकः। दृग्दृश्यज्ञानाश्रयं प्रवृत्तिविज्ञानं द्वितीयम्। बाह्यं वस्तु विज्ञानप्रतिबिम्बमिति योगाचारमतम्। ग्राह्यग्राहके विज्ञानप्रतिबिम्बे, इति कथयतो विज्ञानवादिनो निकटवर्तीव दृश्यते बिम्बप्रतिबिम्बवादी विवरणानुयायी। प्रातिभासिकमत्यन्तमसदपि सत्त्वेन गृह्यते। प्रतीतिसमये सदिति, बाधसमयेऽसदिति च तदेव स्वीक्रियते। एष स्वभावः प्रातिभासिकस्य भवितुमर्हति। तद्वद् यद् वस्तुतो नास्ति तदपि व्यावहारिकदृष्ट्या सदिति गृह्यते। अतो व्यवहारे दृश्यमानः परतन्त्रविषयोऽपि सदसदिति वक्तुं शक्यः। परिनिष्पन्नमद्वयं तत्त्वं च अद्वैतदृष्ट्या सत्, व्यवहारदृष्ट्या चासदिति कोपि ब्रूयात्।

कल्पितस्वभावे यद् द्वैतं तदसद्विषयकम्। तथापि प्रातिभासिकं रजतं प्रतीतिसमये सदेवेत्यवगम्यते। प्रमेयभिन्नः प्रमाता, इति यः स्वभावो दृश्यते स परतन्त्रः। यथा असत्कल्पितयोरेकः स्वभावस्तथा परतन्त्रस्यापि। अद्वयं तत्त्वं त्वेकत्वात्मकं शुद्धमेव।

द्वैतस्वभावरहितं परिनिष्पन्नं तत्त्वं प्रातिभासिकादभिन्नमित्यपि ग्रहीतुं शक्यते। द्वयोरप्यनुभवैकगम्यत्वात्। तथापि प्रातिभासिके बाधो दृश्यते यतोऽबाध्यत्वं तत्त्वस्य लक्षणमिति व्याकुर्वन्ति।

भ्रमज्ञानं यथार्थमिव भाति प्रातिभासिकानुभवे। तस्य कारणं व्यवहारानुभवनिष्ठमिति गम्यते। तन्निवृत्तिः सम्यग्ज्ञानात्। प्रातिभासिकज्ञानबाधश्च व्यवहारे। व्यावहारिकज्ञानबाधस्तु परमार्थप्रतीतिमाश्रित्य वर्तते। व्यवहारात्मकं सर्वं कल्पितम्। व्यवहर्तुः स्वभावः परतन्त्रे निगूह्यते। परिनिष्पन्नस्य सत्त्वे इतरे वर्तेते। त्रिविधस्य सत्यस्यालम्बनं तत्त्वं त्रिरूपेण भासते। परिकल्पितं शुक्तिरजतं वस्तुतो नास्तीत्यतोऽस्य रजतस्य भानं प्रातिभासिकम्। तदेव विज्ञानवादिभिरभावशून्यतेति कथ्यते। तस्योदाहरणं च शशविषाणमेव, न शुक्तिरजतम्। परतन्त्रस्वभावेऽतद्भावो दृश्यते। अद्वयस्यातद्भावो द्वैतम्। ततश्च माता, मेयमित्यादौ द्वैतापत्तिर्भवति। स्वस्वभावेन यद्वर्तते तन्निर्गुणं निर्विशेषं च परं ब्रह्म।

प्रतिभाससमये वस्तुन आकारो दृश्यते। स्वस्वभावरहित आकारः, स्वभावसहितत्वेनोपलभ्यते। तथोक्तमाचार्यैः—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपलम्भात् समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात् समाचारादस्ति वस्तु तथोच्यते ।। इति ।
( मा० का०, प्र० ४ का० ४४ )

वस्तुतोऽअसन्नपि हस्ती सन्निवोपलभ्यते । तथैव व्यवहारदशायां द्वैतं सदिव भासते । अत उपलब्धिमाश्रित्य वस्तुनः सत्यत्वं नापादयामः । ततश्च—

यथा मायामयाद् बीजाज्जायते तन्मयोऽङ्कुरः ।
नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना ।।
( मा० का०, प्र० ४ का० ५६ )

इत्यपि गौडाचार्यैरुक्तम् । मायामयाद् बीजान्मायावृक्ष एव जायते । स वृक्षो न नित्यः । अनित्यस्य विनाशोऽपि नास्ति । अतो धर्माणां जननमरणादयो वस्तुतो नापादनीयाः । अद्वयतत्त्वस्याजत्वमपि न वक्तव्यम् । कल्पित-व्यवहारसत्ये समाश्रित्य तत्त्वमजमिति व्यवहरामः । व्यावहारिकदृष्ट्यैव तस्याजत्वं परिकल्प्यते । चराचरस्य द्वैतजगतो मनोदृश्यत्वाद् यदा मनसो निरोधो लभ्यते, तदा द्वैतं नोपलभ्यते । चित्तवृत्तिनिरोधाद् ग्राह्यवस्त्वभावः सम्भवति । वस्तुनोऽभावेऽसङ्गो भवत्यात्मा ।

प्रातिभासिकं रजतमनिर्वचनीयं भवति । रजतत्वेन या शुक्तिर्भासते, तस्या रजतभानं नासद्भवितुमर्हति । यथार्थरजतभिन्नत्वात् शुक्तिरजतं न कदापि बाध्यते । तथापि प्रतीतिसमये व्यावहारिकरजतभिन्नत्वेन नायं गृह्यते । तस्मिन् क्षणे रजतं सत्यमेव । अनन्तरक्षणे इदं रजतं बाध्यते । अतः शुक्तिरजतं सद्भिन्नमसद्भिन्नं च भवति ।

रज्जू रजतरूपत्वेन न भाति, नापि शुक्तिः सर्पाकारत्वेन । यद्भासते तद्भाने तस्याश्रयो नोपेक्षणीयः । आधाराधेययोः सादृश्यवशाद् रजतं शुक्तौ विद्यते । प्रातिभासिकस्योपादानकारणं सादृश्यमेवेति भावः । सादृश्यं भ्रमप्रतीतावनन्यत्वेन गृह्यते । तदेवाज्ञानजन्यम् । सादृश्यमपि बुद्धिस्थत्वाद् न सार्वजनीनत्वेन भाति । अज्ञानवशात् सादृश्यं तादात्म्यरूपेण भासते । तादात्म्ये बहिर्वस्तुभानमप्यपेक्षणीयम् । अतः प्रातिभासिकस्थले बाह्याभ्यन्तरे द्वे अपि समन्विते ।

व्यावहारिकप्रतीतिश्च प्रातिभासिकतुल्या । यथा तत्त्वं सदिति व्यवह्रियते तद्वद् जगतोऽस्तित्वं न शक्यते वक्तुम् । शशश्रृंगवद् अत्यन्तम् असदित्यपि जगन्निर्वचनं न सम्भवति । सदसदुभयात्मकं च जगन्न भवति । तदनुभयात्मकमपि न भवति । यत् सत् तन्नोत्पाद्यम्, नापि क्षणिकम् । भावत्वं चास्य सतो ब्रूमः । शशविषाणं नोत्पद्यते, न नश्यति, तथापि नास्य भावरूपत्वम् । अनिर्वचनीयस्यान्तं विद्यते, अन्तवत्त्वादादिरपि । यदुत्पद्यते तत् परतन्त्रम् ।



CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्पदार्थः स्वयं सिद्धो भवति । व्यवहारे तु यत् सदिति परामृश्यते तस्यादिमत्त्वं न निह्नुमः । व्यावहारिकी च सत्ता देशकालाधीना । तथा अद्वितीयतत्त्वे परस्य तच्छब्दस्य एकोऽर्थः, व्यवहारपरस्य तच्छब्दस्य द्वितीयोऽर्थः । द्वितीयस्मिन्नर्थे विकारार्थोऽपि गृह्यते । अद्वयतत्त्वस्य सत्ता तत्स्वभावादनन्या । जगतः सत्ता तु तत्स्वभावाद्भिन्नेति व्यवस्था क्रियते । आद्ये सत्ता प्रमात्रभिन्ना, द्वितीये वस्तुनो विशेषणम् । विशेषणीभूता हि सत्ता स्वस्वभावशून्येति तां संवृतिव्यावहारिकादिपदैर्निर्वाचयन्ति ।

सर्वेऽपि विषयाः सत्तासंवलिताः । तेषां च सत्ता विशेषणीभूतत्वात् तत्कारणं निर्विशिष्टं चिदेव भवितुमर्हति । निर्गुणतत्त्वस्य सत्ता सर्वेषामाधारभूतत्वाद् न दृश्यते, प्रमेयवत् । मानमेयादिका सामग्री तदवगाहने निष्फला भवति । नद्या जन्मस्थलं खलु तत्प्रवाहभूमेरुच्चतरप्रदेशो भवति । अतः प्रमाणैरप्रतीतं सर्वं मृषेति न वक्तव्यम् । प्रमाणान्यपि तत्त्वाधिष्ठितान्येव । यदा नामवाचकः क्रियाविशेषणत्वेन प्रतीयते तदा भ्रम एव । ततः सत्ता यदि क्रियाविशेषणमिव भाति, तर्हि अबाधितार्थज्ञानं परित्यक्तं भवति । यथार्थज्ञानं च न प्रमाणजन्यम्, किन्त्वबाधितानुभवैकजन्यम् । अत्र भासमानविषयाणामाधार एव प्रत्यक्षीक्रियत इति शम् ॥

—०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# रसानाथर्वणादपि

डॉ० रमाशङ्करजैतली, संस्कृतविभागः, राजस्थानविश्वविद्यालयः, जयपुरम् ।

रसस्य मूलोद्गमं केन्द्रीकृत्य काव्यशास्त्रेषु नानाविधान्युद्धरणानि दृश्यन्ते । तत्र च कानिचिन्मिथः सापेक्षाणि कानिचिच्च मिथो निरपेक्षाणि सन्ति । कुत्रचिद्रसोत्पत्तिमादाय 'एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना'[१], 'रसानाथर्वणादपि'[२] प्रभृतयः सामान्यप्रकारकाः सङ्केताः समुपलभ्यन्ते, कुत्रचिच्च—

> शृङ्गार उदभूत् साम्नो वीरोऽभूद्दिततो ऋचः ।
> अथर्ववेदतो रौद्रो बीभत्सो यजुषः क्रमात् ॥[3]
> कैशिकी वृत्तितो जज्ञे शृङ्गारः पूर्वतो मुखात्[४] ।
> कैशिकी सामवेदाच्च[५] ... ..

इत्यादयो रसानां विभिन्नवैशिष्ट्यदृष्ट्या विभिन्नस्रोतोभिः सह रससम्बन्धं प्रत्याययन्तो रसोत्पत्तिमूलका विशेषाः सङ्केता लोचनगोचरतामायान्ति । आपाततस्ते विरुद्धत्वेनावभासन्ते, परन्तु रससामान्यस्य मूलस्थानमथर्ववेदस्तद्भेदविशेषाणां शृङ्गारादीनां च स्रोतांसि सामवेदादीनीति मूलस्रोतसां पार्थक्येन निर्देशस्तत्तद्रसानां सहायभूतान्तरङ्ग–बहिरङ्गभावना एवादाय कृत इति वस्तुतस्तत्राविरोध एव ।

"नाट्यवेदो ब्रह्मणा विनिर्मितः" इति नाट्यशास्त्रे प्रतिपादितम् । नाट्यस्य निखिलान्यङ्गानि यथावद् विचिन्त्य द्रुहिण एव नाट्यं समुचितरूपविन्यासपूर्वकं लोकहिताय समसृजत् । रसस्तु नाट्य इयत्प्रामुख्यमवाप्तवान् यत् स नाट्यशब्दस्य मुख्यार्थत्वमभजत्[६] । इदं सर्वथा समीचीनं प्रतिभाति । किन्नाम नाट्यम् ? तत्तु नाटकाद्यन्यतमकाव्यविशेषेण द्योतितमर्थजातम् । एवं यत् प्रेक्षको नटस्याभिनयप्रभावेण साक्षात्कुरुते तथा येन सह तस्य मन एकतानं जायते । इयमेव चित्तवृत्ती रसः, या स्व-पररूपेण प्रतीयमानाभ्यश्चित्तवृत्तिभ्यः सर्वथा विलक्षणा, साधारणीभूतत्वेन प्रतीयमानतया सहृदयसामाजिकानपि स्वपरिधौ समाधाय तदाकाराकारितया भासमाना

---

१. नाट्यशास्त्रम् ६।१६ ।  २. नाट्यशास्त्रम् १।१७ ।  ३. भावप्रकाशनम्, पृ० ५७ ।
४. भावप्रकाशनम्, पृ० ५७ ।  ५. नाट्यशास्त्रम् २०।२५ ।
६. (क) तेन रस एव नाट्यम् । (अभिनवभारती, पृ० २६७)
(ख) नाट्यशब्दो रसे मुख्यो रसाभिव्यक्तिकारणम् । (संगीतरत्नाकरः ७।१७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च निर्विघ्नस्वसंविद्विश्रान्तिभाजा चर्वणाव्यापारेणास्वाद्यते। नाट्यशास्त्रस्य प्रथमेऽध्याये सङ्केतितमिदं वर्तते यत् समस्तलोकवेदज्ञो ब्रह्मा चतुरो वेदान् विचिन्त्य ऋग्वेदात् पाठ्यं सामवेदाद् गीतं यजुर्वेदादभिनयान् रसानाथर्वणाच्चादाय नाट्यस्य रूपरेखां स्थिरीचकार[१]। वस्तुतः शब्दा नाट्यशरीरम्, अतो व्यक्तवचनानि विना नाट्यं रूपं ग्रहीतुं न प्रभवति, यतो वाचिकाभिनयस्य निष्पत्तये व्यक्तवचनान्यनिवार्याणि सन्ति, कारणादस्माद्वेदादृचः पाठ्यांशस्य ग्रहणं परमावश्यकम्। गीतानि विना नाट्ये नोपरञ्जकत्वमायाति। गीतानि नाट्यप्रयोगस्य प्राणास्तेषामतः संगीतोद्गमस्थलात् सामवेदादादानं समीचीनमेव। यजुर्वेदे यदध्वर्योर्यज्ञीयः क्रियाकलापः परिदृश्यते तत्राङ्गिकाहार्यस्याभिनयस्य प्रवृत्तिः स्पष्टतया दृष्टिपथमायाति। यजुर्वेदादतोऽभिनयस्य संग्रहणं नितान्तं नैसर्गिकम्। रसस्य मूलमथर्ववेद एवेत्यत्र समेषामाचार्याणामैकमत्यम्। शार्ङ्गदेवोऽपि संगीतरत्नाकरे भरतस्य रसोत्पत्तिविषयकं मतमेव समर्थयन् दृश्यते[२]। अत्र प्रसङ्गमिममादाय रसानाथर्वणादपीति नाट्यशास्त्रगतमुद्धरणं प्रमाणनिर्देशपुरस्सरं समासतो विविच्यते।

पूर्वनिर्दिष्टेन प्रसङ्गेनैतेन तथ्यद्वयं बुद्धिपथमवतरति। तद्यथाथर्वणि रसविषयकं रसघटकभावविभाववर्गरूपनिष्पत्तिमुखेन प्रथमं विवेचनमुपलभ्यते तथावश्यकोपकरणानि समाकलय्य द्रुहिणः सर्वप्रथमं रसस्य सामान्यां बहिर्लेखामन्तःप्रवृत्तिं च निरूपयाञ्चकार। अत्रायं प्रश्नः समुल्लसति यद् नाट्यात्मभूतस्य रसस्य वेदेनाथर्वणा सह सम्बन्धः कथं सिद्ध्येत्? अत्र च विषये कानिचिद् बहिःप्रमाणानि समुपलभ्यन्ते, यानि वेदेनाथर्वणा सह रस-सम्बन्धं प्रत्याययन्ति। तत्रैकं प्रमाणं त्वथर्ववेदीये गोपथब्राह्मणे संप्राप्यते यत्रेदमभिहितं वर्तते यदथर्ववेद एव ब्रह्मणः सारभूतस्तत्रैव वेदानां रसामृते निहिते स्तस्तथा तत एव रसामृतेऽभिष्यन्देते। तद्यथा—

एतद्वै भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः।
येऽङ्गिरसः स रसः। येऽथर्वाणस्तद् भेषजम्।
यद् भेषजं तदमृतम्। यदमृतं तद् ब्रह्म।[३]

एवं रसामृतरूपादथर्वणो नाट्यप्राणभूतो रस आविर्भवतीति विश्वसितुं शक्यते।

---

१. जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥
(नाट्यशास्त्रम् १।१७)

२. ऋग्यजुःसामवेदेभ्यो वेदाच्चाथर्वणः क्रमात्।
पाठ्यं चाभिनयान् गीतं रसान् संगृह्य पद्मभूः।
व्यरीरचत् त्रयमिदं धर्मकामार्थमोक्षदम्॥
(संगीतरत्नाकरः ७९,८०)

३. गोपथब्राह्मणे—३।४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रसङ्गान्तरमृग्वेदीयस्यैतरेयब्राह्मणस्य वर्तते, यत्र यज्ञपावनतावर्णनकाले यज्ञं रथरूपं संकल्प्य वाङ्मनसी तस्य चक्ररूपे वर्णिते। यज्ञसम्पूर्त्यै यथाध्वर्युर्वाचिकीं शारीरिकीं च क्रियां सम्पादयति, तथैव स मानसमात्मिकं चापि व्यापारमभिनिर्वर्तयति। वाक्चक्रमपरोक्षं पन्थानं समाश्रयति मनश्चक्रं च परोक्षं पन्थानम्। तत्र प्रथमं चक्रं त्रयी सञ्चालयति, द्वितीयं त्वथर्वणा परिचालितं भवति। तथाहि—

"अयं वै यज्ञो योऽयं पवते। तस्य वाक् च मनश्च वर्तन्यौ। वाचा च हि मनसा च हि यज्ञोऽवर्तत। इयं वै वाक्। अदो मनः। तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति। मनसैव ब्रह्मा संस्करोति।"[१]

सामवेदीयाश्छन्दोगा अपि तथ्यमिदं मुक्तकण्ठं समर्थयन्ति। यथाहि—

"एष ह वै यज्ञो योऽयं पवत एष ह यन्निदं सर्वं पुनाति यदेष यन्निदं सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी॥......"

"तयोरन्यतरां मनसा संस्करोति ब्रह्मा वाचा होताऽध्वर्युरुद्गाताऽन्यतरां स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति"॥[२]

यज्ञो हि द्वाभ्यां संस्कृताभ्यां मार्गाभ्यां नीयते। मनोवर्तनी ब्रह्मणा वाग्वर्तनी च होतृप्रभृतिभिस्त्रिभिस्संस्क्रियते। यज्ञो हि न केवलमन्यतरया वर्तन्या वर्तितुं शक्नोति। यथैकपात्पुरुषो व्रजन्नध्वानं रिष्यति, यथा रथो वैकेन चक्रेण गच्छन् रिष्यति, तथैवास्य यजमानस्य मनोवर्तनीं संस्कर्तुमक्षमेण कुब्रह्मणा यज्ञो विनश्यति। अत्राथर्वणा परिचालितो मनश्चक्र-प्रसङ्गो मनोभावान् रसात्मकरूपप्रदायिनः प्रति रसविधानस्य दिशि स्पष्टं सङ्केतं कुरुते।

अन्तःप्रामाण्यमाश्रित्य यद्यपि नेदं कथयितुं पार्यते यदथर्वणि रसानां तन्मूलकमनोभावानां वा क्रमबद्धं सुस्पष्टं चित्रं वरीवर्ति, तथापि यत्र तत्र विकीर्णानां रसभावपरक-प्रसङ्गानां समाकलनेन रसभावविषयिणी सामान्यभावनावश्यं परिपुष्टिमेतीति निस्संदिग्धम्। मनसस्तस्य सदसदनन्तशक्तेश्च विवरणमृग्यजुःसामस्वपि पर्याप्तं समुपलभ्यते, परन्तु तस्य संकल्पिकायाः कल्याणविधायिन्याः सर्वव्यापकविभूतेः (कामस्य) काव्यात्मकं सहृदयहृदयावर्जि वर्णनमथर्व-

१. ऐतरेयब्राह्मणे ५।३३।

२. छान्दोग्योपनिषद् १६।१,२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ण्येवाधिगतं भवति । काम एव सर्वेषामभिलषणीयं संकल्पमयं प्रथमोत्पन्नं तत्त्वं यस्य शक्तेः पुरस्ताद् देवाः पितरो मर्त्याश्च नमन्ति । सोऽस्ति वस्तुतो ज्यायान् महांश्च —

कामं यज्ञे प्रथमो नैनं देवा आपुः पितरो न मर्त्याः ।
अतस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते नम इत् कृणोमि ॥[१]

जीवशक्त्यपेक्षया कान्तिमतः कामस्य शक्तिरतितरां ज्यायसी । वृक्षपर्वतादिस्थिरपदार्थापेक्षया सः प्रकामं स्थैर्यसामर्थ्यमाधत्ते । धारासारैर्जलसंप्रवर्षिभ्यो मेघेभ्यः प्रचण्डशक्तिमतो महोर्मिमालिनः प्रलयङ्करादर्णवादपि सोऽधिकां शक्तिमावहति—

"ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान् समुद्रादसि काममन्यो ।"[२]

सर्व एव कामस्य पुरस्तादकिञ्चित्कराः —

"न वै वातश्चन काममाप्नोति नाग्निः सूर्यो नोत चन्द्रमाः ।"[३]

संकल्परमणीयस्य कामस्यायं प्रसङ्गो रसभावदृष्ट्या विशेषं महत्त्वमावहति । वस्तुत इदमेवास्ति तन्मूलस्थानं यतः सर्वे भावाः समुद्भूय स्वं स्वं रूपं परिगृह्णन्ति तथा यत्र कामस्य कमनीयतायां प्रमोदात्मिकाया रतेर्दर्शनं जायते । नवमकाण्डस्यैतत्सूक्तातिरिक्तानि षष्ठे काण्डेऽपराणि पञ्च सूक्तानि सन्ति, येषां देवता स्मरो विषयश्च दम्पत्योः परस्परं प्रणयोत्कर्षो धृत्या जीवने तन्निर्वाहस्य कामना च । तत्र रतेः संयोगवियोगपक्षस्य विशदं चित्रं रसरूपेणोन्नीताया रतेः प्रशस्यत्वं चाङ्कितं दृश्यते । तत्र मनसो रागात्मिकाया वृत्तेः स्मररूपेण कल्पना कृतास्ति, तथा शृङ्गारस्य संयोगायोगवियोगानां तद्घटकान्यभावानां च सूक्ष्मं सुस्पष्टं चित्रमासाद्यते ।

यत्रान्योन्यमनुरक्तौ विलसनशीलौ दम्पती मिथो दर्शनस्पर्शनादीनि निषेवेते स सम्भोगः कथ्यते । यद्यपि स परस्परावलोकनाधरपानालिङ्गनपरिचुम्बनाद्यनन्तत्वादेतावदेवेति परिच्छेत्तुं न शक्यते तथापि नायिकारब्धत्वेन नायकारब्धत्वेनोभयारब्धत्वेन च तस्य त्रैविध्यमङ्गीक्रियते । अथर्ववेदीयषष्ठकाण्डस्य नवमे सूक्ते निबद्धानि सम्भोगस्य कानिचित् समृद्धिमन्ति चित्राण्यत्र समुद्भ्रियन्ते —

वाञ्छ मे तन्वं पादौ वाञ्छाक्ष्यौ वाञ्छसक्थ्यौ ।
अक्ष्यौ वृषण्यन्त्या केशा मां ते कामेन शुष्यन्तु ॥[४]

---

१. अथर्ववेद—काण्डम् ९, सूक्तम् २, मन्त्रः १९ ।
२. ,, ,, ,, मन्त्रः २३ ।
३. ,, ,, ,, मन्त्रः २४ ।
४. अथर्ववेदे काण्डम् ६, सूक्तम् ९, मन्त्रः १ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र दम्पत्योः परस्परावलोकनस्पृहाऽतितरां तीव्रा। द्वावेवान्योन्यदर्शनमतितरां कामयेते। प्रसङ्गोऽयमुभयारब्धस्य रम्यं चित्रमुपस्थापयति। वस्तुतो दर्शनमेवेदृशं तत्त्वं यत्रोभयोर्यथा सम्भूयकारित्वं प्राप्यते न तथा सम्भाषणालिङ्गनचुम्बनादिषु। तत्रेदृग्विधानि चित्राण्यपि बहुशः प्राप्यन्ते यत्र चुम्बनालिङ्गनभावनापि पूर्णं स्फुटीभवति। चुम्बनं हि प्रणयिजनेषु परस्परस्नेहबन्धनं द्रढयति, तदेव तेष्वन्योन्यस्नेहस्वीकृतेर्मुद्रां नियोजयति—

"यासां नाभिरारेहणं ( चुम्बनम् ) हृदि संवननं कृतम्।"[१]

एवं प्रतीयते यदत्राव्याहतज्योतिषाऽऽर्षेण चक्षुषा चुम्बनस्यासाधारणधर्मं समुन्मील्य मन्त्रद्रष्ट्रा सुस्पष्टं परिभाषितम्। प्रणयी जनो विश्रम्भादुरसि लग्नां प्रेयसीं स्वभुजे सम्यगासञ्जयितुं निजे बाहुपाशे च गाढमाबद्धुमेतदर्थमेव कामयते यतस्सा शाश्वतीः समास्तस्य मनोरथान्तर्वर्तिनी स्यात् —

मम त्वा दोषिणिश्रिषं कृणोमि हृदयश्रिषम्।
यथा मम क्रतावसो मम चित्तमुपायसि ॥[२]

यथा लता वृक्षं समन्ततः परिष्वजति, तथैवेयं मम प्रियतमा समन्ततः स्नेहनिर्भरं मां परिरभ्य तिष्ठतु समाश्रयतु च —

यथा वृक्षं लिबुजा समन्तं परिषस्वजे।
एवापरिष्वजस्व मां यथा मां कामिन्य सो यथा मन्नापगा असः।[3]

पूर्वोक्तसूक्तेषु कियन्तीदृशानीतस्ततो विकीर्णानि तत्त्वानि संदृश्यन्ते यैः संयोगशृङ्गारस्य रूपनिष्पत्तिर्जायते। तेषु स्मररूपस्य यद्विश्लेषणमवाप्यते तत्र काव्याचार्यैः परिगणिताः समस्ताः कामदशाः[४] स्फुटत्वमायान्ति। पूर्वोक्तानां दशानां सम्बन्धो विप्रलम्भस्यायोगविप्रयोगयोरुभयोरवस्थयोर्दृश्यते। यथा लिबुजेत्यादिमन्त्र अयोगपक्षस्य रम्यमुदाहरणं यत्राभिलाषो हृदयावर्जकं चित्रमुपस्थापयति। अत्रास्ति नामनिर्देशं विना पूर्वरागस्य कमनीया पृष्ठभूमिः। अस्यैव सूक्तस्यान्यस्मिन् मन्त्रे भावमूर्धाभिषिक्ताया रतेर्हृदयग्राहि चित्रमुपलभ्यते। प्रणयी जनस्तत्रैवं प्रार्थयते—

---

१. अथर्ववेदे काण्डम् ६, सूक्तम् ९, मन्त्रः ३।

२. अथर्ववेदे काण्डम् ६, सूक्तम् ९, मन्त्रः २।

३. ,, ,, ,, ८, मन्त्रः १।

४. अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाख्याः।
उन्मादोऽथ व्याधिर्जडतामृतिरिति दशात्र कामदशाः ॥

( साहित्यदर्पणे ३।१९० )

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हे देवाः ! यूयमस्मासु ममत्वातिशयान्वितं मादनमितरेतरस्मारकं सान्द्रं भावबन्धनं जागरयत, येन संयोगे वियोगे च परस्परमेकचित्तीभूय स्मरन्तः परदुःखे दुःखमनुभवन्तस्तिष्ठेम —

असौ मे स्मरतादिति प्रियो मे स्मरतादिति ।
देवाः प्रहिणुत स्मरमसौ मामनुशोचतु ॥[१]

वस्तुतो रतेरेतदतिरिक्तं किं लक्षणं भवितुमर्हति ? रतिपदार्थस्तु स्त्रीपुरुषयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेष एव यः प्रणयिजनमुद्दिश्य प्रधावति ।

अस्यैव सूक्तस्याग्रिमे मन्त्रे प्रसङ्गोऽयमायाति यद्देवा मानवहृदयेषु काममेतदर्थमेव प्रतिष्ठापितवन्तो येन प्रणयी जनः प्रेयस्यामीर्ष्यातः प्रणयाद्वा मानमाश्रित्य स्वाभीष्टाश्लेषवीक्षादिनिरोधं कुर्वत्यामपि न तां विस्मरेत्, अपि तु स्नेहपूर्वकं तदिच्छानुवर्तनमाचरेत् —

यथा मम स्मरादसौ नामुष्याहं कदाचन ।
देवाः प्रहिणुत स्मरमसौ मामनुशोचतु ॥[२]

इयमपि रतेरेव व्याख्या । अत्र निजां विशिष्टां प्रवृत्तिमादधाना रतिः पूर्वरागतो मानं यावत् प्रसृता ।

अत्रैवाग्रे स्मरस्य मादनं चित्रं प्राप्यते, यद् विशेषेणोद्दीपिकासु परिस्थितिषु प्रेमपरवशं नरमुन्मादयति । तद्यथा —

उन्मादयत मरुत उदन्तरिक्षमादय ।
अग्न उन्मादया त्वमसौ मामनुशोचतु ॥[३]

अत्र प्रार्थनापूरयितारः सन्ति मरुदन्तरिक्षाग्नयो देवाः । मरुत्कृपालवलेशेन शीतलो मन्दः सुरभिश्च समीरणः सुलभः स्यात् । अन्तरिक्षेऽनुकूले जाते सपरिकरा ग्रहनक्षत्रचन्द्रादयः, उन्मत्तगजगामिनो जलपूर्णा जलदाः, हिरण्यवर्णा पुराणी युवतिरुषा, अरुणाभा सन्ध्या च सम्प्राप्ताः स्युरित्यत्र नास्ति लेशोऽपि संशयस्य । अजरदीप्तिमतो देवस्याग्नेः सकाशाद् दीप्तिमूर्ध्वसंचरणशीलतां पावनतामुष्णतायाः संस्पर्शं च समवाप्य प्रेमानुभवः प्रदीप्तिमेष्यति । अत्र रतेरुच्चभूमिकया सहोद्दीपन-विभावस्य स्फुटा रूपनिष्पत्तिः । परन्त्वत्र यस्योन्मादनतत्त्वस्य प्रसङ्गो निर्दिष्टः,

---

१. अथर्ववेदे काण्डम् ६, सूक्तम् १३०, मन्त्रः २ ।
२. अथर्ववेदे काण्डम् ६, सूक्तम् १३०, मन्त्रः ३ ।
३. ,, ,, ,, मन्त्रः ४ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न तदुन्मुक्तमादकताप्रयोजकम्, अपि तु चिरस्थायिनि प्रेम्णि निरतेषु जनेषु परस्पराभिलाषप्रयोजकम्। अतएव रसविधाने सत्त्वोद्रेकस्य स्थितिरनिवार्यत्वेन स्वीकृता वर्तते। इन्द्रियसमाराधनपरो वासनात्मको रतिभावस्तेषां सर्वथा नाभिमतः।

रतेर्वर्णनमत्र न केवलं नायकनायिकादृष्ट्या विहितं तस्याः सामाजिकं पारिवारिकं वापि महत्त्वं वर्तते। सा न केवलमुभयालम्बना—नायकनायिकालम्बना, अपितु सर्वात्मीयजनालम्बना, अत एव भारतीयभावनानुकूला। पवनवेगवता वाजिना सुदूरं प्रस्थितं पतिं न तत्प्रेयसीप्रलोभनं द्रुतं गृहमाकर्षति, अन्तःकरणतत्त्वस्यानन्दरूपाया अपत्यग्रन्थेः प्रभावेण नरो बहुयोजनायतमध्वानं समुत्तीर्य सूत्राकृष्टः क्रीडनक इव विवशो भूत्वा गृहं समागच्छति—

"यद्धावसि त्रियोजनं पञ्चयोजनमाश्विनम्।
ततस्त्वं पुनरायासि पुत्राणां नो असः पिता॥"[१]

रतेरियमेका व्यापकदृष्टिर्यत्र दम्पत्योः प्रमोदात्मिकया रत्या सहाविर्भवन्ती वात्सल्यमूला रतिरपि भावनापथमायाति। षष्ठकाण्डस्य त्रयस्त्रिंशदुत्तरशततमे सूक्ते विवाहबन्धनं परस्परप्रेमाभिलाषं च द्रढयितुं केषाञ्चन नैतिकोपायानामाश्रयणमनिवार्यत्वेन स्वीकृतम्। तत्रैव च कैश्चिदस्थिरमनस्कैर्जीवने स्वेच्छाचारमादर्शत्वेन मन्यमानैः स्नेहबन्धने कदर्थिते राजदण्डविधानस्याप्यवलम्बनं कृतम्—

"यं देवाः स्मरमसिञ्चन्नप्स्वन्तः शोशुचानं सहाध्या।
तं ते तपामि वरुणस्य धर्मणा॥"[२]

वरुणस्यैवायं धर्मो यत् स जगतो व्यवस्थां धारयति, जनान् सुपथमाश्रित्य गन्तुं प्रेरयति च। एतद्विवेचनेनेदमवगम्यते यदथर्वणि सिद्धान्तमुखेन निष्पत्तिमुखेन वा रसविवेचनं नोपलभ्यते, परन्तु रसमूलभूतानां शक्तिरूपाणां भावनां तत्सम्बन्धिविभावानुभावानां च विशालः संग्रहस्तत्र विद्यत एव यस्योपयोगो मुनिना भरतेन नाट्यशास्त्रस्य सप्तमेऽध्याये परमार्थतो याथातथ्येन विहित इति निश्चप्रचम्।

वीर-रौद्रादिरसाभिव्यञ्जको भाववर्गस्तद्व्यञ्जिका विभावानुभावसामग्री चापि तुरीयेऽस्मिन् वेदे प्राचुर्येण प्राप्यते। मन्युसूक्तं न केवलं वीररसस्थायिन उत्साहस्य, रौद्ररसस्थायिनः

---

१. अथर्ववेदे, काण्डम् ६, सूक्तम् १३१, मन्त्रः ३ २. अथर्ववेदे, काण्डम् ६, सूक्तम् १३२, मन्त्रः १



CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रोधस्य च समर्थं व्यञ्जकम्, अपितु पूर्वोक्तभावद्वयपरिपोषकाणां सञ्चारिणां तद्व्यञ्जकविभावानुभावोपकरणानामपि सफलमाधायकम्। वीररसप्रसङ्गे मन्युशब्द उत्साहरूपमर्थमभिधत्ते रौद्ररसप्रसङ्गे च स एव शब्द उत्साहस्य प्रतिक्रियारूपं क्रोधमर्थमभिदधानो दृश्यते। यदायमुत्साहो मनसो रथमारोहति, मनुष्याः प्रसन्नचेतसो (हर्षमाणाः)[१] दृश्यन्ते। ते न कदापि नैराश्य—विजडिताः (हृषिताषः)[२] भवन्ति। प्रमुदितास्सन्तस्ते सर्वं कार्यं कर्तुं प्रभवन्ति। उत्साहकारणात्ते मरणावस्थायामपि समुत्थातुम् (मर + उत् + वन्)[३] अभिकांक्षन्ते। उत्साहेनैव नरा अग्निसमास्तेजस्विनो (अग्निरूपा नरो)[४] जायन्ते! उत्साहेनैव तेषां विलक्षणमुग्रं बलं (उग्रं पाजः)[५] प्रवर्धते। अयमेवोत्साहोऽस्माकमन्तःशक्तीनां सञ्चालकः सेनानीः (नः सेनानी)[६] अस्मादेवाभिभूत्यौजसो मन्योर्मानव-जीवने स्थेयान् संरम्भः समायाति। अतएव मन्युदेवमुद्दिश्येयं प्रार्थना विहितास्ति यदुत्साहोऽस्माकमधिपो भवतु (अस्माकमधिपाः)[७]। अयमधिपो "रुजन् मृणन् प्रमृणन् प्रैति शत्रून्"।[८] अयं वीरस्यायुतसिद्धो धर्मो यमासाद्य नरः प्रतिकूलाः परिस्थितीरप्यनुकूलयति संग्रामे च विजयमासादयति—

"त्वं हि मन्यो अभिभूत्यौजाः
स्वयंभूर्भामो अभिमातिषाहः।
विश्वचर्षणि सहुरिः सहीया-
नस्मास्वोजः पृतनासु धेहि॥"[९]

उत्साह-हीनस्य नरस्य कर्मशक्तिः परिक्षीयते, स वस्तुतोऽधन्य एव।[१०] एतदतिरिक्तमुत्साहस्य किं वर्णनं भवितुमर्हति? सर्वमत्र प्राप्यते—स्वरूपलक्षणं, विविधासु परिस्थितिषु तत्क्रियाकलापबोधकं तटस्थलक्षणं च। ऋग्वेदीयानीन्द्रसूक्तानि यद्यपि विशेषरूपेणोत्साहवर्धकानि सन्ति, परन्त्वथर्वणि प्रामुख्येनोत्साहो भावमुखेनैव वर्णितो वर्तते यत्र तस्य धर्माणां साङ्गोपाङ्गवर्णनमुपलभ्यते।

अयमेवोत्साहो भावः संगरार्थमाकारयति शत्रौ सम्मुखीने जाते रौद्रं रूपं धारयति तथा सर्वनाशाय च त्वरते। रौद्ररसस्थायिनः क्रोधस्य समर्थाभिव्यक्तेरयमेवावसरः। अत्र चित्तं

---

१. अथर्ववेदे, काण्डम् ४, सूक्तम् ३१, मन्त्रः १
२. अथर्ववेदे, काण्डम् ४, सूक्तम् ३१, मन्त्रः १
३. ,, ,, ,, ,,
४. ,, ,, ,, ,,
५. अथर्ववेदे काण्डम् ४, सूक्तम् ३१ मन्त्रः ३
६. अथर्ववेदे काण्डम् ४, सूक्तम् ३१, मन्त्रः २
७. अथर्ववेदे, काण्डम् ४, सूक्तम् ३१, मन्त्रः ५
८. अथर्ववेदे, काण्डम् ४, सूक्तम् ३१, मन्त्रः ३
९. अथर्ववेदे, काण्डम् ४, सूक्तम् ३२, मन्त्रः ४
१०. अथर्ववेदे, काण्डम् ४, सूक्तम् ३२, मन्त्रः ५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कामपि विशिष्टां प्रज्वलितां स्थितिमनुभवति। लोकहिताय वैरनिर्यातनाय शत्रुविनाशाय च रौद्रभावमभिकाङ्क्षमाणो नर एवं प्रार्थयते—अयि क्रोधदैवत! मन्यो! अहं त्वां सश्रद्धमावाहयामि। कालाग्निसदृशो भूत्वा मयि समुत्तिष्ठ। रणाङ्गणे मे सेनानीर्भव। शत्रून् संहर। वैरं निर्यातय—

अग्निरिव मन्यो त्विषितः सहस्व
सेनानीर्नः सहुरे हुत एधि।
हत्वाय शत्रून् विभजस्व वेद
ओजो विमानो निमृधो नुदस्व ॥[1]

मन्युदेवस्योत्साहवतो रौद्रभावसंवलितस्य रूपस्योद्दीप्तये दुन्दुभिसूक्तमपि विशेषं महत्त्वमादधाति। वीररसस्योद्दीपनदृष्ट्यैतत्सूक्तस्याध्ययनं नितान्तमावश्यकम्। उस्रियाभिः संभृतस्य वानस्पत्यस्य[2] दुन्दुभेर्लोमहर्षणं देवोपमं ध्वानं निशम्यैकतः शत्रूणां हृदयानि शोकभयाविद्धानि जायन्ते—( शुचा विध्य हृदयं परेषाम्[3] ), अपरतश्चाहवशोभिनः सत्त्ववन्तः कृतिनो वीरा निजान्यायुधान्युत्तोलयन्ति—( उद्धर्षय सत्त्वनामायुधानि[4] )। यथारण्या मृगाः पुरुषात् संविजन्ते[5] यथा विभ्यन्तोऽजावयो वृकाद् धावन्ति[6] यथा वा श्येनात्पतत्रिणः संविजन्ते तथैवेदं हृद्द्योतनं ध्वानममित्राणि प्रत्रासयति, प्रदावयति तेषां चेतांसि विमोहयति[7] च। सूक्तादस्मान्मन्त्रद्वयमत्र समुद्ध्रियते। सचेतसस्सहृदया एवास्य याथातथ्यमवधारयन्तु यदत्र भयं सञ्जनयन्दुन्दुभि-निस्वनस्तत्परिणामश्च मनीषिणा कविना कियता नैसर्गिकेण प्रभावेण समुपवर्णितः। सपत्नान् दमयन् रणदुन्दुभिरुन्ननाद। तदाकर्ण्य शत्रुहृदयं चकम्पे। हन्यमानाः शत्रवः प्रपलायितुमारेभिरे। रणदुन्दुभिगर्जनेन संत्रस्ताः शत्रुनार्यः पितृविरहितान् क्रन्दतो निजवत्सान् हस्ते धृत्वा प्राणान् संरक्षितुं प्रवृत्ताः—

उच्चैर्घोषो दुन्दुभिः सत्वनायन्
वाचस्पत्यः संभृत उस्रियाभिः।

---

१. अथर्ववेदे काण्डम् ४, सूक्तम् ३१; मन्त्रः २
२ ,, ,, ५, सूक्तम् २१, मन्त्रः ३
३. ,, ,, सूक्तम् २०, मन्त्रः ३
४. ,, ,, ,, मन्त्रः ८
५. ,, ,, सूक्तम् २१ मन्त्रः ४
६. ,, ,, ,, मन्त्रः ५
७. ,, ,, ,, मन्त्रः ६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाचं क्षुणुवानो दमयन्सपत्नान्
सिंह इव जेष्यन्नभिसंस्तनीहि[१] ॥
दुन्दुभेर्वाचं प्रयतां वदन्ती-
माशृण्वती नाथिता घोषबुद्धा ।
नारीपुत्रं धावतु हस्त गृह्याऽ
मित्री भीता समरे वधानाम्[२] ॥

दुन्दुभेरिदं वर्णनमग्रे समुद्ध्रियमाणस्य वर्णनस्वारस्येनातितरां ख्यातिमाप्तवतो वेणी-संहारस्थ-दुन्दुभिवर्णनस्यापेक्षया न कथञ्चिदपि न्यूनतरं प्रतिभाति—

"मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्[३] ॥"

सूक्ष्मेक्षिकया पर्यालोचने कृते ह्यथर्ववेदीयानि मन्यु-दुन्दुभि-युद्धसूक्तानि वीररौद्रभावोप-बृंहितानां काव्यानां मूलस्थानमिति प्रतीयते ।

भावानां सोदाहरणोपन्यासानन्तरमपि प्रसङ्गोऽयं संक्षिप्त विवेचनमपेक्षते । रसानां मूले भावप्रतिष्ठा वर्तत इत्यत्र नास्ति काचिदपि विप्रतिपत्तिर्विपश्चिदपश्चिमानाम् । "न भाव-हीनोऽस्ति रसो न रसो भाववर्जितः[४]" इति हि निरूपितं नाट्याचार्येण भरतेनापि । भावा-श्चारूपभाजोऽमूर्ताः । स्वाभाविक्यां चिन्तनधारायां ते मानवस्य परिपक्वचिन्तनपरिणामरूपा अतएव परमरमणीयाः । चिन्तनमीदृशं मानवः स्वजीवनस्य प्रभाते नासादितवान् । जगतो विकासस्यायं नियमो यन्मानवः प्रथमं मूर्तानेव पदार्थानादाय व्यवहरति । प्रथमं तस्य व्यव-हारसीम्नि नायान्त्यमूर्ताः पदार्थाः । अथर्ववेदतः प्राग् वैदिकसाहित्येऽमूर्तपदार्थानां देवानां स्थितिः विरलैवासीत् । अग्नीन्द्रवरुणयमरुद्रमरुत्पर्जन्यमित्रसूर्योषःप्रभृतयो देवा मूर्तपदार्था एवासन् । शमकामस्मरमन्युमुक्त्यनुमतिप्राणसुखाध्यात्ममातृभूमिवागतिमृत्युरूपा अमूर्तपदार्था

१. अथर्ववेदे काण्डम् ५, सूक्तम् २०, मन्त्रः १
२. ,, ,, ,, मन्त्रः ५
३. वेणीसंहारः १।२२
४. नाट्यशास्त्रम् ६।३६

CC-0. Sampurnanand University Collection. Digitized by eGangotri

देवतास्तु वेदेऽथर्वण्येव संदृश्यन्ते। अमूर्तभावानां मूर्तीकरणप्रक्रियाया विशिष्टोह्यारम्भो वेदादस्मादेव प्रावर्तत। रसभावसम्बद्धा विविधाः प्रसङ्गा ऋग्वेदेऽपि प्राप्यन्ते, परन्तु तेषां तत्र वर्णनं देवविशेषसम्बन्धमुखेनैव कृतं वर्तते। वेदेऽथर्वणि तु समस्तान् भावान् प्रथमं देवरूपेण संप्रतिष्ठाप्य भावमुखेनैव तेषां वर्णनं विहितम्।

अपरश्च वेदत्रयापेक्षयास्मिन्वेदे भावकारणभूतयोर्रागद्वेषयोर्विशदं चित्रमवाप्यते। अत एवाप्यत्र भावमुखेनैव वर्णितानां राग-द्वेष-प्रसूतानां विविधानां भावानां चित्रं बाहुल्येन वरीवर्ति। सर्वेषां भावानां मूले सुखानुशयी रागो दुःखानुशयी द्वेषश्च व्यवस्थितौ स्त इति सर्वतन्त्रसिद्धान्तः। यदा रागः कांश्चन विस्मयावहान् महतो पदार्थान् पूज्यान् शक्तिमतश्च जनानुद्दिश्य प्रधावति तदा श्रद्धाबहुमानपूजाभावाश्च समुदियन्ति। यदा चास्य क्षेत्रे समानवयस्का आत्मतुल्या जना आगच्छन्ति तदायं तान् प्रति प्रणय-सख्य-स्नेह-प्रीत्यादिभावान् जागरयति। यदा चायं हीनानल्पशक्तिमतः कार्यं कर्तुं सर्वथाऽक्षमान् प्रति प्रवर्तते तदा वात्सल्य-दया-करुणाऽनुकम्पाऽनिष्टशङ्काहर्षगर्वानन्दपुलकबाष्पादयो भावा जायन्ते।

एवंविधा त्रिविधा स्थितिर्द्वेषस्यापि वर्तते। यदायं द्वेषः प्रबलशक्तिमतः प्रतीकारं विधातुं सर्वथाऽसमर्थान् जनान् लोकसीमातिवर्तिनः परमविस्मयकरान् पदार्थानाश्रित्य प्रवर्तते तदा दैन्यशोकावेगसन्त्रासग्लानिसाध्वसभयादयो भावा उद्भवन्ति। यदायं समानवयःशक्तिमत्सु संप्रवर्तते तदायं क्रोधोग्रताऽऽवेगमदमोहामर्षादीन् संचारिणो रोमाञ्चवेपथुस्वेदादीन् सात्विकांश्च जनयति। यदास्य क्षेत्रे विकलाङ्गा दुर्बलाश्चापतन्ति तदापमान-मोह-व्याधि-घृणा-जुगुप्सादयो भावा आविर्भवन्ति। अथर्ववेदे सुलभोऽभिचारसम्बन्धिप्रसङ्गस्तस्य नृशंसपरम्परास्तासां क्रौर्येण निर्वाहस्तत्रत्या युद्धापमृत्युमारणोच्चाटनशत्रुनाशादिप्रसङ्गाश्च दुःखानुशयिनो द्वेषस्य, तमाश्रित्य जन्म गृह्णतां शंकासाध्वसभयक्रोधरोषापमानघृणाजुगुप्सादिभावानां समर्थं निदर्शनम्। एत एव भावा रसमूलम्। एतेभ्य एव संहति-परिवृत्तिनियमानुसारेण विविधा भावा रसाश्च जायन्ते। एतेषामेव भावानामथर्ववेदः संग्रहस्थानम्। तत एव ते स्वसम्बद्धभावविभावसामग्रीभिः सह स्वं स्वं रूपं परिगृह्णन्ति। भरतो मुनिस्तथ्यमिदं स्वमनसि निधाय रसानाथर्वणादपीति वचनेन पूर्वोक्तमैतिहासिकं सत्यं समुन्मीलयाञ्चकारेत्यलमियता विहगावलोकनेन।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# पुराणलक्षणसमीक्षा

श्री श्रीकृष्णमणित्रिपाठी, व्याख्याता, पुराणेतिहास-विभागः,
वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी ।

लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमाल्लक्षणज्ञानस्यावश्यकत्वेन किंलक्षणकं पुराणमिति जिज्ञासायां तत्तत्पुराणेषु पुराणलक्षणवर्णनप्रसङ्गे प्रोक्तमस्ति यत् सृष्टिः, प्रलयः, प्रसिद्धराजवंशपरम्परा, मन्वन्तराणि, देवर्षिराजवंशेषु समुत्पन्नानां विशिष्टव्यक्तीनां पावनचरितवर्णनञ्चेति पञ्च विषयाः प्रधानतया यस्मिन् ग्रन्थे विवेचिताः सन्ति तत् पुराणमुच्यते—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥

अत्र सर्गो नाम सृष्टिः = जगत उत्पत्तिः । प्रतिसर्गो नाम दृश्यमानस्य समस्तस्य प्रपञ्चस्य प्रलयः । वंशो विश्वस्योपादानभूतानां तत्त्वानां देवर्षिमनुष्याणां चोत्पत्तिपरम्परा । मन्वन्तरं नाम सृष्ट्यादीनां कालव्यवस्थापनम् । वंशानुचरितं च तत्तद्वंशभवानां मनुष्याणां महर्षीणां च विषये यद् वक्तव्यं तद्विवरणोपस्थापनम् । यथा विष्णुपुराणे प्रथमांशस्य प्रथमेऽध्याये नित्यनियमनिवृत्तं मुनिवरं पराशरं प्रति सर्वशास्त्रतत्त्वज्ञस्य मैत्रेयस्य सप्रणामप्रार्थनायाम्—

यन्मयं च जगद् ब्रह्मन्! यतश्चैतच्चराचरम् ।
लीनमासीद् यथा यत्र लयमेष्यति यत्र च ॥
यत्प्रमाणानि भूतानि देवादीनाञ्च सम्भवम् ।
समुद्रपर्वतानां च संस्थानं च यथा भुवः ॥
सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम ।
देवादीनां तथा वंशान् मनून् मन्वन्तराणि च ॥
कल्पान् कल्पविभागांश्च चातुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपं च युगधर्मांश्च कृत्स्नशः ॥
देवर्षिपार्थिवानां च चरितं यन्महामुने ।
वेदशाखाप्रणयनं यथावद् व्यासकर्तृकम् ॥
धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम् ।
श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वासिष्ठनन्दन ॥

(वि० पु० १।१।५-१०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र भूतानां प्रमाणं देवादीनां सम्भवः, समुद्रपर्वतादीनां भुवः सूर्यादीनां च संस्थानमिति सर्वं सर्गेऽन्तर्भवति, चराचरस्य प्रलयः प्रतिसर्गे, देवादीनां वंशः वंशे, कल्प-कल्पविभाग-युगधर्माश्च मन्वन्तरे, देवर्षिपार्थिवादीनां चरितं वेदशाखाविभागश्चेति सर्वं वंशानुचरितेऽन्तर्भवति।

प्रशस्तं पुराणलक्षणमिदं किञ्चित् पाठभेदेन एकरूपेण वा विष्णुपुराणे ( ३।६।२४ ) मत्स्यपुराणे ( ५३।६४ ) मार्कण्डेयपुराणे ( १३७।१३ ) देवीभागवते ( १।२।१८ ) शिवपुराणस्य वायवीयसंहितायां पूर्वार्द्धे ( १।४१ ) अग्निपुराणे ( १।१४ ) भविष्यपुराणे (२।२५) ब्रह्मवैवर्ते ( १३१।६ ) कूर्मपुराणस्य पूर्वार्द्धे ( १।१२ ) वाराहपुराणे ( २।४ ) गरुडपुराणस्याचारकाण्डे ( २।२८ ) स्कन्दपुराणस्य प्रभासखण्डे ( २।८४ ) ब्रह्माण्डपुराणस्य पूर्वभागे च ( १।३८ ) समुपलभ्यते। अमरसिंहप्रभृतिभिः कोशकारैरपि अदःपुराणलक्षणं तथैवाङ्गीकृतं किन्तु श्रीमद्भागवतस्य द्वितीये स्कन्धे दशमाध्याये पुराणानि दशलक्षणलक्षितानि प्रोक्तानि—

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा॥

( २।१०।१.२ )

श्रीमद्भागवत एतल्लक्षणसमन्वयकारिणां विपश्चितां मतमस्ति यत् श्रीमद्भागवतस्य प्रथमद्वितीयौ स्कन्धावुपोद्घातस्वरूपौ स्तः। अतस्तयोर्द्वयोः स्कन्धयोर्नहि लक्षणसमन्वयो भवितुमर्हति, किन्तु तृतीयस्कन्धतो द्वादशस्कन्धपर्यन्तं दशसु स्कन्धेषु क्रमशो दशानां लक्षणानां भवति समन्वयः। तथाहि—तृतीये स्कन्धे ३३ अध्यायाः सन्ति, तेषु सर्गस्य कारणसृष्टेः तत्त्वानामुत्पत्तिप्रक्रियाया वर्णनं विद्यते। चतुर्थे स्कन्धे ३१ अध्यायाः सन्ति येषु विसर्गस्य कार्यसृष्टेश्चराचरस्य जगतो वर्णनमस्ति। पञ्चमे स्कन्धे २६ अध्यायाः सन्ति, यत्र तृतीयलक्षणस्य स्थानस्य जम्बूद्वीपादीनां स्थितेर्वर्णनं जातमस्ति। षष्ठे स्कन्धे १६ अध्यायाः सन्ति, येषु चतुर्थलक्षणस्यानुग्रहणरूपस्य पोषणस्याऽजामिलादिरक्षायाः पुष्टिः कृतास्ति। सप्तमे १९ अध्यायाः सन्ति, तत्र ऊतेः प्रह्लादहिरण्यकशिपुप्रभृतीनां शुभाशुभकर्मवासनाया उत्कर्षापकर्षौ वर्णितौ स्तः। अष्टमे २४ अध्यायाः सन्ति, तेषु षष्ठलक्षणस्य मन्वन्तरस्य निरूपणमस्ति, नवमे २४ अध्यायाः सन्ति, यत्र १-१३ अध्यायेषु भगवतो विष्णोरनुवर्तिनां सूर्यवंशसमुद्भवानां राज्ञां १४-२४ अध्यायेषु च चन्द्रवंशीयानां च राज्ञां नानाख्यानोपबृंहितकथाद्वारा सप्तमलक्षणस्य ईशानु-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कथायाः प्रामाणिकं विवरणमुपस्थापितमस्ति। दशमे ९० अध्यायाः सन्ति, येषु अष्टमलक्षणस्य निरोधस्य दुष्टानां राज्ञां दैत्यानां च वधस्य विवरणं दत्तमस्ति। एकादशे ३१ अध्यायाः सन्ति, यत्र पुराणनवमलक्षणस्य मुक्तेः स्वस्वरूपेणावस्थितेर्विवेचनं वर्तते। द्वादशस्कन्धे च सन्ति १३ अध्यायाः, येषु दशमस्य पुराणलक्षणस्य आश्रयतत्त्वस्य परमेश्वरस्योपदेशो दत्तोऽस्ति। इदमाश्रयतत्त्वमेव श्रीमद्भागवतस्यास्त्यन्तिमं लक्ष्यम्। अस्यैव विशुद्धये प्राथमिकनवानां लक्षणानामुपादानं कृतमस्ति। अर्थात् मानवजन्मनो वास्तविकलक्ष्यज्ञानाय नवसंख्याकानां लक्षणानां विवरणमुपस्थापितमस्ति। इत्थं सामान्यतया दशानां पुराणलक्षणानां भवति श्रीमद्भागवतस्य दशसु ३-१२ स्कन्धेषु समन्वयः।

अपि च श्रीमद्भागवतस्य द्वादशस्कन्धे सप्तमाध्याये कतिपयशब्दभेदेन भूयो दश लक्षणानीत्थं परिगणितानि सन्ति—

सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च।
वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन्! महदल्पव्यवस्थया॥

(१२।७।९-१०)

(१) सर्गः (२) विसर्गः (३) वृत्तिः (४) रक्षा (५) अन्तराणि (६) वंशः (७) वंशानुचरितम् (८) संस्था (९) हेतुः (१०) अपाश्रयः। एभिर्दशभिर्लक्षणैर्लक्षितं साहित्यं पुराणविद्भिर्विद्वद्भिः पुराणं प्रोच्यते।

येषु पुराणेष्वेषां दशानां लक्षणानां पृथक् पृथग् वर्णनं विद्यते, तानि महापुराणानि कथ्यन्ते। येषु च पञ्चलक्षणस्यास्ति प्राधान्यं तानि लघुपुराणान्युपपुराणानि वा प्रोच्यन्त इति तदर्थः।

द्वितीयस्कन्धे प्रोक्तलक्षणापेक्षया द्वादशस्कन्धीयलक्षणे कियतां पदानां परिवर्तने सत्यप्यर्थे किमपि परिवर्तनं न प्रतीयते। अर्थाद् द्वयोः स्कन्धयोरुपात्तयोर्लक्षणयोर्नामसु भिन्नता त्ववश्यमस्ति, परन्तु तदर्थे न कापि विषमता दृष्टिगोचरीभवति। एवं सत्यपि द्वितीयस्कन्धलक्षणवद् द्वादशस्कन्धे लक्षणानि न क्रमशो निर्दिष्टानि सन्ति, किन्तु द्वादशे लक्षणानि किञ्चिद्व्युत्क्रमेणोपात्तानि सन्ति। यथा (१) सर्गः कारणसृष्टिः तृतीयस्कन्धे (२) विसर्गः कार्यसृष्टिः चतुर्थे (३) वृत्तिर्जम्बूद्वीपादिस्थानानां स्थितिः पञ्चमे (४) रक्षा अजामिलादीनां पालनं षष्ठे (९) हेतुः शुभाशुभकर्मणां वासना। प्रह्लादस्य शुभकर्मवासना हिरण्यकशिपोरशुभकर्म-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वासना सप्तमे, (५) अन्तराणि मन्वादीनां विवरणम् अष्टमे, (६, ७) वंशः, वंशानुचरितं च = सोमसूर्यवंशीयराज्ञां विवरणं नवमे, (८) संस्था नित्य-नैमित्तिक-प्राकृतप्रलयाः = दुष्ट-दैत्यानां वधो दशमे, (८) संस्थाभेदात्यन्तिक-प्रलयरूपा मुक्तिरेकादशे, (१०) अपाश्रयः परमेश्वरतत्त्वनिरूपणं च द्वादशे स्कन्धे जातमस्ति। एवमस्य द्वादशस्कन्धीयलक्षणस्य समन्वयोऽप्यक्रमेण तृतीयतो द्वादशस्कन्धपर्यन्तं (३-१२) दशसु स्कन्धेषु जायते।

एषां दशानां लक्षणं श्रीमद्भागवते यथा—

(१) ईश्वरप्रेरणया गुणत्रयसाम्यावस्थापन्नायां प्रकृतौ क्षोभात् महत्तत्त्वस्याविर्भावो भवति, ततोऽहङ्कारः, तत एकादशेन्द्रियाणि पञ्चतन्मात्राश्च। पञ्चतन्मात्राभ्यः पञ्च महाभूतान्युत्पद्यन्ते, इत्येवं तत्त्वानामुत्पत्तिक्रमः सर्गः प्रोच्यते। तथा हि श्रीमद्भागवते—

अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते॥

—(१२।७।११)

(२) परमात्मनोऽनुग्रहात् सृष्ट्यर्थं सामर्थ्यं प्राप्य ब्रह्मद्वारा पूर्वकर्मानुसारं सदसद्वासनाप्राधान्येन बीजाद्बीजमिव प्रवाहापन्नं यत् चराचरात्मकं जगज्जायते तद् विसर्गः कथ्यते। तथाहि—

पुरुषानुगृहीतानामेतेषां वासनामयः।
विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्॥

—(१२।७।१२)

(३) वृत्तिः प्राणिनां जीवननिर्वाहसामग्री। जीवननिर्वाहार्थं चराणां प्राणिनामचराणि भूतानि वृत्तिः। मानवो जीवननिर्वाहार्थं येषां वस्तूनामुपयोगं विधत्ते तदेव तद्वृत्तिः। मनुष्यैः स्वस्वभावतः स्वेच्छानुसारं काश्चन वृत्तयो निश्चिताः, काश्चन च शास्त्रादेशतो गृहीताः। उभयविधाया वृत्तेरुद्देश्यं मानवजीवनस्थितिसंरक्षणमेवास्ति—

वृत्तिर्भूतानि भूतानां चराणामचराणि च।
कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा॥

—(१२।७।१३)

(४) प्रतियुगमीश्वरः पशुपक्षिमनुष्यर्षिदेवतादिरूपेऽवतीर्य विविधां लीलां विधत्ते, वेदद्विषो निहत्य च धर्मं स्थापयति। तस्यावतारलीला विश्वस्य रक्षार्थमेव भवति। अतो भगवल्लीलेयं रक्षा व्यपदिश्यते—



CC-0. Sampurnanand University Collection. Digitized by eGangotri

रक्षाच्युतोऽवतारेह विश्वस्यानु युगे युगे ।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैः त्रयीद्विषः ॥

—( १२।७।१४ )

( ५ ) मनुः मनुपुत्रा ऋषयो देवता इन्द्रो विष्णेरंशावतारश्चेत्येवंविधाभिः षड्भिर्विशेषताभिर्युक्तः कालो मन्वन्तरमुच्यते । मन्वन्तरेणैव सर्वो व्यवहारो निर्वहति । प्रत्येकमन्वन्तरस्याधिपतिरेकः कश्चन विशिष्टो मनुर्भवति, यस्य सहयोगिनः पञ्चान्येऽपि भवन्ति—

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥

—( १२।७।१५ )

( ६-७ ) ब्रह्मण उत्पन्नानां भूतभविष्यवर्तमानानां राज्ञाम् ऋषीणाञ्च सन्तानपरम्परा वंशः, तेषां वंशधराणां चरित्रचर्चा च वंशानुचरितं कथ्यते—

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।
वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥

—( १२।७।१६ )

( ८ ) संस्था प्रलयः । स्वभावादेव ब्रह्माण्डस्य प्रलयो जायते, स च चतुर्विधः—नैमित्तिकप्रलय-प्राकृतिकप्रलय-नित्यप्रलय-आत्यन्तिकप्रलयभेदात् । तत्त्वज्ञानिभिर्विद्वद्भिः प्रलय एव संस्थेति नाम्ना अभिधीयते—

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ॥

—( १२।७।१७ )

( ९ ) वस्तुतो जीव एव हेतुशब्देन व्यवह्रियते, यतः स एव सर्गविसर्गादीनामस्ति हेतुः । अविद्याविवशो जीवो विविधकर्मकलापेष्वासक्तो भवति । य एवं चैतन्यदृष्ट्या पश्यन्ति ते तमेनमनुशयिनं कथयन्ति, ये चोपाधिदृष्ट्या अवलोकयन्ति ते तमव्याकृतं वदन्ति—

हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ।
यं चानुशयिनं प्राहुरव्याकृतमुतापरे ॥

—( १२।७।१८ )

( १० ) यस्तिसृषु जाग्रत्-स्वप्न-सुषुप्तिष्ववस्थासु ततः परं तुरीयतत्त्वरूपेण ( साक्षिरूपतया ) लक्ष्यते तदेव ब्रह्म अत्र अपाश्रयशब्देन प्रोच्यते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यतिरेकान्वया यस्य जाग्रत्-स्वप्न-सुषुप्तिषु ।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ॥
—( १२।७।१९ )

उभयत्र ध्याने दीयमाने शब्दभेद एव लक्ष्यते, नाभिप्रायभेद उपलभ्यते । द्वितीयस्कन्धे (१) सर्गः, (२) विसर्गः, (३) स्थानम्, (४) पोषणम्, (५) ऊतिः, (६) मन्वन्तरम्, (७) ईशानुकथा, (८) निरोधः, (९) मुक्तिः, (१०) आश्रय इति दश लक्षणान्युक्तानि ।

द्वादशस्कन्धे च (१) सर्गः, (२) विसर्गः, (३) वृत्तिः, (४) रक्षा, (५) अन्तराणि, (६)वंशः, (७) वंशानुचरितम्, (८) निरोधः, (९) हेतुः, (१०) अपाश्रयश्चेति लक्षणानि प्रोक्तानि।

तत्र सर्ग-विसर्गावुभयत्र स्तः समानौ । द्वितीयस्कन्धे निर्दिष्टस्य स्थानशब्दस्य स्थाने द्वादशस्कन्धे वृत्तिपदस्यास्ति प्रयोगः । द्वितीये प्रोक्तमनुग्रहरूपं पोषणं द्वादशे रक्षापदेन प्रोच्यते । द्वितीये प्रयुक्तस्य जीवस्य संसारप्राप्तिहेतुकाविद्याकर्मवासनादिबोधकस्य ऊतिपदस्य स्थाने द्वादशे हेतुपदं प्रयुक्तम् । द्वितीये उल्लिखितस्य मन्वन्तरमित्यस्य स्थाने द्वादशेऽन्तर-पदमुपात्तम् । द्वितीये दर्शितस्य ईशानुकथापदस्य स्थाने द्वादशे वंश-वंशानुचरितपदे प्रयुक्ते । द्वितीये उक्तस्य निरोधस्य स्थाने द्वादशे संस्थापदस्य प्रयोगो जातः, यत्र नित्यप्रलय-नैमित्तिक-प्रलय-प्राकृतिकप्रलया अन्तर्भवन्ति । द्वितीये प्रोक्ता मुक्तिर्द्वादशे प्रोक्तसंस्थाभेदात्यन्तिकप्रलय-पदेन गृह्यते । तथा द्वितीयस्कन्ध उपात्तस्याश्रयस्य स्थाने द्वादशस्कन्धेऽपाश्रयशब्दो व्यपदिष्टः । सर्वमेतन्निम्नाङ्कितेन विवरणेन स्पष्टतमं भवति । तथा हि—

| क्रमः | द्वितीयस्कन्धलक्षणम् | द्वादशस्कन्धलक्षणम् |
|---|---|---|
| १ | सर्गः | सर्गः |
| २ | विसर्गः | विसर्गः |
| ३ | स्थानम् | वृत्तिः |
| ४ | पोषणम् | रक्षा |
| ५ | ऊतिः | हेतुः |
| ६ | मन्वन्तरम् | अन्तरम् |
| ७ | ईशानुकथा | वंश-वंशानुचरिते |
| ८ | निरोधः | संस्था { नित्यप्रलयः, नैमित्तिकप्रलयः, प्राकृतिकप्रलयश्च |

CC-0. Sampurnanand University Collection. Digitized by eGangotri

| | | | |
|---|---|---|---|
| ६ | मुक्तिः | संस्था | आत्यन्तिकप्रलयः |
| १० | आश्रयः | | अपाश्रयः |

एवं श्रीमद्भागवत इव ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डेऽपि महापुराणानि दशलक्षणलक्षितानि सन्ति ।

सृष्टिश्चापि विसृष्टिश्च स्थितिः तेषां च पालनम् ।
कर्मणां वासना वार्ता मनूनां च क्रमेण च ॥
वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।
उत्कीर्तनं हरेरेव देवानां च पृथक् पृथक् ॥
दशाधिकं लक्षणं च महतां परिकीर्तितम् ।
—(१३१ । ८.६½)

एषु सृष्टिः, विसृष्टिः, स्थितिः, पालनम्, कर्मणां वासना, मनूनां वार्ता, प्रलयानां वर्णनम्, मोक्षस्य च निरूपणमित्यष्टावुभयत्र समानान्येव सन्ति । हरेरुत्कीर्तनमित्यस्याश्रयेऽन्तर्भावो जायते, देवानां च पृथक् पृथगित्यस्य ईशानुकथायां वंशानुचरिते वा अन्तर्भावो भवति । इत्येवं शब्दान्तरैः श्रीमद्भागवतस्यैव लक्षणानि ब्रह्मवैवर्तेऽपि प्रोक्तानि सन्ति ।

ननु दशलक्षणस्य पञ्चलक्षणेन विरोधात् कथं तयोः प्रामाण्यमित्येवंस्थितौ कियन्तो विद्वांसो दशलक्षणस्य पञ्चलक्षण एवान्तर्भावं कुर्वन्ति, केचन च महापुराणानि दशलक्षणानि, उपपुराणानि च पञ्चलक्षणानीति मन्यन्ते । तत्र पुराणं पञ्चलक्षणमितिवादिनां विपश्चितां मते श्रीमद्भागवते प्रोक्तानि दशलक्षणानि पुराणान्तरप्रोक्तपञ्चलक्षणस्यास्ति आवश्यकतानुसारं विस्तारमात्रम् । यतो हि श्रीमद्भागवते सर्ग-विसर्ग-वंश-वंशानुचरितमन्वन्तराणि तु शब्दत एव प्रोक्तानि सन्ति । अवशिष्टानामन्येषामप्यन्तर्भाव एष्वेव सम्भवति । तथाहि सर्गोऽस्ति प्रकृतेर्गुणवैषम्याज्जायमाना विराट्सृष्टिः (ब्रह्माण्डस्य समष्टिसृष्टिः), विसर्गश्च ब्रह्माण्डान्तर्वर्तिनां ब्रह्मणो जायमानानां जीवानां व्यष्टिसृष्टिः । परिणामतः सर्गे विसर्गस्यान्तर्भावो नानुचितः । तथा च विसर्गः किल सर्गस्यावान्तरभेदः । एवमाश्रयापाश्रयशब्दाभ्यामुपात्त ईश्वरः सर्गकर्तृत्वेन हेतुः श्रुतिर्वा सर्ग एवान्तर्भवितुमर्हति । प्रतिसर्गे संस्था-निरोधयोरन्तर्भावः । मन्वन्तरेऽन्तरस्यान्तर्भावः । वृत्तिः, स्थानम्, ईशानुकथा, पोषणम्, रक्षा वा वंश-वंशानुचरितयोः स्फुटमन्तर्भवन्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथाहि —

सर्गे— विसर्ग-हेतु-ऊति-आश्रयाणापाश्रयाणामन्तर्भावः ।

प्रतिसर्गे—संस्थानिरोधयोरन्तर्भावः ।

मन्वन्तरे—अन्तरस्यान्तर्भावः ।

वंशवंशानुचरितयोः—वृत्ति-स्थान-रक्षा-पोषण- ईशानुकथानामन्तर्भावः ।

तस्मात् श्रीमद्भागवतीयानि दश लक्षणानि पुराणान्तरोक्तस्य पञ्चलक्षणस्य प्रपञ्चमात्र-मुपबृंहितरूपं वेति स्वीकारे न काऽप्यनुपपत्तिः ।

दशलक्षणं पुराणमिति मन्यमानानां मनीषिणां मते तु यत्र दशलक्षणानां पृथक् पृथग वर्णनं वर्तते तानि महापुराणानि कथ्यन्ते, यत्र च पञ्चानामेव लक्षणानामस्ति प्राधान्यं तान्युप-पुराणानि प्रोच्यन्ते । अत एव ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे प्रथमं पूर्वोक्तं सर्गश्च प्रतिसर्गश्चेत्यादि पञ्चलक्षणमुक्त्वा प्रोक्तं यत्—

एतदुपपुराणानां लक्षणं च विदुर्बुधाः ।

दशलक्षणविवक्षया—

महतां च पुराणानां लक्षणं कथयामि ते ॥

—(१३१७)

श्रीमद्भागवतेऽपि महापुराणोपपुराणानि वक्तुकामनया पुराणविदो विद्वांसो दशभि-र्लक्षणैर्लक्षितानि महापुराणानि वदन्ति । अपरे च पञ्चलक्षणलक्षितं पुराणमिति ब्रुवते । इत्येवं प्रोक्तमस्ति—

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।

केचित् पञ्चविधं प्राहुर्महदल्पव्यवस्थया ॥

—( १२।७।१० )

तथा च दशलक्षणलक्षितानि महापुराणानि पञ्चलक्षणलक्षितानि चोपपुराणानीति तेषामभिप्रायः ।

वस्तुतो न सन्ति पुराणसामान्यस्य दश लक्षणानि, अपित्विमानि सन्ति ब्रह्मवैवर्तस्य, श्रीमद्भागवतस्य च नैजं लक्षणम् । यतो हि भगवत्स्वरूपविवेचनमेवास्ति श्रीमद्भागवतनिर्मा-णस्य प्रधानं कारणम् । अतो दशमस्याश्रयतत्त्वस्य परमेश्वरस्य स्वरूपपरिज्ञानायैवात्र नवानां लक्षणानां विवेचनं कृतमस्ति—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥
--(श्रीमद्भाग० १२।७।२)

तस्मादाश्रयतत्त्वमेवास्ति श्रीमद्भागवतस्यान्तिमं ध्येयम् । तस्यैव यथार्थनिश्चयार्थमन्येषां नवानां लक्षणानामुपादानं कृतमस्ति । यद्यपि पुराणानां प्रतिपाद्यं दशलक्षणं पञ्चलक्षणं वा तत्र तत्र पुराणेषु प्रतिपादितम्, तथापि प्राधान्येन पुराणानां प्रतिपाद्यं जगतस्तन्मूलतत्त्वमस्ति यत्—पुरा अनिति यत्तत् पुराणमिति पुराणशब्दव्युत्पत्त्यनुसारं यत्तत्त्वं दृश्यमानस्य समस्तस्य प्रपञ्चस्य प्रादुर्भावात् पूर्वमपि विद्यते, यत एव च सर्वमिदं विश्वं विजायते । इदमेव तत्त्वम् "सदेव सौम्य इदमग्र आसीत्" इत्यादिना छान्दोग्यश्रुतिरपि निदिशति । पुराणतत्त्वस्यास्य प्रतिपादनादेव तत्प्रतिपादकं वाङ्मयं पुराणशब्देन व्यपदिश्यते । तत्र सर्गादीनां वर्णनं तु नितरां निर्धर्मकतया इदमित्थंभावेन स्पष्टं निरूपयितुमशक्यस्य तस्य तत्त्वस्य प्रतिपादनाय तटस्थलक्षणोपस्थानमात्रफलकमस्ति, यथा—"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्ति अभिसंविशन्ति" इत्यादिवचनैरुपनिषदस्तटस्थलक्षणमुखेन जगतो मूलतत्त्वं वर्णयन्ति, तथैव पुराणान्यपि सर्गादिवर्णनेन तटस्थलक्षणं पुरस्कृत्य मुख्यतया जगतो मूलकारणस्य प्रतिपादन एव पर्यवस्यन्ति । अत एव श्रीमद्भागवते "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्" इति वचनं संगच्छते; दशमश्च तेष्वाश्रय एव, स च श्रीमद्भागवते—

आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥
—(२।१०।७)

समस्तस्य संसारस्योत्पत्तिप्रलययोराधारभूतं तदेव तत्त्वं द्वादशेऽपाश्रयशब्देन लक्षितम् । तद्यथा—

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ॥
—(१२।७।१९)

तस्मात् समग्रस्यास्य विश्वस्य मूलहेतुभूतं दशममपाश्रयतत्त्वमेव सर्वेषां पुराणानां प्रधानतमं प्रतिपाद्यमस्ति । सर्गप्रतिसर्गादिनिरूपणं तु तत्प्रतिपादनोपायतया गौणं प्रतिपाद्यं प्रतीयते । अत एव हरिवंशपुराणीयमिदं पद्यं संगच्छते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते॥

—(२।५६)

कौटिलीयार्थशास्त्रस्य व्याख्यायां जयमङ्गलायामेकमन्यदेव पुराणलक्षणमुपात्तमस्ति। यत्र धर्मविज्ञानमपि पुराणपञ्चलक्षणान्तर्गतमेकं लक्षणं प्रतिपादितमस्ति—

सृष्टि-प्रवृत्ति-संहार-धर्म-मोक्षप्रयोजनम्।
ब्रह्मभिर्विविधैर्गीतं पुराणं पञ्चलक्षणम्॥

—(१।५)

"यद् ब्राह्मणानीतिहासान् पुराणानि कल्पा गाथा नाराशंसीः" इति तैत्तिरीयारण्यकं विवृण्वता भगवता भाष्यकृता 'पुराणानि ब्रह्मादीनि यद्वा देवासुराः संयत्ता आसन्नित्यादयः; इतिहासः—"आत्मा वा इदमेवाग्र आसीत्, नान्यत् किञ्चन मिषदिति सृष्ट्यादिप्रतिपादकानि पुराणानि' इत्युक्तम्। तत्र पुराणशब्दस्य व्याख्यायां सृष्ट्यादिप्रतिपादकानि पुराणानीति वदता भाष्यकारेण सृष्टिप्रवृत्यादिवचनमेव स्मृतमिति स्पष्टं प्रतीयते।

ननु सर्गश्च प्रतिसर्गश्चेत्यादिना पुराणप्रोक्तस्य पुराणलक्षणस्य सृष्टिः प्रवृत्तिरिति जयमङ्गलाकृल्लक्षणेन पार्थक्यप्रतीतेः कथमुभयोः प्रामाण्यमिति वाच्यम्? एकेन केनापि लक्षणेन लक्ष्यसिद्धौ लक्षणान्तरेण तत्र दोषदानस्यानौचित्यात्। नह्येकस्मिन् लक्षणे स्थितेऽन्यानि लक्षणानि न सम्भवन्तीति कश्चनास्ति नियमः। दर्शनशास्त्रे बहूनां लक्षणानां वर्ण्यमानत्वेनानेकलक्षणकरणे न काप्यस्त्यनुपपत्तिः। बहूनां लक्षणानां प्रयोजनं तु सर्वत्र समेषां लक्षणानामप्राप्तौ सत्यां केनचिदेकेनापि लक्ष्यनिर्णयो भवति। अतो दशलक्षणैः पञ्चलक्षणैर्वा न काप्यनुपपत्तिर्भवितुं शक्या, दशलक्षणरहितानामपि पुराणानां पुराणत्वज्ञापनाय पञ्चलक्षणस्यावश्यकत्वात्।

वस्तुतस्तु प्रत्येकं शास्त्राणां मुख्यतया प्रतिपाद्या विषयाः पृथक् पृथग् भवन्ति। अनेकेऽन्यदीयाः प्रासंगिका विषया अपि तत्र तत्रोपतिष्ठन्ते, यथा धर्मशास्त्रे मनुस्मृतौ प्रथमाध्याये सृष्टिप्रक्रिया प्रसंगतः समागता। एवं दर्शनशास्त्रेष्वपि धर्मविषयः प्रासंगिक एवापतति। तथा च तत्तच्छास्त्रस्य लक्षणे क्रियमाणे यो यस्य प्रातिस्विको विषयो भवति स एव तल्लक्षणत्वेन निरूप्यते, न प्रासंगिको विषयो लक्षणकोटौ प्रविष्टो भवति। सर्ग-प्रतिसर्ग-वंशमन्वन्तरवंशानुचरितानीति पञ्चैव पुराणानां सन्ति प्रातिस्विका विषयाः, न तु कर्मादयस्तेषां वेददर्शनोपासनाग्रन्थेषु विस्तरशः प्रतिपादनात्। एवं नास्ति कोऽपि विषयो यः पुराणेषु प्रसंगतो न संगृहीतो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवेत् ! परं सर्वे ते विषयाः पुराणानां लक्षणानि न भवन्ति, अपि तु प्रातिस्विकान्येव सर्ग-प्रतिसर्ग वंश-मन्वन्तर–वंशानुचरितानि लक्षणत्वेन निरूपयितुं समुचितानि। अतस्तान्येव पुराणलक्षणत्वेन निरूपितानि, न धर्मादयः। तस्माद् जयमङ्गलालक्षणे धर्मपदोपादनमनावश्यकं प्रतिभाति। अपि च श्रीमद्भागवते "मन्वन्तराणि सद्धर्मः" (२।१०।४) इत्यादिना मन्वन्तरलक्षणे धर्मस्य प्रतिपादनाद् मन्वन्तरेणैव धर्मस्य गतार्थतासम्भवेन जयमङ्गलालक्षणे धर्मपदप्रवेशोऽनावश्यक एव। पुराणलक्षणान्तर्गतो मन्वन्तरभागः सद्धर्म इत्युक्त्या पुराणानां धर्मप्रतिपादकत्वं स्पष्टम् , यतः श्रीमद्भागवतस्य प्रादुर्भाव एव भागवतान् धर्मान् व्याख्यातुं जातः। अत एव सरस्वत्याः पुनीते तटेऽनुशोचतो भगवतो व्यासस्य वचनं देवर्षेर्नारदस्य महर्षिं व्यासं प्रति प्रतिवचनं च संगच्छते—

किं वा भागवतान् धर्मान् न प्रायेण निरूपिताः।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः॥

—(१।५।२१)

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः॥

—(१।५।६)

तस्माद्धर्मः खलु पुराणस्यास्त्यविभाज्यमङ्गम्। अथापि लक्षणकोटौ तस्य प्रवेशोऽनावश्यक एव। अत एव भगवता व्यासेनापि मन्वन्तरे धर्मस्योपन्यासो न्याय्य उक्त इति संक्षेपः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# विपन्नाशोपयोगि बौद्धदर्शनम्

श्रीवंशीधरत्रिपाठी,
प्रधानाचार्यः, श्री पं० स्वा० ब्र० आदर्श सं० महाविद्यालये, नया बाजार, बस्ती ।

यद्यप्यस्य निबन्धस्य प्रतिपाद्यो विषयो बौद्धदर्शनमस्ति, तथापि यदि बौद्धधर्मस्वरूपस्येह प्रतिपादनं स्यात्तर्हि सामान्यजनतायाः पर्याप्तं हितं भवेदिति मन्यमानोऽहं बौद्धधर्मस्वरूपं प्रतिपाद्य कृतार्थो भवामि । एतद्धि निर्विवादं यद् बौद्धधर्मावलम्बनमन्तरा विविधैः सन्तापकारणैः सन्तप्ते जगतीतले सुखशान्तीनां समागमनं कठिनतरं विद्यते । संसारेऽस्मिन् अनेकप्रकारेषु सम्प्रदायेषु धर्मेषु वा विद्यमानेषु बौद्धधर्म एव ममाऽऽग्रहो विशिष्टं कारणं स्थापयति । सम्पूर्णरूपेण तत्कारण-निरूपणे समयस्यापव्ययः स्यादिति हेतोः केवलमिदमेव संक्षेपेण प्रतिपादयितुं शक्यते यदयं बौद्धधर्मोऽतीव सरलः सर्वजनसुलभश्च । गौतमस्यायं धर्मो द्विविधः, गृहस्थानां कृते, भिक्षूणां कृते च । तत्र गृहस्थधर्म आचारप्रधानः, भिक्षुधर्मश्चाऽन्तःशुद्धिप्रधानः । भिक्षुधर्मे योगमार्गेण निर्वाणप्राप्तिर्निर्दिष्टा । गृहस्थधर्मेण समाजे सदाचारस्य प्रतिष्ठा सर्वत्र शान्तिश्च समीह्यते । बौद्धधर्मेऽपि वैदिकधर्मवत् कर्मफलं, पुनर्जन्म, मोक्षश्चेति सम्मतानि । मोक्षाय ( निर्वाणाय ) गौतमोऽष्टाङ्गिकमार्गं प्रस्तुतवान् । निर्वाणाय स कामानां परित्यागं विशेषमहत्त्वपूर्णं प्रकल्पितवान् । तत्र यज्ञानां महत्त्वं नास्तीति गौतमस्य मुख्या प्रतिज्ञा ।

## तृष्णात्यागः

स्वव्यक्तित्वस्य विकासाय मानवो बाह्यवस्तूनि नापेक्षते । तस्मै प्रयोजनाय ज्ञानप्रकाशे चित्तवृत्तीनां शोधनमावश्यकम् । आधिभौतिकीनां सिद्धीनां भोगविलासानां च पाशाः पुनर्जन्मबन्धं संयोजयन्ति । ते पाशाः दुःखकारणानि भवन्ति । गृहस्थेभ्यः गौतमः कर्मण्यतां निर्दिशति । गौतमानुसारमालस्यस्य भयङ्करफलानि भवन्ति । अलसाः शीघ्रं निर्धना भवन्ति । आलस्यं तु सम्पत्तिनाशस्य द्वारम् । कर्मण्यताया अपूर्वा विलक्षणा च प्रशस्तिर्धम्मपदे विद्यते । तद्यथा—

> यो च वस्ससतं जीवे कुसीतो हीनवीरियो ।
> एकाहं जीवितं सेय्यो विरियमारभतो दल्हं ॥८।१३॥



CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदनुसृत्य सुत्तनिपाते प्रोक्तम्—

धम्मेन माता पितरौ भरेय्य पयोजये धम्मिकं सो वणिजं ।
एवं गिही वत्तयं अप्पमत्तो सयंपमै नाम उपेति देवेऽति ॥

## सामाजिकसुश्लिष्टता

बौद्धधर्मानुसारेण प्रतिनिधिरूपेण मातापितरौ पूर्वदिशा, गुरुर्दक्षिणदिशा, पत्नी पश्चिमदिशा, बन्धुबान्धवा उत्तरदिशा, भृत्याः पातालदिशा, साधवश्च आकाशदिशा सन्ति। सर्वान् प्रतिनिधीन् प्रति सुशीलव्यवहारस्तेषां पूजा भवति । सर्वेषामभ्युदयाय सुखाय च प्रयासः कर्तव्यः। अनेन प्रकारेण कुटुम्बे समाजे च मधुरवातावरणस्य सम्भावना कृता। तदनुसृत्य धम्मपदे निर्दिष्टम्—

यो पाणमति पातेति मुसावादं च भासति ।
लोके अदिन्नं आदिपति परदारं च गच्छति ॥
सुरामेरयपानं च यो नरो अनुयुंजति ।
इधेव मेसो लोकेस्मिं मूलं खनति अत्तनो ॥१८।२।१३॥

मानवीयगौरवस्य मापदण्डो गौतमेन सुष्ठु निर्धारितः—

यम्हि सच्चं च धम्मो च अहिंसा संयमो दमो ।
सवे वन्तमलो धीरो थेरो इति पवुच्चति ॥ धम्मपदे १६-६ ।

त्रिविधयानः—यानस्तु पन्थाः। स त्रिविधो भवति। हीनयानः, प्रत्येकबुद्धयानः, महायानश्च। हीनयानानुसारेण श्रावका व्यक्तिगताभ्युदयाय यतन्ते। साधकास्तु श्रावका एव निर्वाणपथगामिनश्चतुर्विधाः—श्रोत आपन्नाः, सकृदागामिनः, अनागामिनः, अर्हन्तश्च क्रमशः प्रगता भवन्ति। श्रावकोऽर्हन् भूत्वा निर्वाणं लभते। प्रत्येकबुद्धयानस्तेषां महात्मनां भवति ये गुरुं विना निर्वाणपथज्ञानं कृत्वा बोधिं प्राप्नुवन्ति। केवलं स्वकीयं कल्याणं कुर्वते नान्येषाम्। महायानस्तु बोधिसत्त्वयानः सर्वेषां प्राणिनां कल्याणाय भवति। बोधिसत्त्वः सन् पुरुषो लोककल्याणस्यावसरं प्राप्नोति। चरितं तस्य विशेषरूपेणोदारं करुणामयं च भवति।

महायानेन साधको महाकरुणया सर्वेषां प्राणिनां ( कल्याणाय ) निर्वाणाय प्रयत्नं करोति। साधकस्य बोधिप्रस्थानचित्तस्यावस्थानन्तरं दानं शीलं प्रज्ञा वीर्यं क्षान्तिर्ध्यानं च षट् पारमिता व्रतरूपेण धार्यन्ते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## महायानशाखायां पूजाविधानम्

अत्र वन्दनमर्चनं पापदेशनं पुण्यानुमोदनं बुद्धाध्येषणं बुद्धयाचनं बोधिपरिणमनं चास्ति। मूर्तिपूजायाः प्रचलनं च वर्तते। तत्र स्तूप-चैत्यादीनां पूजा पत्र-पुष्प-प्रदीपदानादिभिः क्रियते। तीर्थानि प्रकल्पितानि। तद्यथा—

गौतमस्य जन्मभूमिः, तस्य बोधिस्थानम्, धर्मचक्रप्रवर्तनस्थानम्, महापरिनिर्वाण-स्थानं च। बौद्धधर्मानुयायिनां गृहस्थानामातिथ्यवृत्तिः, तेषां संघपोषणोत्साहश्च कर्तव्य-रूपेण प्रतिष्ठितौ।

## महायानस्य वैशिष्ट्यानि

महायानानुसारेण निर्वाणप्राप्तये भिक्षुजीवनस्य स्वीकरणमपेक्षितं नासीत्। गृहस्थोऽपि बोधिसत्त्वो भूत्वा स्वपरोपकारवृत्त्या निर्वाणलाभाय समर्थो मतः। महायाने प्रतिष्ठिते सति कतिपयभिक्षवः कठोरजीवनवृत्तिमसहमाना विवाहं कृत्वा गृहस्था बभूवुः।

महायाने परोपकाराय कृतं पापमपि समीचीनं मतम्। अनया मान्यतया व्यभिचाराणां विहारे संघे च प्रवेशाय द्वारमनावृतम्। पापमार्जनाय च सरलविधानान्यपि प्रस्तुतानि। निःस-न्देहमेवानेनायोजनेन भिक्षूणामपि पापवृत्तयः समिद्धाः।

महायानानुसारेण तत्रागणितबुद्धा बभूवुः। तद्यथा विष्णोरवताराः पौराणिकधर्मे मता-स्तथैव बुद्धानामवतारा यथाकालं षट्चतुर्विंशतिरनन्ताश्च प्रकल्पिताः। ब्रह्माण्डस्यासंख्येषु लोकेषु बुद्धानामसंख्यत्वं मतम्। ब्राह्मणधर्मवद् महायाने बौद्धधर्मे स्वर्गस्य कल्पना दृश्यते। तत्र सुखावतीति ख्याते स्वर्गे महर्षीणां वासो मतः। अस्य लोकस्याधिपतिरमिताभः सूर्यरूपेण प्रतिष्ठितः। तस्य नामकीर्तनमात्रेण पापानामपि सुगतिः सम्भाविता।

कतिपयबोधिसत्त्वानां मञ्जुश्रीमैत्रेयावलोकितेश्वरादीनां लोकोपकारिता प्रतिष्ठिता। ते मानवान् सत्पथे प्रवर्तयन्ति, शरीरमुक्तात्मनः स्वर्गे गमयन्ति, निर्वाणाय सर्वानेव प्राणिनः प्रोत्साहयन्ति च।

ब्रह्मविष्णुशिवकालीप्रमुखा देवताः परवर्तियुगे उपास्या मताः। अवलोकितेश्वरो विष्णु-रेव मतः। सप्तर्षयोऽपि प्रकल्पिताः। बौद्धधर्मेऽपि सृष्टेर्विकासो वेदान्तानुसारेण प्रतिपादितः। तद्यथा—धर्मकायो ब्रह्म, सम्भोगकाय ईश्वर इति। आदिबुद्धोऽवलोकितेश्वरः सम्भोगकायः। तस्मादेव देवानां ब्रह्मादीनां प्रादुर्भावः प्रकल्पितः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वज्रयानः—वज्रयाने तन्त्रस्य विकासोऽभवत्। तन्त्रे हठयोगस्य प्रतिष्ठा विद्यते। हठशब्दे "ह" इति सूर्य एव दक्षिणनाड्याः, "ठ" इति चन्द्र एव वामनाड्याः प्रतीकम्। इमे नाड्यौ क्रमशः पिङ्गलेडे सुषुम्णां नाडीमभितः वर्तेते। योगिनः सुषुम्णामूर्ध्वमुखीं कर्तुमेव साधनां कुर्वन्ति। अनया साधनया कुण्डलिनी जागर्ति। तया सहस्रारचक्रस्थितशिवस्य रसास्वादो गृह्यते। वज्रयाने योगस्य पतनं दृश्यते। तथा हि तदनुसारेण योगसाधने मन्दिरमदिरामदिराक्षीणामुपयोगः समीहितः। वज्रयाने यमनियमादीनामुपेक्षा कृता।

## बौद्धधर्मस्य ह्रासः

हीनयाने बौद्धधर्मस्य मूलतत्त्वानि सर्वोच्चानि बभूवुः। कालान्तरे महायानयुगे बौद्धधर्मं लोकप्रियं कर्तुमेवाचारविषयकाणि शैथिल्यानि प्रायशः प्रोत्साहितान्येव दृश्यन्ते। ईदृशे भिक्षुसमाजे मनीषिणां प्रादुर्भावो नाभवत्। परिणामतः शनैः शनैर्बौद्धाचार्याणां हतप्रभत्वं प्रचारितमभवत्। अन्यधर्माणामाचार्यैः सह विवादे स्वभावतस्तेषां पराजयोऽभवत्। तन्त्रसम्प्रदाये कामुकतापूर्णं जीवनं सर्वेषां विरोधायासीत्।

बौद्धानां प्रधानप्रतिपक्षिणो वैदिकधर्मावलम्बिनस्तु स्वधर्माणां युगानुरूपत्वाय सफलप्रयत्नान् कृतवन्तः। वैष्णवधर्मे जीवनस्य पवित्रता प्रतिपादिता। सा बौद्धधर्मस्याष्टाङ्गिकमार्गप्रणिहिताद् जीवनवैषम्यादधिकप्रभावपूर्णा बभूव। याज्ञिकहिंसाया विरोधोऽपि कृतः। अस्यां परिस्थितौ प्रारम्भिकयुगे महायाने वैष्णवधर्मस्य कतिपये सिद्धान्ताः स्वीकृताः। कालान्तरे महायानो वैष्णवधर्मे विलीनोऽभूत्। वैष्णवधर्मेऽपि गौतमोऽवतार एव प्रतिष्ठितः। अनेन विधिना शीघ्रमेव बौद्धधर्मावलम्बिनां संख्या भारते स्वल्पाऽभूदिति नाविदितं तत्र सहृदयानां विदुषाम्। भारतीयधर्माणां महानदाद् बौद्धधर्मस्य प्रवाहोऽभवत्। कालान्तरे बौद्धधर्मस्य शाखा विदेशेषु प्रचारिता बभूवुः। अधुनाऽपि तत्र तासां प्रभावो वरीवर्ति। भारतेऽपि बौद्धधर्मः पौराणिकधर्मे विलीनः सन् शाश्वतरूपेण विद्यमानः दृश्यते।

एवं सिंहावलोकनेनेदं दृढं वक्तुं शक्यते यदन्यधर्मापेक्षयाऽयं बौद्धधर्मः सर्वजनसुलभः सर्वथा सरलश्च। अन्येषु धर्मेषु सम्प्रदायेषु च यादृशं काठिन्यं दृश्यते, तदेवैतस्मिन् बौद्धधर्मे नास्ति। अत एव बौद्धधर्मानुयायिनः सर्वथा सुखिनः सन्ति। यदि बौद्धधर्मः संसारे प्रचारितस्स्यात् तर्हि महल्लोकहितं भवेत्। जीवमात्रस्य कल्याणाय बौद्धधर्मस्सर्वैर्ग्राह्य इति।

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# आचार्यमम्मटकृतकाव्य-लक्षणवैशिष्ट्यम्

श्री सुदर्शनमिश्रः, एम० ए०, अनुसन्धाता काशी-हिन्दू-विश्वविद्यालये, वाराणसी

सम्प्रतीतिहासक्रमेण मम्मटभट्टतः पूर्ववर्तिनामाचार्याणां मतान्युपस्थाप्य समालोच्य चाचार्यमम्मटकृतस्य काव्यलक्षणस्य वैशिष्ट्यं प्रतिपाद्यते ।

सर्वेषामाचार्याणां प्राचीनतमस्य भामहस्य काव्यलक्षणमिदम् 'शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा' इति ! तेषामयमभिप्रायः—यस्मिन् काव्येऽर्थानुरूपाः शब्दाः प्रयुक्ता आहोस्विच्छब्दानुरूपा अर्था वर्णिताः, तौ 'शब्दार्थौ सहितौ' इति पदेन विवक्षितौ। इदं लक्षणं यथा प्राचीनं तथा संक्षिप्तमप्यस्ति।

भामहस्यानन्तरं काव्यादर्शस्य निर्मातुर्दण्डिनः स्थानं गण्यते । भामहस्य 'शब्दार्थौ सहितौ काव्यम्' अस्मिन् लक्षणे शब्दार्थमयं शरीरं काव्यस्येति निर्दिष्टम् । ततोऽग्रे ग्रन्थे तदलङ्कारा वर्णिताः । दण्डिनो महाभागस्य 'तैः शरीरं काव्यानामलङ्काराश्च दर्शिताः' इतीयं पङ्क्तिः स्पष्टरूपेण भामहं संकेतयति । भामहकृतलक्षणे 'सहितौ' इति पदस्य न काऽपि व्याख्या प्रदत्तेतीमां न्यूनतामपाकर्तुं दण्डिना प्रयत्तम् । 'शरीरं तावद् इष्टार्थपरिच्छिन्ना पदावली' इदमेव दण्डिनः काव्यलक्षणम् । अनेन प्रकारेण भामहदण्डिभ्यामुभाभ्यां काव्यशरीरस्य, अलङ्काराणाञ्च चिन्ता विहिता, न तु तदात्मविचारः कृतः ।

दण्डिनोऽनन्तरं वामनकृतकाव्यलक्षणं सम्मुखीभवति । वामनेन भामहदण्डिभ्यामुक्ते काव्यशरीरे प्राणप्रतिष्ठापनप्रयत्नः समाचरितः । तेन काव्यशरीरस्य चिन्तामकृत्वा तदात्मसन्धानं सम्पादितम् । 'रीतिरात्मा काव्यस्य' इति तदीयं सिद्धं सूत्रम् । एवं रीतिरेव काव्यस्यात्मा मन्यते स्म । तथा च 'काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कारः' इति सूत्रेषु सौन्दर्याबाधका अलङ्काराः काव्यग्राह्यताया उपादेयतायाश्च प्रयोजका इति मन्यते ।

वामनेन 'रीतिरात्माकाव्यस्य' इत्युक्त्वा 'कः खल्वात्मा काव्यस्य' इत्येको नवीनः प्रश्नः समुत्थापितः । अतस्तदुत्तरवर्तिन आनन्दवर्धनाचार्यस्य सम्मुखे काव्यात्मनो निर्धारणस्य प्रश्नः काव्यप्रश्नः संवृत्तः । रीतयस्तैः काव्यात्मत्वेन न स्वीक्रियन्त इति 'ध्वनिरात्मा काव्यस्य' इति निर्धारितम् । अस्मिन्विषये कैश्चिद् विप्रतिपत्तिरुपस्थापितेत्यतस्तन्निराकरणाय ध्वन्यालोकग्रन्था-वतारः । अनेन प्रकारेणानन्दवर्धनाचार्यमतेन 'ध्वनिरेव काव्यस्य जीवनाधायकं तत्त्वम् । तं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विनाऽभिरामौ शब्दार्थावपि निर्जीवदेह इव त्याज्यौ। ध्वनिरूपात्मनः प्रतिष्ठानन्तरमेव शब्दार्थौ काव्यम्।

पूर्ववर्तिभिराचार्यैः कृतानां काव्यशरीरस्य, आत्मनः, अलंकाराणाञ्च पृष्ठभूमौ राजशेखरेण काव्यपुरुषस्य नातिसुष्पष्टा परिकल्पना कृता। अग्रे च राजशेखरेण काव्यपुरुषकल्पनायां सर्वथा सुष्पष्टं रूपं प्रदत्तम्।

ध्वनिकारेण 'ध्वनिरेव' काव्यस्यात्मा स्वीकृतः। राजशेखरेण तु तस्य निश्चितरूपप्रदानार्थं वस्तुध्वनिम् अलंकारध्वनिञ्च हित्वा केवलो रसः काव्यात्मत्वेन प्रतिज्ञातः।

वक्रोक्तिजीवितकारेण कुन्तकेन सर्वेषां पूर्ववर्तिनामाचार्याणामपेक्षया विस्तरशः स्पष्टरूपेण च काव्यलक्षणं व्यधायि—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥

कुन्तककृतेऽस्मिंल्लक्षणे पूर्ववर्तिसर्वाचार्यकृतानां सर्वेषामेव लक्षणानां सारांशाः प्रायः समागच्छन्ति। कुन्तकेन काव्यलक्षणम् अतिविस्तरेण स्पष्टयितुं प्रयत्तम्।

साहित्यशास्त्रस्येतिहासे यथा वामनो रीतिसिद्धान्ताय, आनन्दवर्द्धनो ध्वनिसिद्धान्ताय, कुन्तको वक्रोक्तिसिद्धान्ताय प्रसिद्धास्तथैव क्षेमेन्द्र औचित्यसिद्धान्ताय प्रथितः। तेनौचित्यमेव काव्यजीवितं स्वीकृतम्। औचित्यविचारचर्चायां तेन लिख्यते—

काव्यस्यालमलङ्कारैः किं मिथ्यागणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते॥
अलङ्कारास्त्वलंकाराः गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्॥

साहित्यदर्पणकारः विश्वनाथः 'रसात्मकं वाक्यं' काव्यरूपेण सम्पादयति। तदनुसारेण 'वाक्यं रसात्मकं काव्यम्' इति लक्षणं कृतम्। राजशेखरेणापि रसः काव्यत्वेन प्रतिज्ञातः। अनया रीत्या विश्वनाथस्य काव्यलक्षणं राजशेखरकृतकाव्यलक्षणस्याऽनुकृतिमात्रमेव भवितुमर्हति।

सर्वेषां पूर्ववर्तिनामाचार्याणां काव्यलक्षणालोचनपूर्वकं मम्मटाचार्याणां काव्यलक्षणवैशिष्ट्यं प्रतिपाद्यते साम्प्रतम्। काव्यप्रकाशकाराणां मम्मटभट्टानां—'तददोषौ शब्दार्थौ सगुणौ अनलंकृती पुनः क्वापि' इति काव्यलक्षणमन्यलक्षणापेक्षया परिष्कृतम्। कुन्तकेन योऽर्थ अनेकाभिः कारिकाभिरुक्तः, मम्मटभट्टैः सोऽर्द्धकारिकया स्पष्टीकृतः। एतदतिरिच्य 'अदोषौ,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सगुणौ', इति पदद्वययोजनापूर्वकं काव्यलक्षणे नवीनो दृष्टिकोणः समुपस्थापितः। काव्यत्वदोषः काव्यगौरवस्य न्यूनीकरणाय अलम्भवति। एतदर्थं मम्मटभट्टैः गुणालङ्काराणां चर्चातः पूर्वं दोष-चर्चा कृता। दुर्जनं प्रथमं वन्दे सज्जनं तदनन्तरमिति।

शरीरस्य संस्कारेऽपि दोषापनयनरूपः संस्कारो विधीयते। तदुत्तरं गुणाधानरूपः संस्कारः। तदनन्तरम् अलंकारादीनाञ्च क्रमो मन्तव्यः। अलंकारादीनामभावेऽपि दोषापनयन-संस्कारस्य, गुणाधानरूपसंस्कारस्य च अपरिहार्यता सर्वविदिता। तदनन्तरं प्रवर्तते किमपि कार्यम्। एतदर्थमेव मम्मटभट्टैः काव्यस्य शरीरभूतशब्दार्थस्य 'अदोषौ, सगुणौ' इति विशेषणाभ्यामेतस्य द्विविधसंस्कारस्य अपरिहार्यता प्रतिपादिता। 'अनलंकृती पुनः क्वापि' इत्युक्त्वा च अलंकारगौणता सूचिता। निष्कर्षतः स्तोकैश्शब्दैर्भावगाम्भीर्यव्यक्तकरणद्वारकं स्वकीयकाव्यलक्षणमाचार्यमूर्द्धन्यैर्मम्मटभट्टैः समनोज्ञं उपादेयञ्च प्रणीतम्।

मम्मटभट्टोत्तरवर्तिना विश्वनाथेन दोषैकदृशा या समालोचना विहिता, तस्याः गुणदोषौ विदुषां पुरस्तात् समुपस्थाप्येते।

काव्यप्रकाशकारेण प्रदत्तस्य काव्यलक्षणरूपेण 'शब्दार्थौ' इत्यस्य 'अदोषौ सगुणौ अनलंकृती पुनः क्वापि' इत्येतानि त्रीण्येव विशेषणानि विश्वनाथेन सर्वथा प्रत्याख्यातानि। प्रथमतः दोषरहितं काव्यं जगति दुष्प्रापम्। अत एव काव्यं 'प्रविरलविषयं निर्विषयं वा स्यात्'। संसारे कदाचित् काव्यं दृष्टिपथं नागमिष्यतीत्यर्थः। एतदतिरिच्य अग्रे—

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥

इत्यादिश्लोकः ध्वनिप्राधान्येनोत्तमकाव्यरूपः। किन्तु तत्राऽपि विधेयाविमर्शदोषस्य विद्यमानत्वेन काव्याभावः। श्लोकस्य अल्पांशे दोषत्वेन न दोष इति चेत्, यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आकृष्यमाण-मिदं काव्यमकाव्यं वा किमपि न स्यात्।

काव्यत्वविघटकच्युतसंस्कारत्वादिप्रबलदोषरहितौ शब्दार्थौ काव्यमिति मम्मटा-चार्याणामाशयः। रसानुभूतिबाधको दोष एव दोषः। यथा दुःश्रवत्वदोषः करुणशृङ्गारादि-कोमलरसानुभूतिबाधक इति स दोषो दोषः। किन्तु वीरबीभत्सभयानकरसेषु तस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दुःश्रवत्वस्य रसानुभूतिसाधकत्वात् तत्र गुणकत्वं न दोषकत्वम् इति रसानुभूतिबाधकप्रबलदोष-रहितौ शब्दार्थौ काव्यमिति ग्रन्थकाराभिप्रायः। पूर्वोक्तश्लोके दुर्बलदोषस्य विद्यमानत्वात् काव्यत्वहानिः। स्वयं साहित्यदर्पणकारेण साधारणदोषस्य विद्यमानत्वेऽपि काव्यत्वं स्वीकृतम्—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः।'

एतादृश्यां दशायां 'काव्यं प्रविरलविषयं निर्विषयं वा किमपि न भवति। तथा च उपर्युक्तश्लोके 'न्यक्कारो' इत्यादौ साधारणविधेयाविमर्शदोषस्य विद्यमानत्वेन काव्यत्वाहानौ विश्वनाथेन यत्खण्डनं कृतं तत्तदीयपाण्डित्यप्रदर्शनमात्रम्।

द्वितीयस्य मम्मटभट्टोक्तस्य 'सगुणौ' इति पदस्य विश्वनाथेन खण्डनं सम्पादितम्। तत्र तदीयोऽयमाशयः—गुणा रसधर्मा इति रसाधिष्ठाना तेषां शब्दार्थयोर्धर्मत्वं न शक्यं वक्तुम्। इति ते शब्दार्थाधिष्ठाना न भवितुमर्हन्ति। एवं सति विशेषणं रसस्यैव भवितुमर्हति न शब्दार्थयोः, इति मम्मटभट्टोक्तं शब्दार्थयोः 'सगुणौ' इति विशेषणम् औचित्यं नावहति।

गुणानां रसधर्मत्वेऽपि गौणरूपेण शब्दार्थानामपि तेषां सम्बन्धः भवितुमर्हति। अष्टमोल्लासे मम्मटाचार्येण गौणवृत्त्या शब्दार्थानां गुणानाञ्च सम्बन्धः सम्पादितः—गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता। तयैव दृष्ट्या काव्यलक्षणे शब्दार्थयोर्विशेषणत्वेन 'सगुणौ' पद-प्रयोगः। अतो विश्वनाथकृतः पंकप्रक्षेपः पाण्डित्यप्रदर्शनमात्रम्।

साहित्यदर्पणकारेण विश्वनाथेन मम्मटभट्टोक्तकाव्यलक्षणगतस्य 'अनलंकृती पुनः क्वापि' इत्यस्योदाहरणत्वेन प्रस्तुते—

१ 'यः कौमारहरः स एव वरस्ता एव चैत्रक्षपाः
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥

इति श्लोके विभावनाविशेषोक्तिरूपम् अलङ्कारद्वयं सुनिर्णीतम्। कारणं विना कार्यवर्णनं विभावना, कारणसत्त्वेऽपि कार्योत्पत्त्यभावे विशेषोक्तिर्नामकालङ्कारः। साहित्यदर्पणकारेणात्र श्लोक उत्कण्ठारूपकार्यस्य वर्णनेऽपि तत्कारणस्याविद्यमानत्वात् विभावनालङ्कारो निश्चितः। एवमेव तद्विपर्यासे सति तत्र विशेषोक्तिरलङ्कारोऽपि भवितुमर्हति। एवमेवोत्कण्ठाभावस्य कारणत्वेऽप्युत्कण्ठाभावरूपकार्यस्याऽविद्यमानत्वेनात्र विशेषोक्तिरलङ्कारोऽपि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यपि विभावना विशेषोक्तिमूलकसन्देहसङ्करालङ्कारो न मम्मटाचार्याणामविदित आसीत्। तथाप्येतेऽलङ्काराः भावमुखेन न वर्तन्त इति ते न स्फुटाः। अतो मम्मटभट्टैः स श्लोकः स्फुटालङ्कारविरहस्योदाहरणरूपेण प्रस्तुतीकृत इति विश्वनाथेन कृतं तदुदाहरण-खण्डनं न समीचीनम्।

'हरो वरः' इत्येवंजातीयकोऽनुप्रासरूपश्शब्दालङ्कारोऽपि प्रकृतश्शृङ्गाररसविरोधिरेफ-वर्णघटितत्वान् नालङ्कारयोग्यतामर्हति।

रसगङ्गाधरकारेण पण्डितराजजगन्नाथेन विशेषणभागस्य खण्डनमकृत्वा 'शब्दार्थौ' इति विशेष्यभागस्य प्रत्याख्यानं कृतम्। तत्र पण्डितराजानामयमर्थः, शब्दार्थयोः—समष्टौ न काव्यत्वस्थितिः। शब्दार्थयोर्व्यष्टावपि पृथक् पृथगपि न काव्यत्वस्थितिः। किन्तु शब्दमात्रा-धिष्ठानमेव काव्यत्वम्। तदुक्तं तैः—

"यत्तु प्राञ्चः 'शब्दार्थौ काव्यम्' इत्याहुस्तत्र विचार्यते—काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तं प्रत्येकपर्याप्तं वा ? नाद्यः, एको न द्वौ, इति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारापत्तेः। न द्वितीयः, एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्तेः। तस्माद्वेदशास्त्र-पुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता।"

फलतः काव्यत्वं न शब्दार्थोभयनिष्ठो धर्मः, अपितु केवलं शब्दनिष्ठो धर्मः, इति पण्डित-राजजगन्नाथस्य सिद्धान्तः। अतस्तैः काव्यलक्षणं कृतम्—'रमणीयार्थप्रतिपादकः शब्दः काव्यमिति।'

परन्तु मम्मटभट्टकृतकाव्यलक्षणस्य खण्डनं तट्टीकाकाराय नागेशभट्टाय मनागपि नारोचत। रसगङ्गाधरटीकायां 'नोचिता' इति प्रतीकमादाय तैरुक्तम्—

"आस्वादव्यञ्जकत्वस्योभयत्राप्यविरोधात्, चमत्कारिबोधजनकज्ञानविषयतावच्छेदक—धर्मत्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वात्, काव्यं पठितम्, काव्यं श्रुतं, काव्यं बुद्धमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्य-वृत्तिः। अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः 'तदधीते तद्वेद' इति सूत्रस्थो भगवान् पतञ्जलिः संगच्छते। लक्षणयान्यतरस्मिन्नपि तत्त्वात् 'एको न द्वौ' इतिवत् न तदापत्तिः। तेन अनुपह-सनीयकाव्यलक्षणं प्रकाशोक्तं निर्बाधमिति।"

तस्यायमाशयः—रसास्वादव्यञ्जकत्वं काव्यत्वप्रयोजकम्। तच्च शब्दार्थयोः समानरूपे-णानुगतम्। काव्यं पठितम्, श्रुतमवगतञ्च इत्येतज्जातीयको व्यवहारोऽपि न दृश्यते। एतेन

७

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दार्थयोरुभयोः काव्यता प्रतीयते, न तु केवलस्य शब्दस्य अर्थस्य वा। काव्यप्रकाशोक्तम् अनुपहसनीयं काव्यनियामकं 'चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मत्वम्' इत्येतज्जातीयकं लक्षणं शब्दार्थयोरुभयोरनुगतं नैकस्मिन्। एतदर्थं व्यासज्यवृत्तिधर्माभिन्नत्वेन काव्यत्वस्वीकारे न काचिद् विप्रतिपत्तिर्भवितुमर्हति। व्यासज्यवृत्तिधर्माभिन्नत्वेन काव्यत्वस्वीकारे सत्येव 'तदधीते तद्वेद' इति पाणिनिसूत्रस्य महाभाष्ये भगवता पतञ्जलिना वेदत्वादिकं व्यासज्यवृत्तिधर्मरूपेण अङ्गीकृतम्। एवं खलु काव्यत्वं प्राधान्यतो व्यासज्यवृत्तिरूपो धर्मः; परन्तु लक्षणया केवले शब्दे केवले ऽर्थेऽपि काव्यत्वमङ्गीकर्तुं शक्यते। एतदर्थं 'एको न द्वौ' इतिवत् श्लोकवाक्यं न काव्यमेतस्य व्यवहारस्य न कोप्यवसरः। फलतः काव्यप्रकाशानुसारेण शब्दार्थयोरुभयोः काव्यत्वस्वीकारे न काऽपि बाधेति नागेशभट्टानामभिप्रायः। न केवलं नागेशभट्टेन, अपितु पण्डितराजजगन्नाथं विहाय प्रायः सर्वैराचार्यैः शब्दार्थौ काव्यमिति स्वीकृतम्।

एवं प्रकारेण शब्दार्थयोरुभयोः काव्यत्वस्य अङ्गीकर्तॄणां मतं बहुजनसमादृतमिति जगन्नाथकृतखण्डनं नोपादेयम्।

अतो निर्बाधरूपेण मम्मटकृतं—तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति लक्षणं सुस्पष्टं सुनिश्चितञ्च।

'काव्यप्रकाशः' मम्मटभट्टानां महती रचनाऽस्ति। काचिदपि रचना कलाश्रमयोश्च आधारिता भवति। मधुमक्षिकाणां विविधेभ्यः पुष्पेभ्यो मधुसंचयनं तच्छ्रमपक्षस्योदाहरणम्। मधुस्थापनार्थं प्रकोष्ठनिर्माणं कलापक्षस्योदाहरणम्। प्रकोष्ठस्य रचना मधुसंचयापेक्षया न्यूना (महत्त्वपूर्णा न) भवति। मधु रसनाम् आह्लादयति, प्रकोष्ठो दृष्टिम्। मम्मटभट्टस्य इयं रचना कलादृष्ट्या श्रमदृष्ट्या च प्रशंसापात्रत्वेन वर्तते। सः सहस्रवर्षेभ्यो दीर्घकालात् विस्तीर्णसाहित्योद्यानस्य सहस्रपुष्पेभ्यो मधुसंचये यच्छ्रममकरोत् तत्तु प्रशंसनीयमेव। परन्तु तत्सार्धमेव स येन प्रकारेण तत्कलात्मकरीत्या समुपस्थापितस्तस्य कलात्मिकां प्रवृत्तिं द्योतयति। काव्यप्रकाशनामके ग्रन्थे दशसंख्याका उल्लासा वर्तन्ते। सम्पूर्णकाव्यप्रकाशः 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति अर्द्धकारिकां परितो भ्रमति। इयं कारिका तु निश्चितमेव सम्पूर्णग्रन्थस्य केन्द्रविन्दुरूपेण विद्यते, यस्मात् काव्यरूपप्रकाशः दिक्षु दिक्षु प्रसरति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# ललितविस्तरस्य पाठसमीक्षणापेक्षा

प्रो० डा० शान्तिभिक्षुशास्त्री, संस्कृतविभागाध्यक्षः, विद्यालङ्कारविश्वविद्यालये, लङ्का

तथागतस्य जन्मकर्मदिव्यताप्रदर्शनमुखेन महायानदर्शनपरं धर्मचक्रं तथागतः प्रवर्तयामासेति ललितविस्तरे निरूपितम्। तथा चाहुः—

अनालयं निष्प्रपञ्चं अनुत्पादमसंभवं।
विविक्तं प्रकृतीशून्यं धर्मचक्रं प्रवर्तितं॥

—( ललितविस्तर, लेफ़मन्न्-संस्करण, पृष्ठ ४३६ )

अयं ग्रन्थो वारद्वयं कृतसंस्करणोऽपि बहुषु स्थलेषु दुर्बोधः। एका दुर्बोधता भोटभाषानुवादसाहाय्येन बहुत्र व्यपसारयितुं शक्यते तदिदं दर्शयितुं केचन पाठाः प्रविविच्यन्ते।

( १ ) ललितविस्तरारम्भ एव भगवान् भिक्षुसहस्रैः सहितो विहरन् वर्ण्यते। तत्र बहूनि भिक्षूणां नामान्यपि सन्ति। तत्र यशोदेव इत्येकं नाम। शब्दं दृष्ट्वा नास्त्यपपाठशंकाप्यत्र। परं भोटभाषान्तरावलोकनेन नाम यशोद इति प्रतीयते। भोटभाषायां शब्दः ग्र ग् स्-स्ब्यिन् ( उच्चारणम् डग्-जिन् ) इति वर्तते तस्यार्थो यशोदः (यशोदाता) इति वर्तते।

( २ ) मायादेव्या विशेषणमस्ति सुमना-वार्षिकी-सुविशुद्धदर्शना (पृष्ठ २७, पंक्ति ७)। नात्रापि भवति काप्यपपाठस्य शंका। भोटानुवादानुसारं तु सुमना-वार्षिकी-विशुद्धदशना इति पाठो भवितव्यः। अयं पाठः समीचीनतरः प्रतिभाति। अयमत्र भोटपाठः—स्न म हि मे तोग् दङ् वर्षिक स्तर् सो शिन् तु नंम् पर दग् प। दन्तोपमानतया सुमना वार्षिकीग्रहणमत्र काव्योचितमेव।

( ३ ) भक्तजनेषु प्रायेण श्रूयमाणमिदं तत्रत्यं पद्यम्—

वन्दितस्त्वं सुरैः सेन्द्रैः ऋषिभिश्चासि पूजितः।
वैद्यं सर्वस्य लोकस्य वन्देऽहमपि त्वां विभो॥

( पृष्ठे १०७, पंक्तिः २१-२२ )

रमणीयोऽयं श्लोकः साधुपाठश्चेति नात्र मन्ये कस्यापि संदेहो भवेत्। परं भोटानुसारमयं पाठो भवेत्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वन्दितस्त्वं सुरैः सर्वैः ऋषिभिश्चासि पूजितः।
चैत्यं सर्वस्य लोकस्य वन्देऽहमपि त्वामिति ॥

अत्रायं भोटपाठ :—

ख्योद् ल ल्ह कुन् फ्यग् छ्ल् शिङ्
द्रङ् सोङ् नंमूस् क्यिस् मृछोद् ग्युर् ते।
ह्जिग् तेंन् कुन् ग्यि मृछोद तेंन पस्
ब्द्ग् क्यङ् ख्योद् ल फ्यग् ह्छल् लो॥

( ४ ) अवतीर्णं शुद्धोदनगृहे भगवन्तं द्रष्टुं गतस्य महर्षेरसितस्य राजभवनप्रवेशवर्णने पद्यमिदम्—

स्थाप्या चासनमस्य चाह नृपतिर्गच्छ प्रवेशं दद
असितः सारथिवाक्यश्रुत्वमुदितः प्रीत्या सुखेनान्वितः ;
शीतं वारि यथाभिकांक्षि तृषितो भुक्त्वादितो चाशनं
तद्वत् सुख्यभिनन्दितो ऋषिवरः तं द्रष्टु सत्त्वोत्तम् ॥
( पृष्ठे १०९ पंक्तिः २१-२२, पृष्ठे ११० पंक्तिः १-२ )

अत्र यद्यपि वागपभ्रष्टा तथापि नार्थबोधे काठिन्यम्। (महर्षेःकृते) आसनं संस्थाप्य, गच्छ अस्य प्रवेशं देहीति नृपतिराह। असितः ( प्रविशेति ) सारथिवाक्यं श्रुत्वा प्रीत्या मुदितः सुखेनान्वितो बभूव। तं सत्त्वोत्तमं द्रष्टुं ( सः ) ऋषिवरः तद्वत् सुखी, अभिनन्दितो बभूव यथा तृषितः शीतं वारि अभिकांक्षी भवति इत्यादि। परं 'भुक्त्वादितो चाशनम्' इति वाक्यं न सुव्याख्यातव्यं भवति यत्नेनापि ? अशनम् आदितो भुक्त्वा-इत्यस्य कोऽर्थः ? भुक्त्वार्दितो, इति पाठान्तरं विचिन्तयितुं प्रेरयति। अत्र भोटभाषान्तरं करोति महत्साहाय्यम्। भोटभाषान्तरानुसारमत्र किमपि वाक्यं भवितव्यं यस्यार्थो भवेत् बुभुक्षया पीडित इति यतस्तत्र वर्तते--ब्क्रेस् पस् गृदुङ्स् प--इति। मन्ये पाठः भुक्तार्दितो इति आसीत्, भुक्ते भोजननिमित्तेन अर्दितः पीडित इत्यर्थः। यथास्थितपाठं भोटभाषानुवादं चानुसरता जनेनैतदेव चिन्तयितुं शक्यम्। स्वतन्त्रं चिन्त्यते चेद् बुभुक्षार्दितशब्दस्यापभ्रंश एवायं भुक्षार्दित इति। भुक्षा इति मन्ये पूर्वं भुक्खा पश्चाद् भुक्का इति बभूव। भुक्का इत्येतं पदं यदा संस्कृते स्थापयितुं यत्नः कृतस् तदा यथार्थमूलस्य विस्मरणेन मूलान्तरं भुक्त्वा इति स्थापितम्। एवमेवार्दितपदं पूर्वं समानादेशनियमेन अद्दितो, पश्चाद् आदितो इति बभूव। आदितो इत्यपभ्रंशोऽस्ति, इति मनसि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निधाय क्वचित् कोषे अर्दितो इति कृतम्। एवं मूलपाठः "भुक्कादितो (=बुभुक्षार्दितः) बभूव, स एव विपर्यीभवन् भुक्त्वादितो इति चरमां विरूपतां बिभर्ति कोषेषु।

(५) जातमात्रं भगवन्तं पूजयितुं प्रेरयति महेश्वरदेवपुत्रो देवान्। तत्रान्यतमा गाथा—

जातस्य तस्य गुणसागरसागरस्य
ज्ञात्वा सुरेश्वरमरुद् ब्रुवते उदग्रः।
यस्या सु दु (र्) ल्लभश्रवो बहुकल्पकोट्या
हन्तेथ तं व्रजम पूजयितुं मुनीन्द्रम्॥

(पृष्ठे ११३, पंक्तिः १६-१८)

स्पष्ट एवार्थोऽत्र। परं गुणसागरसागरस्य इति पाठो व्याकरणदृष्ट्या शुद्धोऽपि न मनस्तोषं जनयति। अत्र भोटानुवचने योन् तन् र्ग्यम् छोहि. फ रोल् फ्यिन् प इति पाठो वर्तते। तदनुसारं पाठः "गुणसागरपारगस्य" इति भवति। अयं पाठः सुपाठः प्रतीयते। गुणसागरसागरस्य-इति तु लेखकप्रमादजः प्रतिभाति।

(६) देवलोकसुखस्य क्षणिकतां दर्शयितुं बोधिसत्त्वस्य गाथा वर्तते--

न तरङ्गतुल्यकल्पाः संगीति च अप्सरोभि संवासः।
अन्योन्यगम [न] युक्ता यथैव सामायि कामं च॥

(पृष्ठे ३७, पंक्तिः ४-५)

इयं गाथा मां क्लेशयामास। पुनः पुनः पठतापि न किमपि मनसि स्फुटत्वं जातम्। अवलोकितो भोटानुवादः। तत्र न तरङ्गतुल्यकल्पाः इत्यस्य योंऽशो न तरङ्ग इति वर्तते स वस्तुतो नटरङ्ग इत्यस्ति। (भोटपाठः गर् ग्यि ल्तद् मो)। तदवलोकनेनैव सामायि इति समाज इत्यस्य विकृतिः प्रतीयते। पठ्यते तत्र स सामाजिकपर्यायः, समाजपर्यायः, समूह-पर्यायो वा। कामम् इति कर्मशब्दस्यापभ्रंशः। एतदपि भोटानुवचनेन स्फुटीभूतं यतस्तत्र ख्रि लस् सु (=आसनकर्म) वर्ततेऽनुवचनम्। एवं पाठपर्यालोचनेन गाथार्थः प्रकाश-मुपयातः—अप्सरोभिः सह संवासस्य संगीतस्य च नटानां रङ्गेण सह सादृश्यमस्ति। सामाजिका आयान्ति नृत्यगीतवादितादि प्रवर्तते। नृत्यगीतादि निरम्यते सामाजिकाः प्रतिगच्छन्ति। तथा च सामाजिकानां नृत्यादिविनोदकार्याणां च परस्परं हेतुहेतुमद्भावो वर्तते। संस्करणकारकैरत्र संदेहोऽपि न कृतः। लिपिकृतामपि नात्र पाठभेदो दृश्यते। परं लिपिकराणां पाठे पदच्छेदो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न भवति, ते तु नतरङ्ग इत्येवं लिखन्ति । शोधकैस्तु न इति पृथक् पदं स्थापितम्, तरङ्ग इति ततः पृथक् कृतम् । सहलेखे तु तकारटकारव्यत्यासो यः सुखोह्योऽभूत् सोऽपि पदविच्छेदेन दुर्गमतां नीतः ।

( ७ ) भारतभूमिं स्वजन्मनालंकरिष्यमाणं भगवन्तं कस्कोऽनुसर्तुमिच्छतीति जिज्ञासायां देवानां गाथा—

को वोत्सहेत वररूपधरं अनुबन्धयितुं सततं प्रीतमनाः ।
कः पुण्य तेज यशसा वचसा स्वयमात्मनेच्छति विबद्धयितुं ॥

( पृष्ठे ४५, पंक्तिः १-२ )

अपभ्रंशः परां काष्ठां गतोऽत्र प्रतिभाति । वः उत्सहेत इत्यनयोः संधिः वोत्सहेत इति । अत्र वा इति विकल्पवाचकं पदं नास्त्येव, यतो भोटभाषान्तरे ख्येद् लस् इति पदं वर्तते युष्माकम् अथवा युष्मत्तः इति तस्यार्थो भवेत् । आत्मनः इच्छति इत्यनयोः संधिः कृत आत्मनेच्छति इति । पुण्य तेज यशसा वचसा इति चत्वारि पदानि द्वितीयैकवचनानि यत इमानि विबद्धयितुम् इत्यस्य कर्माणि सन्ति । तत्रापि भोटानुवादेन प्रतिभाति यद् वचसा इति वाक्पर्यायो नास्ति प्रत्युत वर्चःपर्यायः, यतो न्यस्तं तत्र तोब्स् इति पदम् यद् वर्तते बलस्य शक्तेर्वा पर्यायः । विबद्धयितुम् इत्यपि विवर्धयितुम् इत्यस्यापभ्रंशः, विबद्ढयितुम् इति प्राकृत-मुखेन, यतो भोटानुवचने वर्धनार्थकधातोरेव पदं नंन् पद् स्पेल बट् इति स्थापितं दृश्यते । एवं स्पष्टीभूतेषु पदेषु प्रतीतो भवत्ययमर्थः— युष्माकं मध्ये कः प्रसन्नचित्तो वररूपधरं (बोधि-सत्त्वम्) अनुसर्तुमुत्साहं करोति, को निजं पुण्यं, तेजः, यशः, वर्चश्च विवर्धयितुम् अभिलषति" इति । यत्र पाठो भवति अपभ्रष्टतमस्तत्र भोटभाषान्तरेण पाठनिश्चये यत्साहाय्यं लभ्यते तन्मूल्यं न कथमपि मातुं शक्यते । प्रपञ्चार्थं निदर्शनमन्यदुपन्यस्यते ।

( ८ ) परमलाभिनस्ते, ये जायमानं भगवन्तमवलोकयिष्यन्तीत्यत्र देवानां गाथा—

लाभा सुलब्ध विपुलाः सुरमानुषाणां
द्रक्ष्यन्ति जानु इमु सप्त पदां क्रमन्तं ।
शक्रैश्च ब्रह्मण करैः परिगृह्यमानं
गन्धोदकैः स्नपियमानि सुशुद्धसत्त्वम् ॥

( पृष्ठे ४८, पंक्तिः १-४ )

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र द्रक्ष्यन्ति-इति क्रियापदस्य साहाय्येन जानु इति इमु इति द्वितीयैकवचनानि कर्मपदानि-इति बोद्धुं शक्यम्। शक्रैश्चेति पदसांनिध्येन ब्रह्मण इत्यस्य स्वरूपेण षष्ठयन्तस्यापि तृतीयार्थकताप्यूहितुं शक्या। परिगृह्यमानम् इत्यस्य साहचर्येण स्नपियमानि इत्यपि द्वितीयान्तमेवेति निर्धारयितुं शक्यम्। परं जानु इत्यस्य कोऽर्थः। न हि जातो भगवान् जानुभ्यां सप्त पदानि चचाल। एड्जेर्टन्-महोदयस्तु जानत् इति ज्ञाधातोर्निष्पन्नस्य पदस्य विकृतिं कल्पयति। भोटभाषान्तरानुसारमयं धातुर् जनू इति वर्तते तत एव जन्-धात्वर्थकेणाख्यातेनानुवचनम् बल्तम्स् नस् 'उत्पद्य' इति। एवं जानु इति जायमान इत्यर्थकः शब्दः। प्रकृतिस्तु जन् इति, तस्या नकारोऽत्र लुप्तः कल्पनीयः। अथवा जा इत्यादेशोऽङ्गीकर्तव्यः। प्रत्ययस्तु यथा स्वरूपतः 'आन' इति दृश्यते तथैव स्वीकरणीयम्। प्रसन्नतां गतेषु पदेषु सुखेनार्थः प्रतिभाति—"ये सुशुद्धसत्त्वम् इमं जायमानं, सप्त पदानि क्राम्यन्तं, शक्रैर्ब्रह्मभिश्च करैः परिगृह्यमाणं गन्धोदकैः स्नाप्यमानं च द्रक्ष्यन्ति तेषां देवमनुष्याणां विपुला लाभाः सम्यग् लब्धा भवन्तीति'।

(६) ललितविस्तरे विभक्तिहीनपदस्य स्थापना, लोपजन्यगुरुतां रक्षितुं स्वरदीर्घता च विरूपयतः पदानि। तथाहि, अयम् इति क्वचिद् अय अथवा अयु इत्येवं स्थाप्यते, एतदनुमातुं शक्यते। क्वचिद् अया इत्येवमपि स्थाप्यते। एतदपि नातिदुरूहम्। परं स्वरानन्तरम् आगतम् 'अया' इति पदं मुखसुखार्थं च संधिं न करोमीति विवक्षया च केनापि व्यञ्जनेन युक्तं क्रियते तदा दुरूहता जायते। यथा—अया इति स्वरानन्तरं दया इति पठ्यते चेद् विलम्बेनार्थप्रत्ययो भवेदेव। अत्रापि पद्यं बोधिसत्त्वस्य बोधिसत्त्वमातुश्च वर्णनायां धृतमुदाह्रियते—

यथा च माया प्रतिरूपभाजनं
　　यथार्यसत्त्वः परमं विराजते।
पश्येत एतावधिकं गुणान्विता-
　　दया सुता सा जननी च माया॥

(पृष्ठे २९, पंक्तिः ७-८)

अत्र दया सुता इति अयं सुतः इत्यस्यापभ्रंशः, एकत्रानुस्वारलोपः, अपरत्र विसर्गलोपः। उभयत्रान्त्याक्षरगुरुता स्वरदीर्घतां विधाय रक्षिता। राजेन्द्रलालमित्रसंस्करणेऽत्र बलादेव शोधनमारब्धम्। दया सुता इति दयान्विता इति कृतम्। अत्र भोटानुवादः— ह्दि नि बुर् ह्ग्युर् दे नि म यि होस् 'अयं सुतो भवेत् सा मातोचिता' इति। एतावधिकं इति पाठो लेफ्मन्त्-वैद्यसंस्करणयोर् एवावधिकं—इति वर्तते। भोटानुवचने तु "तौ द्वौ

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथवा एतौ द्वौ" इति पाठः। एतेन मन्ये शुद्धः पाठ एतावधिकं-इत्येव वर्तते। अधिकं गुणान्विता इत्यपि अधिकगुणान्वितौ इत्यस्यापभ्रंशः। पश्येते इति च दृश्येते इत्यस्य।

( १० ) किं बहुना। एड्जेर्टन्महोदयस्य व्याकरणकोशग्रन्थाभ्यामत्र मार्गदर्शनं कृतम्। एवं सत्यपि न तेन मार्गेण संस्करणं ललितविस्तरस्य विद्यते। शुद्धं संस्करणमन्तरा पठनपाठनमनुवादादिकार्यं न संभवति। अत्र शोधन-कर्मणि भोटानुवचनं परमं साहाय्यकरम् इत्यहं चिन्तयामि। सिंहलेषु विद्यालङ्कारेऽस्य ग्रन्थस्य कश्चनांशः पाठविधौ न्यस्तः परं व्याख्यानं यथालब्धमुद्रितग्रन्थमुखेन न संभवति। अत एव किमपि साधनान्तरमपेक्ष्यते स्म तत्र भोटानुवचनं प्रधानम्। भोटानुवचनं तु कदाचिद् विरूपमपि सुरूपयति। ललितविस्तरग्रन्थस्तु पूर्वपूर्वमङ्कुरितानां महायानसिद्धान्तानां विचये परममुपकरणम्। तथा चोक्तम्—

इदं मुने रागनिसूदनाढ्यं
वैपुल्यसूत्रं हि महानिदानं।
यद् भाषितं सर्वतथागतैः प्राग्
लोकस्य सर्वस्य हितार्थमेतत्॥
तत् साध्विदानीमपि भाषतो मुनिः
स बोधिसत्त्वौघ परिग्रहेच्छया।
परं महायानमिदं प्रभाषयन्
परं प्रवादन्नमुचिं च धर्षयन्॥

( पृष्ठे ७ पंक्तिः ६-१२ )

इमे गाथे सरले। तथापि भाषतो मुनिः इत्यत्र संदेहो भवन्न वार्यते। भाषतु मुनिः इत्यपभ्रंशस्यैवायम् अपभ्रंशतरः। उकारगुणता नान्यथा सिद्ध्यति। भोटानुवचने पदं ब् शद् ह्रु ग् सोल् 'उपदिशतु' इति वर्तते। एतेनार्थबोधे सहायता भवत्येव—

ललितमिदमपूर्वं यच्चरित्रं कृपालोर्
विदधदतिपवित्रं लक्षणभ्रंशबन्धम्।
तदिह भवतु बोध्यं येन यत्नं तमेतं
कुरु मम बुधसंघप्रेमबन्धैरबन्ध्यम्॥

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# विश्वतत्त्वप्रकाशकः स्याद्वादः

श्रीदयाचन्द्रः, साहित्याचार्यः, श्रीगणेशदिगम्बरजैनसंस्कृतमहाविद्यालये, सागर

विश्वदर्शनेषु प्राचीनभारतीयस्य जैनदर्शनस्यास्तित्वं पूर्वैतिहासपुराणपुरातत्त्वैः प्रसिद्धमिति भारतीयैर्वैदेशिकैश्च साहित्यिकैः स्वीकृतं यो द्रव्यभावकर्मशत्रून् जयति स जिनः, जिनेन प्रणीतो धर्म इति जैनधर्मः । अथवा जिनो देवता येषामिति जैनाः, जैनानां धर्म इति जैनधर्मो जैनदर्शनं वा । अहिंसा, स्याद्वादः, कर्मवादो द्रव्यवादोऽध्यात्मवाद इति जैनदर्शनस्य मौलिकसिद्धान्तः । तेषु द्योतते स्याद्वाददिवाकरो जैनदर्शनस्य नेत्रात्मकोऽद्वितीयो विश्वतत्त्वप्रकाशको वस्तुतत्त्वप्रदर्शकः प्रधानः सिद्धान्तः । अयं खलु जैनदर्शनभवनस्याधारशिक्षारूपत्वेन स्वसत्तां स्थापयति । विश्वशान्तिप्रदस्याहिंसाधर्मस्य प्रतिष्ठायै दार्शनिकलोके जैनदर्शनेन प्रदत्तोऽयमपूर्वः स्याद्वादो विद्यते सर्वलोकाय महती दत्तिः । सत्यासत्यनिर्णायकः समन्वय ( विश्वसन्धिर्मैत्री वा ) विधायकोऽयं हि मिथ्याज्ञानतिमिरं दिवाकर इव सापेक्षनयप्रमाणकिरणैः स्वभावत्वेनैव निवारयति । न च भवति तेन विना लोके विश्वतत्त्वालोकः ।

## स्याद्वादस्योदयः

विद्यते खलु जैनदर्शनस्य मान्यता—यत्स्कन्धाणुरूपं लघुदीर्घकायं स्थूलं सूक्ष्ममपि वस्तु ( द्रव्यं ) स्वमर्यादायामनन्तधर्मविशिष्टं युक्तिप्रमाणैः स्वानुभवेन च सिद्धम् । यथा कदलीफले रूपं रसो गन्धः स्पर्शः स्थूलाकृतिर्गुरुत्वम् अस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वमगुरुलघुत्वं प्रदेशवत्त्वं क्षुधातृषापित्तशान्तिकरत्वमित्यादयो गुणाः, रुग्णस्य बाधावर्धकत्वं कासकफवर्धकत्वमित्यादयो दोषाश्च सन्ति । एकं हि विशुद्धज्ञानं तान् विविधधर्मान् युगपज् ज्ञातुं शक्नोति, परमेकस्मिन् काल एकः शब्दो वस्तुन एकमेव धर्मं गुणं वैकदेशत्वेन वक्तुं समर्थो न तु सर्वधर्मान्, यथा नारिङ्गफले मधुरत्वकथनं गन्धत्वादिकथनं वा क्रमशः । दृश्यते च लोके यद् वक्तारः समये समये स्वस्वदृष्टिकोणैर्विवक्षितवस्तुगुणकथनाय शब्दप्रयोगं कुर्वन्ति । न तु ते वस्तूनां विविधगुणवर्णने युगपत्समर्थाः, यतश्च नेदृशी शक्तिः शब्देषु । अतः क्रमशो विवक्षितवस्तुगुणकथने वक्तुः, तद्गुणपरिज्ञाने च श्रोतुः समीहितकार्यसिद्धये स्याद्वादपद्धतेर्भवत्येव महत्यावश्यकता ।



CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च—स्याद्वादेनानेकान्तसिद्धिर्भवति। सदसदादिरूपस्य द्रव्यस्य परस्परविरुद्धधर्मद्वयस्य विवक्षावशात् परस्परसापेक्षकथनं स्याद्वादमाध्यमेनैव लोके कार्यकारि भवति, तेनैव च द्रव्यस्य क्रमशः पूर्णतया तत्त्वज्ञानं भवति। अत एव स्याद्वादस्योपयोगः परमावश्यकः।

किञ्च—वस्तुतत्त्वज्ञानमन्तरेण मानसिकवाचनिककायिकरूपाया अहिंसायाः सिद्धिर्न भवति। वस्तुतत्त्वज्ञानं च सकलं भवत्यनेकान्तदर्शनेन। अनेकान्तस्य प्रयोगः सिद्धिश्च स्याद्वादशैल्या जायते, अनेन कारणेनापि स्याद्वादशैली महत्त्वपूर्णा सिद्धा। "आवश्यकताऽऽविष्कारस्य जननी भवति" इति न्यायेन तीर्थङ्करमहापुरुषैस्तत्पूर्तये स्याद्वादस्याविष्कारो विहितः, अर्थात् क्रमिकस्वदिव्योपदेशेन प्रकटीकृतः।

## स्याद्वादस्य रूपरेखा

कथंचित्कथनरूपः स्याद्वादः। अर्थाद् अनन्तगुणात्मके द्रव्ये स्यात् = अपेक्षावशात् स्वमर्यादायां कस्यचिदेकगुणस्य मुख्यकथनमितरगुणानां च गौणत्वध्वनिः स्याद्वादोऽनेकान्तवादो वा। जैनदार्शनिकैः स्याद्वादस्य व्याख्या विविधशब्दरीत्या विहिता। तथा हि—"अनेकान्तात्मकार्थकथनं स्याद्वादः" इति ( लघीयस्त्रये भट्टाकलङ्कदेवः )।

विधेयमीप्सितार्थाङ्गं प्रतिषेध्याविरोधि यत्।
तथैवादेयहेयत्वमिति स्याद्वादसंस्थितिः॥

( आप्तमीमांसा, का० ११३ )

अर्थात्—अनेकान्तात्मनि वस्तुनि विधेयप्रतिषेध्यरूपस्य परस्परविरोधिधर्मद्वयस्यापेक्षाभेदात् कथनम्, सिद्धिः, आदेयहेयत्वम्, मुख्यगौणत्वव्यवस्था वा स्याद्वादः। यथा चैकः पुरुषः स्वजनकापेक्षया पुत्रः, स्वपुत्रापेक्षया पिता, स्वमातुलापेक्षातो भागिनेयः, स्वभागिनेयापेक्षातश्च मातुल इति प्रयोजनवशादनेकधर्मविशिष्टः, तथैव ग्रन्थनामक एकस्मिन् वस्तुनि द्रव्यार्थिकनयापेक्षया नित्यत्वम्, पर्यायार्थिकनयापेक्षया चानित्यत्वमिति धर्मद्वयसिद्धिः। किञ्च—स्वपुद्गलत्वादिगुणापेक्षया वस्त्रस्य नित्यता, पर्यायपरिवर्तनापेक्षया च तस्यैवानित्यतेति धर्मद्वयसिद्धिः। किञ्च—पर्यायस्योत्पादविनाशाभ्यां कलशस्य क्षणिकत्वम्, अस्तित्वपुद्गलत्वाद्यपेक्षया च ध्रौव्यमिति सत्स्वरूपस्य द्रव्यस्य विरुद्धानन्तधर्माणां सत्ता सिद्धा, "सद्द्रव्यलक्षणम्, उत्पादव्ययध्रौव्ययुक्तं सत्" इति वचनात्।

( तत्त्वार्थसूत्रे अ. ५ सूत्रम् २९–३० )

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विधिर्निषेधश्च कथञ्चिदिष्टौ विवक्षया मुख्यगुणव्यवस्था ।
इति प्रणीतिः सुमतेस्तवेयं मतिप्रवेकः स्तुवतोऽस्तु नाथ ॥

( बृहत्स्वयम्भूस्तोत्रे समन्तभद्राचार्यः श्लो० २५ )

"ननु इदमेव विरुद्धं तदेव नित्यं तदेवानित्यमिति ! नैतद्विरुद्धम्, कुतः 'अर्पितानर्पितसिद्धेः' अ. ५ सूत्रम् ३२। अनेकान्तात्मकस्य वस्तुनः प्रयोजनवशाद्यस्य कस्यचिद्धर्मस्य विवक्षया प्रापितं प्राधान्यमर्पितम्, तद्विपरीतमनर्पितम्, ताभ्यां वस्तुनोऽनेकगुणत्वसिद्धेर्नास्ति विरोधः" इति ।

( सर्वार्थसिद्धौ पूज्यपादाचार्यः पृ. १९४ )

एवं हि द्रव्यस्य स्याद्वादेन नित्यानित्य-एकत्वानेकत्व-सामान्यविशेष-सदसत्-मूर्तत्वामूर्तत्व-भिन्नत्वाभिन्नत्त्वेत्यादिधर्मा अनन्ताः सिद्धाः ।

किञ्चानेकान्तस्य सिद्धिः प्रमाणनयाभ्यां भवति, अतोऽनेकान्तोऽप्यनेकप्रकारो भवति, नत्वेकप्रकारः, यथा सप्तभङ्गरूपः, उत्पादव्ययध्रौव्यात्मकः, गुणपर्ययवद्रूपः, सद्रूपः, सामान्यविशेषरूपो वा । तदुक्तं समन्तभद्राचार्येण—

अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः ।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात् ॥

( बृ. स्वयंभूस्तोत्रे श्लो. १०३ )

अतः प्रमाणापेक्षया अनेकान्तः, नयापेक्षया चैकान्तः सिद्धयतीति भावः ।

## अनेकान्तवादः स्याद्वादो वा

जैनदर्शनग्रन्थेषु स्याद्वादोऽनेकान्तवाद इति शब्दद्वयं दृश्यते । तयोरर्थभेदोऽस्ति न वेति विचार्यते—सामान्यसिद्धान्तापेक्षया द्रव्यानन्तशक्तिसिद्धिरूपलक्ष्यत्वेन वा स्याद्वादानेकान्तवादयोर्नास्ति वाच्यभेदः, ताभ्यामेव द्रव्यस्यानेकधर्माणां व्यक्तिः सिद्धिश्च भवति । दर्शनग्रन्थेषु धर्मग्रन्थेषु वा प्रायोऽनेकान्तपदेन स्याद्वादस्य, स्याद्वादपदेनानेकान्तस्य च ग्रहणं स्वीकृतम् । तथा हि पुरुषार्थसिद्धये श्रीमदमृतचन्द्रसूरिणा प्रोक्तम्—

"सकलनयविलसितानां विरोधमथनं नमाम्यनेकान्तम्" इत्यत्रानेकान्तपदेन टीकायां स्याद्वादस्यापि कथनम् । अपि च—

बन्धश्च मोक्षश्च तयोश्च हेतुर्बद्धश्च मुक्तश्च फलं च मुक्तेः ।
स्याद्वादिनो नाथ तथैव युक्तं नैकान्तदृष्टेस्त्वमतोऽसि शास्ता ॥

( बृहत्स्वयम्भूस्तोत्रे श्लोकः १४ )

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रापि स्याद्वादिनस्तीर्थंकरस्यैकान्तदृष्टिनिषेधादनेकान्तदृष्टेः समर्थनम् अभेदेन कृतम्। शब्दार्थविशेषापेक्षया तयोर्भेदो दृश्यते। तथाहि—अनेक + अन्तः = धर्मः, तस्य वादः = कथनमित्यनेकान्तवादः = अनन्तशक्तिमान्यता परस्परविरोधिधर्मद्वयस्य मान्यता वा। स्यात् = कथंचित्, वादः = कथनमिति स्याद्वादः। अर्थात् कथंचित् क्रमशो वस्तुनो विविधगुणकथनं शब्दप्रयोगशैली वा। अत्रानेकान्त-स्याद्वादयोर्वाच्यवाचकसम्बन्धः। अपि च अनेकान्तवादः साध्यो लक्ष्यो वाच्यो विधेयस्तत्त्वरूपः प्रमाणात्मको विज्ञानरूपो निश्चयरूपश्च कथ्यते। स्याद्वादस्तु साधको निर्देशको वाचकः साधको नयरूपः प्रयोगात्मको वचनात्मको व्यवहाररूपश्च निगद्यते। किञ्च अनेकान्तवादेन मानसिकविचारशुद्धिः, स्याद्वादेन च वाचनिकशुद्धिर्नियमेन भवतीति द्वयोरन्तरं सिद्धम्। अत्र तु स्याद्वादानेकान्तवादयोरभेदविवक्षा ज्ञातव्या।

## सप्तभङ्गात्मकः स्याद्वादः

सोऽयं स्याद्वादः सप्तविधप्रक्रियामाध्यमेनानेकान्तात्मकं द्रव्यस्वरूपं निरूपयति। आपेक्षिकधर्मकथनाय, वचने सत्यान्वेषणाय विश्वसमता (समन्वय) विधानाय च स्याद्वादशैली प्रशस्ता, सा च सप्तविधा, या सप्तभङ्गीति भाष्यते ( Seven aspects ), तस्याः रूपरेखा दार्शनिकाचार्यैः कथिता—"प्रश्नवशादेकस्मिन् वस्तुन्यविरोधेन विधिप्रतिषेधविकल्पना सप्तभङ्गी" इति।

( तत्त्वार्थराजवार्तिके अ. १ सूत्रम् ६ )

अर्थात्—एकस्य द्रव्यस्याविरोधेनैकस्य धर्मस्य विधिप्रतिषेधात्मकं वर्णनं सप्तप्रकारैर्जायते। यथा मधुराम्लतिक्तानां त्रयाणां रसानां सप्तप्रकारा आस्वादा भवन्ति (१-१-१-२-२-२-३), तथैव अस्तित्वधर्मापेक्षया अस्ति-नास्ति-अवक्तव्यमिति मूलभङ्गत्रयेण सप्तभङ्गा भवन्ति। एवमेकस्य द्रव्यस्यानन्तधर्माणां कथनं विधिप्रतिषेधावक्तव्यरूपत्वेन सप्तविधं भवति। अत एव द्रव्यमनन्तधर्माधारं सिद्धं विद्यते। तथाहि—(१) स्यादस्ति पुस्तकम्-स्वद्रव्यक्षेत्रकालभावापेक्षया। (२) स्यान्नास्ति पुस्तकम्—परवस्तुनो घटप्रदीपादिकस्य द्रव्यक्षेत्रकालभावापेक्षया। (३) स्यादस्ति नास्ति पुस्तकम्–स्वद्रव्यपरद्रव्यक्षेत्रादीनां क्रमिकविवक्षयोभयात्मकम्। (४) स्यादवक्तव्यं पुस्तकम्—पुस्तकस्यानन्तधर्माणामस्तिनास्तिरूपधर्मयोर्वा युगपत् शब्दैः कथनायोग्यत्वादवक्तव्यम्। (५) स्यादस्ति पुस्तकं वक्तव्यम् —यद्यपि स्वद्रव्याद्यपेक्षया तदस्ति तथापि तस्यानन्तगुणानां युगपत् शब्दैर्वर्णनं न भवितुमर्हति, अथवा पूर्णकथनमेकगुणस्यापि न वक्तुं शक्यम्। (६) स्यान्नास्ति पुस्तकमवक्तव्यम्—यद्यपि भिन्नद्रव्याद्यपेक्षया नास्ति तत्, तथापि पुस्तकस्य निषेधरूपधर्माणामेकधर्मस्य वा शब्दैर्युगपद् वर्णनमशक्यम्। (७) स्यादस्ति नास्ति पुस्तकमवक्तव्यम्—यद्यपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वपरद्रव्याद्यपेक्षातो वस्तुपुस्तकमुभयरूपम्, तथापि क्रमिकविवक्षया पुस्तकस्यानेकगुणानां द्वयोर्वा युगपद् स्पष्टत्वं वक्तुमशक्यमिति सप्तप्रकारैः सर्वेषां वस्तूनामनन्तधर्माणां वर्णनं विवक्षितगुण-व्यवहारश्च भवति। वस्तुस्वरूपे ज्ञानिनां जिज्ञासा सप्तविधा संजायते, अतस्तत्समाधानाय भङ्गा अपि सप्तसंख्यका नाधिका न न्यूनाः। किञ्च—अस्ति-नास्ति-अवक्तव्यमिति मूलभङ्गत्रयस्य सप्तैव प्रकारा अपुनरुक्ता भवन्ति, स्वभावतो न ततो न्यूनाधिकाः। अतः स्याद्वादस्य शैली सप्तविधैव निर्दोषेति। उक्तं च—

स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधिः।
सप्तभङ्गनयापेक्षो　　हेयादेयविशेषकः॥
(आप्तमीमांसा, श्लो. १०४)

## स्यान्निपातस्य व्याख्या

संस्कृतव्याकरणे तिङन्तप्रतिरूपकः स्यादिति निपातः क्रियारूपो ऽव्ययरूपश्च। स निश्चितविवक्षावाचकः, तस्य कथंचिदिति पर्यायः। तस्यार्थः—निश्चितविवक्षा-अपेक्षा, दृष्टिकोणः-नयरूपो लक्ष्यांशरूपो गुणांशरूपो वा। स्यद्-त्पदस्य संभव-कदाचित्-सन्देह-अनुमान अनिश्चय इति शायद इति च लोकप्रचलितार्था उपयुक्ता न भवन्ति, निश्चयज्ञानोत्पादकत्वाभावात्। प्राकृतभाषायां पालिभाषायां च 'स्यात्' निपातस्य 'सिया' इति प्रयोगो भवति। यो वस्तुनो निश्चितविवक्षितभेदस्य वाचकः, अविवक्षितभेदस्य च द्योतकः प्रसिद्धः। यथा बौद्धग्रन्थस्य मज्झिमनिकायस्य महाराहुलोवादसुत्ते कथितम्—"कतमा च राहुलआपो धातु? आपो धातु सिया अज्झत्तिकासिया बाहिरा" अर्थात्—जलधातु कतिविधं? उत्तरं—जलधातु स्यादभ्यन्तरं स्याद्बाह्यमिति द्विविधम्। अत्र खलु स्यादभ्यन्तरमित्यत्र स्यात्पदं निश्चितभेदस्याभ्यन्तरस्य वाचकम्, द्वितीयस्य च बाह्यभेदस्य द्योतकम्। एवं हि स्यात्पुस्तकमस्तीत्यत्र स्यात्पदं निश्चित-सापेक्षगुणस्यास्तित्वस्य वाचकम्, द्वितीयादिनिरपेक्षगुणानां च द्योतकं (सूचकं) भवति। "द्योतकाश्च भवन्ति निपाताः" इत्यत्र च "शब्दाद् वाचकाश्च" इति व्याख्यानात् (सप्तभङ्गी-तरङ्गिणी पृ. २३)। अतो निश्चितविवक्षितगुणांशस्य वाचकत्वात् सिद्धं सार्थक्यं स्यात्पदस्य। एतेन सुनिश्चितमिदं यद् वस्तुनोऽनन्तगुणानां कथनं शब्दैर्युगपद् न जायते, अपि तु क्रमिकतया विवक्षितकाले विवक्षितगुणस्यैव कथनं स्यान्निपातेन सूचितं भवति। उक्तं च—

स्याच्छब्दादप्यनेकान्तसामान्यस्यावबोधने।
शब्दान्तरप्रयोगोऽत्र　　विशेषप्रतिपत्तये॥
(सप्तभङ्गीतरङ्गिणी, पृ. ३०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## दर्शनानां समन्वये स्याद्वादः

लोके हि दर्शनस्याविष्कारः सिद्धान्तानां प्रतिष्ठायै भवति। सिद्धान्तैश्च लोककल्याणं संजायते। अतो दर्शनानां परमलक्ष्यमपि लोककल्याणं प्रसिद्धम्। लोके राष्ट्रेषु वा दर्शनानां सिद्धान्तानां विविधविचाराणां च विवादो द्रोहः, तत्समर्थकानां मानवानां च पारस्परिकप्रतिक्रिया प्रायोऽभूत्, भवति च। अनेन दूषितवातावरणेन दर्शनानां लोकहितात्मकलक्ष्यपूर्तिर्न भवितुमर्हति। अतो दर्शनानां विचाराणां च समन्वयस्यावश्यकता। यथार्थवस्तुतत्त्वज्ञानमन्तरेण दर्शनसमन्वयो दुःसाध्यः। यथार्थवस्तुविज्ञानं च स्याद्वादशैलीमाध्यमेन व्यक्तं भवति। अतः स्याद्वादो दर्शनसमन्वयस्य मूलहेतुः।

एकान्तवादेन दुराग्रहेण च पारस्परिकविवादः प्रतिक्रिया च भवति। यथा नित्यैकान्तवादिनः सांख्याः क्षणिकैकान्तवादिनो बौद्धान् तिरस्कुर्वन्ति, बौद्धाश्च नित्यैकान्तवादिनस्तिरस्कुर्वन्ति। स्याद्वादिनस्तु नयबलेन विवक्षाबलेन वा उभयोः स्थितिकरणं मित्रतां वा कुर्वन्ति। तथाहि—द्रव्यापेक्षयाद्रव्यार्थिकनयेन वा वस्तुनो नित्यत्वम्, उत्पादव्ययापेक्षया चानित्यत्वं सुवर्णकुण्डलवत्। मानसिकसाम्यभावाय मतावेशतापनिवारकाय चानेकान्तात्मकं वस्तुविज्ञानं शीतलं भैषज्यं विद्यते।

किञ्च—सत्यानेकान्तविज्ञानेन सिद्धान्तानां विचाराणां वा क्षणिकं समीकरणं शिथिलश्रद्धानं वा न संजायते। अपि तु वस्तुस्वरूपाश्रयेण सत्यविज्ञानहेतुकः स्थायी समन्वयो मैत्री वा प्रभवति। स्याद्वादशैलीतो वचनशुद्धिः, अनेकान्तदर्शनतो विचारनैर्मल्यं, ताभ्यां च साम्प्रदायिकद्वेषाभावरूपस्य समीकरणस्य भावना जागृता भवति।

अपि च—ऋषभदेवादितीर्थङ्करैः प्राचीनाचार्यैश्च स्याद्वादमाध्यमेन भाषाशक्तित्वं भाषासौन्दर्यं च दर्शयित्वा, अनेकान्तमाध्यमेन च निष्पक्षतां (वीतरागतां) समुपदिश्य मतान्तराणां समन्वयः, समस्यानां समाधानं विचाराणां संशोधनं, हिंसादिदुष्कृतानां बहिष्कारः, समाजानां सुधारश्च विहितः। स्याद्वादस्य शैल्या विविधदर्शनानां समन्वयसाधकः श्लोकः—

कथञ्चित्ते सदेवेष्टं कथञ्चिदसदेव तत्।
तथोभयमवाच्यं च नययोगान्न सर्वथा॥

(आप्तमीमांसा, श्लोक. १४)

कतिपयदर्शनानां समन्वयो दृष्टव्यः अत्र—(१) सांख्यदर्शने सदेकान्तवादस्य प्रथमभङ्गे समन्वयः। (२) माध्यमिकदर्शनस्यासदेकान्तवादस्य द्वितीयभङ्गे, (३) वैशेषिकदर्शनस्य सदसदै-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कान्तवादस्य तृतीयभङ्गे, (४) बौद्धदर्शनस्य अवक्तव्यैकान्तवादस्य चतुर्थभंङ्गे, (५) शङ्कराचार्यस्यानिर्वचनीयवादस्य पञ्चमभङ्गे, (६) बौद्धानामन्यापोहवादस्य षष्ठभङ्गे, (७) यौगस्य पदार्थवादस्य सप्तमभङ्गे समीकरणं भवति। ( जैनधर्म पृ. ७१-७२ )

अतः स्याद्वादेन दर्शनानां विचाराणां च विवादस्य समाप्तिर्भवति। यथाविज्ञजनेन गजविषये सप्तजात्यन्धपुरुषविवादसमाप्तिर्भवति।

## दार्शनिकक्षेत्रे स्याद्वादस्य प्रभावः

पक्षपातरहितत्वात् स्याद्वादेन परस्परविरुद्धदर्शनानां सम्प्रदायानां च समन्वये सति तस्य तेषु दर्शनेषु प्रभावः स्वयमेव सिद्धो भवति। लोकस्य संयोग-वियोगपरिवर्तनरूपविधानं सापेक्षम्, लोकस्य व्यवहारोऽपि सापेक्षः। अन्यथा लोकस्य सम्यक्स्थितिर्व्यवस्था च न भवेत्। तद्विधानं व्यवहारो वा सापेक्षनयवादेन स्याद्वादेन वा संजायते। अतएव लोकस्य सम्यक्स्थितिं दृष्ट्वा "दुनिया" ( द्विनयः ) इति संज्ञा निगद्यते। जैनदार्शनिकानां मतम्—सर्वदर्शनानि नयवाद एवान्तर्भूतानि। अत एव तानि सर्वाणि नयवादेन प्रभावितानि दृश्यन्ते। तथाहि—ऋजुसूत्रनयेन बौद्धदर्शनम्, संग्रहनयेन वेदान्तदर्शनम्, नैगमनयापेक्षया न्यायदर्शनं वैशेषिकदर्शनं च, शब्दनयेन शब्दब्रह्मदर्शनं व्यवहारनयेन च चार्वाकदर्शनं प्रभावितम्। किञ्च—महावीरतीर्थङ्करसमये स्याद्वादेन क्रियावादिप्रभृतयः ३६३ सम्प्रदायाः प्रभाविता आसन्।

( अहिंसादर्शनस्य पृ० २९९–३०० )

अपि च—इन्द्रभूतिप्रभृत्येकादशदार्शनिका नित्यैकान्तवादिनः, उच्छेदवादिनश्च अजितकेशकम्बलिप्रभृतयो दार्शनिका महावीरस्य स्याद्वाददर्शनेन प्रभाविताः। इन्द्रभूतिप्रभृतयस्तु दार्शनिका एकादशसंख्यकाः साक्षान्महावीरसमवशरण एव दीक्षिताः सन्तो गणधरपदे विभूषिता अभूवन्।

( जैनदर्शनस्य पृ० ५९ )

भारतीयदर्शनशास्त्रेषु वेदोपनिषदादिषु विश्वस्य आदितत्त्वविषये सद्-असद्-उभय-अनुभयेति भेदचतुष्टयेन निर्णयः कृतः। तत्रापि विवक्षाबलेनैन ( स्याद्वादेनैव ) परस्परविरुद्धधर्माणां पदार्थे निर्णयो ज्ञातव्यः, अन्यथा धर्मैकान्तवादेन पारस्परिकविरोधाद् वस्तुतत्त्वस्य निश्चयोऽशक्यः। तथाहि—"एकं सद् विप्रा बहुधा वदन्ति" ( ऋग्वेदे १।१६४।४६ )।

"सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्।
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम्"॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्मादसतः सज्जायत........" ( छान्दोग्योपनिषद् ६।२।। )

"आपो धातु सिया अज्झत्तिका सिया बाहिरा ( जलं स्यादभ्यन्तरं स्याद् बाह्यम् )

( मज्झिमनिकाय—महाराहुलोवादसुत्त )

एवं कठोपनिषद्, प्रश्नोपनिषद्, ईशावास्येत्यादि ग्रन्थेष्वपि वस्तूनां विरुद्ध-धर्माणां वर्णनं विवक्षावशादेव ज्ञातव्यम्।

किञ्च—"सामान्यं द्विविधं प्रोक्तं परं चापरमेव च'। सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम्, तदपेक्षया चान्यासां जातीनामपरत्वमिति"।

( कारिकावली कारिका ८ टीका—पृ० १६ )

अपि च—"द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ।।६।। पृथ्वीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वाद् द्रव्यत्वादेः परत्वम्, सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाच्च द्रव्यत्वस्यापरत्वम्। तथा च धर्मद्वयसमावेशादुभयमविरुद्धमिति"।

( कारिकावली का. ६ पृ० २०-२१ )

"तत्र गन्धवती पृथिवी। सा द्विविधा, नित्याऽनित्या च। नित्या परमाणुरूपा, अनित्या कार्यरूपा" इति पृथिव्याः नित्यानित्यत्वम्।

( तर्कसंग्रहे प्रत्यक्षप्रकरणे सूत्रम्—६ पृ. ३ )

अपि च—आचार्यमलयगिरिमहोदयेन प्रमाणवाक्य एव स्यान्निपातस्य प्रयोगः स्वीकृतः, न तु नयवाक्ये।

( जैनदर्शने पृ, ५४८ )

श्रीबुद्धस्याव्याकृतवादे चतुर्भङ्गापेक्षया परामर्शो व्याख्यातः। संजयवेलट्ठिपुत्तस्यानिश्चितवादेऽपि सत्-असत्-उभय-अनुभयेति चतुर्भङ्गापेक्षया विचारो विहितः। अतस्तस्य चतुर्भङ्गात्मकोऽनेकान्तवादः स्याद्वादेन प्रभावितः।

( जैनदर्शने पृ. ५३५ )

इत्थं विविधदर्शनशास्त्राणां प्रोक्तप्रकरणेषु वस्तुतत्त्वनिर्णये परस्परविरुद्धधर्मसिद्धत्वं विवक्षाबलादेव। यद्यपि तत्प्रकरणेषु स्यान्निपातस्य प्रयोगो न दृश्यते साक्षात् तथापि प्रकरणवशात्स्यात्पदमन्तर्हितं विद्यत एव, अथवा तस्याध्याहारो भवत्येव।

## वैज्ञानिकलोके स्याद्वादः

यथा खलु दार्शनिकक्षेत्रे स्याद्वादस्याविष्कारो महत्त्वं च विद्यते। तथैव विज्ञानलोकेऽपि तस्य सत्त्वं महत्त्वं च दृश्येते। न हि स्याद्वादविज्ञानयोः कश्चिद् विरोधः, तयोः द्रव्यशक्तिपरीक्षकत्वात्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्यकारित्वाच्च । विज्ञानेऽपि वैज्ञानिकैः पदार्थानामनन्तशक्तिगुणात्मकत्वम्, गुणपर्ययरूपत्वम्, उत्पादव्ययध्रौव्यं संयोगवियोगरूपत्वं च व्यपेक्षाबलात्स्वीकृतम् । विविधवस्तूनामाविष्कारे स्याद्वादरीत्या संयोगत्वपृथक्त्वात्मकप्रयोगो भवति, अत एव पदार्थशक्तिविकासश्चन्द्रकलावत्संजायते । अनेन स्याद्वादः सिद्धश्चमत्कारोत्पादकानामाविष्काराणामाधारभूमिः साम्प्रतम् ।

अमेरिकाराष्ट्रस्य प्रसिद्धेन वैज्ञानिकेन प्रो० डा० आर्चीब्रहा पी० एच० डी० महोदयेन स्याद्वादस्योपयोगित्वं महत्त्वं च स्वीकृतम् ।

"The Anckānta is an impartant principle of jain Loqic, not commonly asserted by the Western or Hindu loqician, which promises much for world-peace through metaphysical hormony".

( The Voice of Ahimsa Val I. P. 3. )

जर्मनदेशस्य विज्ञानयोगी सर अलवर्ट आइन्स्टाइनमहोदयः ( EINSTEIN ) स्वयुगे स्याद्वादविज्ञानयोः समन्वये महाप्रयत्नमकरोत् । अथ च १९०५ ईशवीयाब्दे तेनैव सापेक्षवादसिद्धान्तम् ( The theory of Relativity ) आविष्कृत्य विविधसमस्यायाः समाधाने जीवनव्यवहारे च तस्योपयोगः कृतः ।

(धर्मयुगे २२ अप्रैल १९५९ )

तेनैव सापेक्षवादसिद्धान्तेन (The theory of Relativity.) स्याद्वादस्य समर्थनम् अस्तित्वं च सिद्धयति । आंग्लभाषायां तस्य सद्विचारोऽयम्—

"We can know only the relative truth, the real truth is known to the Universal observer". इति । तात्पर्यम्—यद् वयं केवलं सापेक्षसत्यमेव ज्ञातुं समर्थाः, अल्पशब्दज्ञानसहितत्वात् । वस्तूनां निश्चयपूर्णसत्यं ( Absolute truth ) तु केवलं विश्वद्रष्टा विज्ञातुं समर्थः ।

( अनेकान्ते वर्षे—११ किरण ३ पृ. २४३ )

अपि च—पाश्चात्यदार्शनिकस्य विलियमजेम्समहोदयस्य Pragmatism सिद्धान्तस्य स्याद्वादेन सहानेकदृष्टिषु तुलना साध्या । ग्रीकदेशे हि स्थापितस्य इलियाटिक [ELEATIC] सम्प्रदायस्य "जगत् परिवर्तनहीनं नित्यमस्तीति" मान्यताऽऽसीत् । तद्विरुद्धस्य हिराक्लीटियन (Hereclition ) सम्प्रदायस्य मान्यता आसीत्—यत् "जगत् सर्वथा परिवर्तनशीलमनित्यमिति" । अनयोः परस्परविरुद्धयोर्मतयोः समन्वयं कुर्वताम्, एम्पीडोक्लीज ( Empedocles ), एटो-



CC-0. Sampurnanand University Collection. Digitized by eGangotri

मिस्ट्स ( Atomists ), इनैक्सागोरस ( Anaxagoras ) इत्येषां दार्शनिकानां मान्यताऽऽसीत्-- पदार्था नित्याः सन्तोऽपि आपेक्षिकपरिवर्तनशीलाः ( अनित्याः ) सन्ति" इति। किञ्च--जर्मनदेशीयस्य तत्त्ववेत्तुः हेगलमहोदयस्य ( Hegel ) मान्यता विद्यते-यद् विरुद्ध-धर्मात्मकत्वमेव संसारस्य मूलमस्ति। कस्यचिद् वस्तुनस्तत्त्ववर्णनसमये तस्य वास्तविकतायास्तु वर्णनं कर्तव्यमेव, परं तेन सह तयोर्विरुद्धधर्मयोः समन्वयोऽपि प्रदर्शनीयः। विद्यते विश्वासो ब्रैडलेमहोदयस्य--प्रत्येकं वस्तु तदितरवस्तुतुलनायामावश्यकमपि तुच्छं चापि। (अहिंसादर्शने पृ. ३०२-३०३ )। अपि च—प्रो० हरिसत्यभट्टाचार्यमहोदयो जैनदर्शने नयानामध्ययनं यूरोपीयस्यार्वाचीनस्य तर्कशास्त्रस्य सिद्धान्त निरूपयति। यूरोपीयतर्कशास्त्रस्य सिद्धान्तः—यथा-यथा वस्तुनो विश्लेषणं क्रियते तथा तथा तस्य स्वरूपं सूक्ष्मं ज्ञायते, तच्च सामान्यतो विशिष्टं भवति। ( अनेकान्ते वर्षे ११ किरणे ३ पृ. २४५ )

## डा० सम्पूर्णानन्दमहोदयः

"जैनदर्शनेन दर्शनशब्दस्य काल्पनिकभूमिं परित्यज्य वस्तुमर्यादायां वस्तुस्थित्याधारेण संवादस्य समीकरणस्य यथार्थतत्त्वज्ञानस्य च विषयेऽनेकान्तदृष्टिः स्याद्वादभाषा च लोकाय प्रदत्ता"। ( जैनदर्शने पृ० ५६० )

इत्थं प्रोक्तप्रमाणैः स्याद्वादोऽनेकान्तवादो वा स्वतन्त्रत्वेन दार्शनिको वैज्ञानिकश्च सिद्धान्तः सिद्धः।

## राष्ट्रियक्षेत्रे स्याद्वादः --

यथा चैकस्मिन् पदार्थे विविधधर्माणामपेक्षाबलात् परस्पराविरोधपूर्वकं समन्वयं कृत्वा वस्तुव्यवस्थां सम्पादयति स्याद्वादस्तथैव महाद्वीपेषु राष्ट्रेषु च निवासिनां मानवानां विविधविचारेषु धर्मेषु सम्प्रदायेषु चापेक्षाप्रयोगात्पारस्परिकविरोधं दूरीकृत्य, बन्धुत्वम् मैत्रीं च विधाय तेषु सहास्तित्वं स्थापयितुं समर्थः स्याद्वादः। अपि च--साम्प्रदायिकद्वेषस्य समाजवर्णगतद्वेषस्य, शरीर-वर्णद्वेषस्य भाषाविरोधस्य प्रान्तविरोधस्य पदाधिकारविरोधस्य चापेक्षाबलाद् विध्वंसं कृत्वा राष्ट्रिय-क्षेत्रेऽपि शान्तिप्रदाने प्रबलः सः। तथा ह्यखण्डराष्ट्रव्यवस्थापेक्षया राष्ट्रस्य प्रधानत्वम्, प्रान्तस्य च गौणत्वम्। प्रान्तीयव्यवस्थापेक्षया प्रान्तस्य प्राधान्यम्, राष्ट्रस्य चाप्राधान्यम्, तथापि राष्ट्रवस्तुव्यवस्थायै सुरक्षायै वा राष्ट्रप्रान्तयोः पारस्परिकाविरोधेन सहास्तित्वमावश्यकमिति।

किञ्च—विश्वमैत्रीमुखेन राष्ट्रविरोधं दूरीकृत्यान्ताराष्ट्रियशान्तिसम्पादने, भारतचीनयो-र्मर्यादाविवादस्य कश्मीरविवादस्य च सत्समाधानेऽपि प्रभुः स स्याद्वादः। यथाहि चीनराष्ट्रस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वद्रव्यक्षेत्रकालभावापेक्षया स्वराष्ट्रत्वम्, भारताद्यपेक्षया च परराष्ट्रत्वम्। एवं भारतस्य स्वद्रव्यचतुष्टयापेक्षया स्वराष्ट्रत्वम्, चीनाद्यपेक्षया च परराष्ट्रत्वम्। अन्ताराष्ट्रियशान्तिविधाने विश्वमैत्रीविधाने च द्वयोर्राष्ट्रयोः सहास्तित्वमावश्यकम्। अतः स्वराष्ट्र एव सन्तोषभावेन शासनं कर्तव्यम् परराष्ट्रे तृष्णोद्रेकात् सैन्यादिशक्तिमदाद्वा नैव विधेयमाक्रमणम्। एवं सर्वत्र विज्ञेयम्।

अपि च—हठवादं दुर्भावनां मदं च निराकृत्य सत्याहिंसास्वरूपं श्रेष्ठधर्मं गांधीवादं वा लोकहिताय प्रदर्शयति स स्याद्वादः। राष्ट्रनेत्रा पण्डितजवाहरलालनेहरूमहोदयेन बाडुङ्गसम्मेलने राष्ट्रशान्तिकरणाय पञ्चशीलस्य घोषणा कृता, या सर्वलोकमतमान्याभूत्। तस्य पञ्चशीलस्य प्रयोगः स्याद्वादशैल्यैव भवति निर्विरोधम्। यतश्च सा शैली स्वार्थभावना विरोधभावनां च निष्कास्य सहयोगं प्रदर्शयति।

## लोकव्यवहारे स्याद्वादः

लोकस्य समस्तव्यवहारो वातावरणं वाऽपेक्षासमाश्रितं विद्यते। मानवानां सकलव्यवहारः पदार्थेषु सापेक्षः, प्रकृतिपरिवर्तनमपि सापेक्षम्। निरपेक्षत्वे क्षणमात्रमपि लोकस्य व्यवस्था व्यवहारश्च कार्यकारी न भवितुमर्हति। अपेक्षावादेन सत्यमार्गस्यान्वेषणं सञ्जायते। सत्यान्वेषणे च मानवानां स्वाभाविकप्रवृत्तिः सदैव प्रवाहिता भवति। सत्यव्यवहारे समुपस्थितविरोधानाम्, विघ्नानां समन्वयं शान्तिं च करोति स्याद्वादः। स एव लोकव्यवहारस्य नेता जैनदर्शने प्रोक्तः—

जेण विणा लोगस्सवि ववहारो सव्वाहन निव्वडइ।
तस्य भुवणेक्क गुरुणो णमो अणेगंत वायस्स॥
(सन्मतितर्कप्रकरण—३।६८)

विद्यते हि लोके मानवो बुद्धिसम्पन्नः प्राणभृत्। स स्वविवेकेन कस्मिन्नपि विषये परामर्शं कृत्वा सत्यासत्यनिर्णये हेयोपादेयविधाने वस्तुतत्त्वनिरीक्षणे च समर्थः। वस्तु तावदनन्तधर्मात्मकम्, मानवस्य मतिस्तु क्षायोपशमिकत्वादपूर्णा, अतो मानव एकस्मिन्समये वस्तुन एकमेव गुणं विचार्य वक्तुं समर्थः। न हि पदार्थस्य सर्वांशविचारे स युगपद् दक्षः। अतः कस्यचिन्मानवस्य वार्तां श्रुत्वा स्याद्वादशैलीतो विचार्यैव तस्य विचारस्य हेयोपादेयरूपनिश्चयो विधातव्यः। अन्यथा पक्षपाततया विचारे निश्चये वा कलहोऽग्रे धावत्येव। कस्यचिद् विज्ञस्योपदेशं श्रुत्वा, ग्रन्थकारस्य वा रचनां पठित्वा विवक्षात एव विचारः कर्त्तव्यः। यतो विवक्षातो विषयप्रतिपादनं निर्विरोधं भवति, अन्यथा पदे पदे विरोधः। स्वकथनं सत्यमेव, परकथनं तु मृषैवेति हठवादो न कार्यकारी। अनया स्याद्वादशैल्या लोके जीवनस्य विकासः, मैत्रीभावः,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पारस्परिकसहयोगः सामाजिकसुधारश्च सम्पद्यते। विद्वेषभावं विरोधं स्वार्थवृत्तिं च निरस्य विवाहकार्ये दहेजप्रथायां मरणभोजे सामाजिकव्यवहारे धार्मिकोत्सवे गृहस्थाश्रमनिर्माणे व्यापारे विषयसेवने परोपकारे भोजनादिदानेषु चिकित्सायां व्यायामे विद्याध्ययने सर्वकार्येषु च द्रव्य-क्षेत्रसमयभावबलापेक्षया विवेकेन च कृतः परिश्रमः सफलतां जनयति।

अपि च मानवचित्तस्योदारतां विचारसाम्यं सहिष्णुतां जनसेवां च समुत्पादयति सोऽनेकान्तवादः। लोकविधाने ऋतुवर्षमासपरिवर्तने च सोऽपेक्षावादः शान्तिप्रदं कार्यक्रमं प्रदर्शयति।

किञ्चलोके हि विविधमान्यतानां विचाराणां चाविर्भावः सदैव भवति व्यक्तेः मानसे, तदनन्तरं प्रचारकार्येण व्यक्तिगतमान्यता विचारो वा क्रमशः सामाजिकमान्यता विचारो वा सञ्जायते। कषायभावेन स्वार्थभावेन पक्षव्यामोहेन च व्यक्तिगतद्रोहात् सामाजिकद्रोहो विवादश्च भवति, ततश्चाशान्तिर्भयप्रदसंघर्षो जातिपरिवर्तनं धर्मपरिवर्तनं देशपरिवर्तनं च नियमेन मानवानां जायते। भारतीयेतिहासे नाना घटनाः साम्प्रदायिकद्रोहपूर्णा जातिधर्मपरिवर्तनपूर्णाः दृश्यन्ते। लौकिकक्षेत्रे विचाराणां मान्यतानां च समीकरणम्, मैत्री, सामाजिकशान्तिः, सत्यधर्मनिष्ठा च स्याद्वादप्रयोगेन नियमेन भवति। स एव धर्मान्धतां मृषावादं च निराकर्तुं समर्थः।

अपि च-निमित्तोपादानरूपो निश्चयव्यवहारात्मकः क्रमाक्रमबद्धपर्यायरूपः पुरुषार्थदैव-विषयकः पुण्यपापधर्मविषयकश्च सामाजिकविवादो व्यक्तिगतो वा स्याद्वादपद्धत्यैव दूरीभवति।

किञ्चराष्ट्रेषु राजनैतिकदलेषु परिषत्सु च विचारवैषम्यात्तीव्रविरोधः प्रतिक्रिया संग्रामो वा दृश्यते। विश्वेतिहासेऽनेकविशालघटनाः श्रूयन्ते। तेषां सर्वेषां समाधानं समन्वयो वा स्याद्वादप्रयोगतः संपत्तुमर्हति। इतिहासे यत्रापेक्षाप्रयोगात् समन्वयो जनितस्तत्र देशे दलेषु च शान्तिरप्यभूत्।

## अहिंसाक्षेत्रे स्याद्वादः

जैनदर्शनेन स्याद्वादशैलीतः सर्वहितप्रदमहिंसानुष्ठानं प्रदर्शितम्। या अहिंसा प्राणिनां जीवनसंरक्षणे जन्ममरणादिदुःखनिवारणे च परममातृका प्रसिद्धा। या चाहिंसा न केवलं शास्त्रेषु शब्देषु च विद्यते, परन्तु जीवने सम्यगाचरितुं प्रधानलक्ष्यरूपा प्रकथिता।

लोकस्य पदार्थानां तत्त्वज्ञानेनानेकान्तात्मकेन पदार्थस्वरूपस्यात्मनश्च निश्चय आस्था च भवति, मानसशुद्धिरपि, सैव मानसिकाऽहिंसा कथ्यते। स्याद्वादात्मकनिर्दोषभाषा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शैल्या वस्तुतत्त्वंप्रतिपादकस्य वचनस्य मानसविचारशुद्धिमूलकः प्रयोगो भवति, स एव वाचनिकाऽहिंसा। मानसिकवाचनिकशुद्धिजन्या शारीरिकाऽहिंसा, अहिंसात्मकप्रवृत्तिर्वा संजायते। इत्थमनेकान्तमयविज्ञानेन स्याद्वादशैल्या चाहिंसात्रयस्य प्रतिष्ठा भवति, ततश्च लोककल्याणं सम्पद्यते। अतः सम्पूर्णाऽहिंसाविकासे स्याद्वादस्यानेकान्तवादस्य चोपयोगः सार्थकः।

## न्यायाधिपतिः स्याद्वादः

अनेकान्तदर्शनेन मानसिकविचाराणां शुद्धिर्यदा संजायते, तदा निसर्गत एव वचनप्रयोगे निर्दोषता नम्रता च भवति, अतएव स्याद्वादी विज्ञः पारस्परिकविरुद्धविचाराणां निश्चायकः, विवादानां निर्णायकः, विद्रोहाणां विघातकः, दर्शनानां समन्वयविधायको भवति। स स्याद्वादी एवकारेण (स्वपक्षहठेन) कस्यचिद् बहिष्कारं न करोति, अपि तु स अपिकारेण तस्य समर्थनं करोति। नयवादेन सर्वेषां विचारकाणां वचनानि श्रुत्वा निर्णयात्मकसमताभावं स्थापयति वात्सल्यं चापि। किं च प्रमाणनयहेतुभिर्वितर्कं विधाय वस्तुनों ऽशज्ञानेन सम्पूर्णज्ञानं प्रतिपादयति सोऽनेकान्तवादः। अतः सकलवस्तुतत्त्वनिर्णये न्यायं करोतीति न्यायाधिपतिः स्याद्वादः। इदमपि वैशिष्ट्यं यत् स्याद्वादः सत्यताया असत्यतया सह समीकरणं नैव करोति, नासत्यपक्षं गृह्णाति। किन्तु स वस्तुनि भाषणे वा सत्यान्वेषणस्य कुशलनिरीक्षकत्वं दधाति।

## दैनिकजीवने स्याद्वादः

स्याद्वादसिद्धान्तः केवलं शास्त्रलिखितः शब्दवाच्यो वा न ज्ञातव्यः। तस्योपयोगोऽपि साम्प्रतं वादविवादे जयपराजये हठवादेऽसत्ये दुरभिप्राये वा न विधेयः, अपि तु परीक्षाप्रधानो मानवो दैनिककार्येषु गम्भीरविचारेषु व्यवहारे वस्तुनिर्णये वार्तालापे च विधेयः। येनावश्यकतापूर्तिः समस्यानां समाधानं दैनिकनिर्वाहश्च कुशलतया भवेत्। तथाहि—गृहकार्येषु, भोजने, यात्रायां, व्यापारे, व्यवहारे, कार्यालये, दाने, सेवायां, व्यायामे च यथाकाले यथास्थाने स्वभावत एव भवत्यपेक्षावादस्योपयोगः कर्त्तव्यश्च। यद्यपि तत्तत्कार्येषु 'स्यात्' (अपेक्षा) शब्दस्य कथनं नैव भवति तथापि गुप्तत्वेन तस्य सम्बन्धो ज्ञातव्यः, सर्वत्र तस्याध्याहारो जायते; यथा कश्चित्पुरुषः स्वपुत्रं प्रति वदति, हे पुत्र! इति। यद्यपि, विवक्षाकथनमत्र नास्त्येव तथापि तस्या अन्तर्हितत्वेन सम्बन्धो विद्यत एव, यतश्च स एव पुत्रः स्वपुत्रापेक्षया जनकोऽपि प्रसिद्धः, अन्यथा व्यवहाराभाव इष्टापत्तिश्च स्यात्। एवं सर्वकार्येषु विज्ञेयम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च—सुयोग्ययुवकापेक्षया पाणिग्रहणं वरम्, बालकवृद्धापेक्षया तदवरम्। स्वस्थजनाय स्नानं हितकरम्, रुग्णजनायाहितकरम्। शक्तिमतेऽन्न शीतजलं च बलप्रदम् सन्निपातादिरोगिणे तदुभयं मरणकारणम्। मात्रापेक्षात औषधं जीवनकारणम्, मात्राधिक्यापेक्षया तन्मरणकारणम्। न्यायेन धनोपार्जनं युक्तमन्यायेन तदयुक्तम्। संयमेन वस्तुभोगो वरः, न वरोऽसंयमेन। योग्य-समये कार्यं वरम्, असमये न वरम्। क्षेत्रकालापेक्षया वार्ता सम्यक्, तदनपेक्षया चासम्यक्। समये निद्रा सम्यक्, अकाले न सम्यक्। मात्रायां व्यायामः समीचीनः, अमात्रायामसमीचीन इत्यादि।

एकदा अकबरनृपेण विनोदप्रसङ्गे श्यामपट्टे ( Black board ) आयत-( दीर्घ ) रेखां कृत्वा वीरबलं प्रति कथितम्—"इमां रेखाममार्जयित्वा ह्रस्वां कुरुषे चेत्त्वमसि बुद्धिमान्" इति। मन्दहास्येन वीरबलेन तस्या रेखाया अधोभागे तदपेक्षया दीर्घरेखा विलिखिता, इति स्याद्वादशैलीमाश्रित्योत्तरप्रदाने अकबरनृपः प्रसन्नः सन् वीरबलाय पारितोषिकं प्रदत्तवान्। अतो मनोविनोदेऽपि स्याद्वादस्योपयोगः फलप्रदो भवति।

कस्मिंश्चित्समये कक्षायां शिक्षकमहोदयश्छात्रं प्रति प्रश्नं पृच्छति अ-ब-स इति श्रेण्यां स्थिते वर्णत्रये 'ब' कस्मिन्भागे स्थितः? छात्रः कथयति—'स' अपेक्षया 'ब' दक्षिणभागे, 'अ' इत्यपेक्षया 'ब' वामभागे विद्यते। अतो 'ब' इति वर्णः दक्षिणेऽपि वर्तते वामेऽपि च—इति स्याद्वादपद्धत्या छात्रस्योत्तरं श्रुत्वा प्रमुदितः सञ्जातः शिक्षकमहोदयः।

इत्थं द्रव्यक्षेत्रकालभावापेक्षया दैनिकजीवनस्य व्यवहारोऽपि कुशलत्वेन च सम्पद्यते। न तेन विना पदमपि गन्तुं समर्थो मानवः, यथा दधिमन्थनं न भवितुमर्हति प्रधानगौण-क्रियामन्तरेण।

किञ्च—स्याद्वादाणुवीक्षणयन्त्रेण दैनिकभोग्यवस्तूनां भोगोपभोगे सम्यक् निरीक्षणं परीक्षणं च सञ्जायते। अविवेकेन गतानुगतित्वेनान्धविश्वासेन चेष्टकार्याणां मनोरथस्य च निर्विघ्नत्वेन सिद्धिरसम्भवेति।

## उपसंहारः

अतः प्रमाणसिद्धः स्वानुभवनिष्पन्नः सप्तशैलीसमन्वितः समन्वयविधायकः प्रभावको विज्ञानसिद्धो राष्ट्रियतासम्पादको लोकव्यवहारसाधकोऽहिंसाप्रतिष्ठापको दैनिकजीवननिर्वाहको न्यायाधीशः स्याद्वादः (अनेकान्तवादः, दृष्टिवादः, नयवादः, अपेक्षावादः The theory of Relativity. सप्तभङ्गवादः ) हठवादं संकीर्णमनोवृत्तिम् अहङ्कारं च तिरस्कृत्य, दिवाकर इव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुज्ञानतिमिरं दूरीकृत्य, विश्वद्रव्यतत्त्वं च प्रकाश्य जगति सर्वोदयं करोति । अत एव कथ्यते—"स्याद्वादमयं जगत्" इति ।

तीर्थं सर्वपदार्थतत्त्वविषयस्याद्वादपुण्योदधे-
भव्यानामकलङ्कभावकृतये प्राभावि काले कलौ ।
येनाचार्यसमन्तभद्रयतिना तस्मै नमः सन्ततं
कृत्वा तत्स्वधिनायकं जिनपतिं वीरं प्रणौमि स्फुटम् ।।

( अनेकान्त० वर्षे ११ किरणे ३ मुखपृष्ठे )

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# कारकस्वरूपम्

श्री श्रीकान्तपाण्डेयः अनुसंधाता, वा० सं० वि० वि०

इह खलु लोकव्यवहारनिर्वहणार्थं भाषैव जुषते प्रधानभावम्। अन्तरेण भाषां लोका न प्रभवन्ति नैजमाशयं प्रकाशयितुम्, अप्रकाशयन्तश्चाशयं किञ्चिदप्यनुष्ठातुं न पारयेयुः। किञ्चिदनुष्ठातुमशक्नुवतां तेषां कृते सकलं जगदेवान्धकारमयं भवेत्। अतो भाषाया महत्त्वं सर्वथौचित्यम् आवहति।

भाषयाऽपि तया पुनः सुसंस्कृतया भवितव्यम् परत्राशयं संक्रमयितुम्। सुसंस्कृता भाषा च शब्दसाधुत्वमपेक्षते। साधुशब्दप्रयोगे तु व्याकरणाध्ययनं हि प्रधानं प्रयोजकम्। व्याकरशास्त्रे—

[1]"वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः"

इति भट्टोजिदीक्षितवचनप्रामाण्याद् वाक्यस्यैव प्राधान्यम्। वाक्यञ्च सर्वमपि कारकेणानुविद्धमेवानुभूयते। अतस्तस्य कीदृशं स्वरूपमिति जिज्ञासा समुदेति।

तत्र पाणिनिव्याकरणशास्त्रे कारकस्वरूपपरिचायकं "[2]कारके" इति सूत्रं वर्तते। तत्तत्कर्तृकर्मकरणादिसंज्ञाविधायकेषु [3]शास्त्रेषु "कारके" इत्यधिक्रियते। अधिकृतस्य तस्य विधिशास्त्रवाक्यैकवाक्यतयोपयोगः। एवञ्च "कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वेन इच्छोद्देश्यताश्रयस्य कर्मसंज्ञा भवति कारकसंज्ञा सती" इत्याद्यर्थः संगच्छते। अत्र कारकसंज्ञा सती कर्मसंज्ञेत्यस्य किं तात्पर्यम्, यतो हि स्वदेशेऽधिकारसूत्रत्वेन विधिदेशे सप्तमीनिर्देशात् संज्ञात्वेनाधिकारो भवितुन्नार्हति। यदि संज्ञात्वेनाधिकारः स्यात्तदा संज्ञाया भाव्यमानत्वेन सूत्रकृता प्रथमान्तत्वेन निर्देशो विहितः स्यात्। यदि विशेषणत्वेनाधिकारस्तदा कारकपदघटकीभूते विधिशास्त्रेऽपादानादिसंज्ञाविकलस्यापि ग्रहणापत्तावनिष्टस्थले स्वरप्रवृत्तिः स्यात्।

---

१ वैयाकरणभूषणसारः, कारिका संख्या ६१

२. पाणिनिसूत्रम् १।४।२३

३. ध्रुवमपायेऽपादानम्, पा० सू० १।४।२४। "कर्मणा यमभिप्रैति स संप्रदानम्" पा० सू० १।४।३२। "साधकतमं करणम्", पा० सू० १।४।४२। कर्तुरीप्सिततमं कर्म" पा० सू० १।४।४९। इत्यादीनि बहूनि सूत्राणि सन्तीति संक्षेपेण निर्दिश्यन्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदन्तात्पर्यं यदधिकृतं "कारके" इति कर्मादिसंज्ञाविधायके शास्त्रे यदा विशेषणतयाऽन्वेति तदा क्रियायां विषयभूतायां कर्मादिसंज्ञा भवतीत्यर्थो निष्पद्यते । एवञ्च क्रियाविषयस्यापादानादि-संज्ञारहितस्यापि "कारकाद्दत्तश्रुतयोरेवाशिषि" (पा० सू० ६।२।१४८) इत्यत्र ग्रहणापत्त्या नटस्य शृणोतीत्यादिस्थले नटस्य क्रियाजनकत्वेन कारकत्वान् नटश्रुतमित्यत्राप्यन्तोदात्तः स्यात् । नचेष्यत एतादृशस्थले निरुक्तसूत्रप्रवृत्तिः ।

वस्तुतोऽत्र संज्ञात्वेनैव रूपेण विधिशास्त्रेण सहाऽधिकारत्वं भजते । संज्ञाया विधीय-मानतया प्रथमानिर्देशस्तर्हि स्यादिति विचारणायामत्र प्रथमार्थे सप्तमी, अर्थात् प्रथमायाः स्थाने [1]व्यत्ययेन सप्तमी कृता भगवता पाणिनिना । अत एव कारके १।४।२३ इत्यत्र भाष्ये उक्तम्— "इह व्याकरणे ये वैते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते पशुरपत्यं देवतेति । या वैताः कृत्रिमाष्टिघुघभादिसंज्ञाः । नचायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः न खल्वपि कृत्रिमा संज्ञा, अन्यत्राविधानात् । संज्ञाधिकारश्चायम्, तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः" इति ।

अथ संज्ञाधिकाररूपकारकस्वरूपस्वीकारेऽपि संज्ञिनोऽनिर्देशात् संज्ञासंज्ञिभावो न युज्यते। यद्यपि ध्रुवादयः संज्ञिनो निर्दिष्टास्तथापि विशिष्टस्यैकरूपेण वर्तमानस्य संज्ञिनोऽनिर्देशादकारकस्यापि कारकत्वप्रसङ्गः । यथा ब्राह्मणस्य पितरं पन्थानं पृच्छतीत्यत्र अप्रधानवाचिनोऽकथितशब्दस्य ग्रहणेन ब्राह्मणस्याप्यप्रधानत्वात् कर्मतापत्तिरिति चेदुच्यते, "कारक इति महती संज्ञा क्रियते, संज्ञा च नाम यतो न लघीयः; कुत एतत्? लघ्वर्थं हि संज्ञाकरणम्, तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत, करोतीति कारकमिति" १।४।२३ इति सूत्रस्य भाष्येण क्रियाजनकत्वस्य संज्ञिनो लाभान्नोक्तदोषः ।

तत्र कारककर्मादिसंज्ञानामाकडारीयत्वेन[2] बाध्यबाधकभावात् संज्ञाद्वयसमावेशासंभवेऽपि कर्मादिसंज्ञाविधायके शास्त्रे[3]योगविभागेन कारकसंज्ञा विधीयते । पुनरग्रिमसूत्रे कारकमि-

१. "व्यत्ययो बहुलम्" पा० सू० ३।१।८५ । अस्येदन्तात्पर्यं यद् विकरणानां बहुलं व्यत्ययः स्याच्छ-न्दसि । तत्र "छन्दोवत् सूत्राणि भवन्ति" इति सिद्धान्तादत्र व्यत्ययः । केषां विकरणानां व्यत्यय इति जिज्ञासायां प्रकृतसूत्रभाष्ये निम्नकारिका निर्दिष्टाऽस्ति—

सुप्तिङुपग्रहकालनराणां कालहलच्स्वरकर्तृयङाञ्च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन ॥

अत्र सुब्व्यत्ययः ।

२. "आकडारादेका संज्ञा" पा० सू० १।४।१ इत उर्ध्वं "कडारा कर्मधारये" पा० सू० २।२।३८ इत्यत; प्रागेकस्यैकैव संज्ञा बोध्यतेऽतः कारककर्मसंज्ञयोरेकत्र समावेशासंभवः ।

३. "ध्रुवमपायेऽपादानम् ,'पा० सू० १।४।२४" अत्र ध्रुवमपाये इत्येको योगः, कारके इत्यंधिक्रियते, तेनापाये यद् ध्रुवं तत् कारकसंज्ञं स्यात् । तदनन्तरम् "अपादानमिति । अत्र पूर्ववर्ति सर्वमप्यनुवर्तते, तेनापाये यद् ध्रुवं तत् कारकसंज्ञं स्यादपादानसंज्ञं भवतीति द्वयोः समावेशः ।



CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्यनुवृत्तिसामर्थ्याद् द्वयोः संज्ञयोः समावेशः । तत् प्रयोजनम्—"ग्रामे वासः" इत्यादौ आधारत्वादधिकरणसंज्ञया ग्रामपदोत्तरा सप्तमी, कारकत्वाच्च "थाऽथघञ्क्ताजबित्रकाणाम्" पा० सू० ६।२।१४४ इति सूत्रेणान्तोदात्तस्वरसिद्धिः ।

तत्र करोतीति कारकमिति अन्वर्थसंज्ञास्वीकारे स्वतन्त्रस्यैव कर्तृसंज्ञावत् कारकसंज्ञाऽपि प्राप्नोति न तु करणाधिकरणादीनां कर्तृपरतन्त्राणामिति विचारणायामुच्यते स्वव्यापारे सर्वेषां स्वातन्त्र्यात् तदनुष्ठानद्वारेण प्रधानक्रियोपयोगितया यदा यस्य स्वातन्त्र्यं विवक्षितन्तदा तस्य कर्तृत्वम् । इदन्तात्पर्यं यदधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादि क्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते । एवं सम्भवनक्रियां धारणक्रियाञ्च कुर्वती स्थाली पचतीत्युच्यते । तत्र तदा पचिर्वर्तते, एषोऽधिकरणस्य पाकः । एतदधिकरणस्य कर्तृत्वम् । एवमेधाः पक्ष्यन्ति अविक्लित्ते ज्वलिष्यतीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यते । तत्र तदा पचिर्वर्तते एतत्करणस्य कर्तृत्वम् । उद्यमननिपातनानि कुर्वन्नेव देवदत्तश्छिनत्तीत्युच्यते । तत्र तदा छिदिर्वर्तते । एष प्रधानकर्तुश्छेदः । एतत् प्रधानकर्तुः कर्तृत्वम् । एवमेवान्यत्रापि बोध्यम् । तथा च विवक्षातः कारकाणि भवन्तीति सिद्धान्तात् सर्वत्रैव स्वातन्त्र्यं पारतन्त्र्यञ्च विवक्षितमिति तयोः पर्यायेण कार्यं सेत्स्यति । स्वातन्त्र्यविवक्षायां कर्तृत्वम्, पारतन्त्र्यविवक्षायामन्यत् करणत्वादिकम् ।

तत्र भट्टोजिदीक्षितप्रभृतिप्राचां वैयाकरणानां निकाये क्रियाऽन्वयित्वं कारकत्वमिति तत्स्वरूपम् । अत्र लक्षणे अक्षेषु शौण्ड इत्यादिस्थले 'अक्षेषु' इत्यत्र कारकत्वानुपपत्तिः । यतो हि तस्य शौण्डेऽन्वयित्वेन क्रियायामन्वयाभावात् । यदि परम्परासम्बन्धेन क्रियान्वयित्वमित्युच्यते तदा निरुक्तस्थले दोषाभावेऽपि ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्यापि कारकत्वापत्तिः । अतः साक्षात्क्रियान्वयित्वं कारकत्वमिति तत्स्वरूपं भवितुमर्हति । अक्षेषु शौण्ड इत्यादिस्थले शौण्ड शब्दस्यासक्तशौण्डे लक्षणा । तदनन्तरमासक्तिक्रियारूपशौण्डपदार्थैकदेशेऽन्वयेन तदुपपत्तिः ।

यद्यपि पदार्थैकदेशेऽन्वयस्वीकारे घटत्वेऽभेदेन नित्यपदार्थान्वयतात्पर्यकस्य नित्यो घट इति प्रयोगस्य वारणाय किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन पदजन्योपस्थितिः कारणमिति कार्यकारणभावमूलिकायाः "पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेन" इति व्युत्पत्तिविरोध आपतति, तथापि देवदत्तस्य गुरुकुलम्, चैत्रस्य दासभार्यः, वेदाः प्रमाणम्, सम्पन्नो व्रीहिः, इत्यादिस्थले पदार्थैकदेशेऽन्वयेऽपि साधुत्वदर्शनेन व्युत्पत्तौ संकोचस्यावश्यकतया नित्यसाकांक्षावृत्तिकिञ्चिन्निष्ठप्रकारतानिरूपित

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन पदजन्योपस्थितिः कारणमिति" अक्षेषु शौण्ड इत्यत्र कारकाणां क्रियायां नित्यसाकांक्षत्वेन कार्यतावच्छेदकानाक्रान्ततया निरुक्तव्युत्पत्तेरप्रवृत्त्या दोषाभावः।

अथ साक्षात्क्रियान्वयित्वरूपकारकत्वस्वीकारेऽपि देवदत्तः पचतीत्यादिस्थले देवदत्तस्य आख्यातार्थकर्तर्यन्वयेन क्रियायामन्वयाभावात् कारकत्वन्न स्यात्। इष्टापत्तौ कृतायां 'सहयुक्तेऽप्रधाने, पा० सू० २।३।१६ इति सूत्रभाष्यविरोधः[1]।

तथा हि २।३।१६ इति पाणिनिसूत्रेऽप्रधानग्रहणाभावे "पुत्रेण सहागतः पिता" इत्यत्र प्रधानात् पितृपदादपि तृतीयाप्रसङ्गमादाय "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति परिभाषया अन्तरङ्गत्वात् कारकविभक्तेर्बलीयस्त्वेन प्रथमा भविष्यतीति प्रतिपादितम्। तत्र प्रथमायाः कारकत्वाभावे निरुक्तपरिभाषया तद्बलीयस्त्वप्रतिपादनमसंगतं स्यादतः साक्षात्क्रियान्वयित्वरूपकारकत्वाङ्गीकारे देवदत्तः पचतीत्यादिस्थले कारकत्वानुपपत्तिः। यदि परम्परया क्रियान्वयित्वं कारकत्वमित्युच्यते तदा "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ षष्ठ्यर्थशेषस्यापि क्रियान्वयित्वादलक्ष्ये लक्षणगमनरूपातिव्याप्तिर्दुर्वारा।

यदि षष्ठ्यर्थभिन्नत्वमपि विशेषणमुच्यतेऽर्थात् षष्ठ्यर्थभिन्नत्वे सति साक्षात् परम्परया वा क्रियान्वयित्वं कारकत्वमिति, तदा निरुक्तस्थले दोषाभावेऽपि "तण्डुलस्य पाकः" इत्यादौ कर्तृकर्मणोः कृतिः "पा० सू० २।३।६५' इत्यनेनात्र अनभिहिते कर्मणि षष्ठी। तथा च तण्डुलकर्मकः पाक इति बोधः। अत्र तण्डुलपदार्थस्य वृत्तित्वसम्बन्धेन पच्धात्वर्थफले विक्लित्तावन्वयः। फलस्यानुकूलत्वसम्बन्धेन क्रियायाम्। तथा चात्र क्रियायामन्वयेन सिद्धान्ते कारकत्वव्यपदेशो भवति। षष्ठ्यर्थभिन्नत्वविशेषणदाने तु निरुक्तस्थले षष्ठ्यर्थत्वेन कारकत्वानुपपत्तिः।

यद्यपि कृद्युक्तान्यषष्ठ्यर्थभिन्नत्वे सति साक्षात्परम्परया वा क्रियान्वयित्वं कारकत्वमिति तत्स्वरूपाङ्गीकारे उक्तलक्ष्ये दोषाभावस्तथापि कर्मणः शेषत्वविवक्षायां षष्ठ्यां "सुराणां पाताऽसौ" इत्यादिस्थले कृद्युक्तशेषषष्ठ्यर्थेऽतिव्याप्तिः। यदि धात्वर्थेतरान्वयायोग्यत्वं कारकत्वमित्युच्यते। अर्थाद् धात्वर्थेतरस्मिन् यस्यान्वययोग्यता न भवेत्, तदेव कारकम् इति, तदा कर्मणः शेषत्वविवक्षायां शेषषष्ठ्यां "सुराणां पाता" इत्यादौ संबन्धार्थबोधिकायाः षष्ठ्याः "सुराणामिन्द्रः"

---

१. "सूत्रप्रत्याख्यानभाष्यम्" २।३।१९। सहयुक्तेऽप्रधानवचनमनर्थकम्। किं कारणम्? उपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वात्। अन्यत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसी, इति प्रथमा भवति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यत्र धात्वर्थेतरस्मिन्निन्द्ररूपप्रातिपदिकार्थेऽन्वयाद् धात्वर्थेतरान्वयायोग्यत्वाभावान्न दोष इति तदा द्वितीयाद्यर्थकारके दोषः।

यतो हि "दण्डं दधातीत्यादौ यादृशोऽधि[1]करणादिद्वितीयार्थो वृत्तित्वसंबन्धेन धात्वर्थान्वयी, तादृशस्यैव अधिकरणादेर्द्वितीयार्थस्य "अनुदण्डं जातिरित्यादौ जात्यन्वयात्। इदन्तात्पर्यं यल्लक्षणद्योत्यज्ञाप्यज्ञापकभावसम्बन्धस्य द्योतकोऽनुरि[2]त वर्तते। अतो ज्ञाप्यज्ञापकसम्बन्धद्योतकस्यानोः [2]कर्मप्रवचनीयसंज्ञायां तद्योगे द्वितीया[3]। अत्र निरुक्तद्वितीयार्थस्य धात्वर्थेतरस्मिन् जातिरूपनामार्थेऽन्वयाद् धात्वर्थेतरान्वयायोग्यत्वाभावात्" दण्डं दधातीत्यादौ कारकत्वानापत्तिः।

किञ्च धात्वर्थेतरान्वयायोग्यत्वस्य धात्वर्थेतरान्वययोग्यत्वज्ञानं विना वक्तुमशक्यत्वेन धात्वर्थेतरान्वययोग्यत्वस्य कारकान्यत्वस्वरूपतरकत्वेन स्वज्ञप्त्यधीनज्ञप्तिकत्वरूपान्योन्याश्रयदोषदुष्टतया लक्षणं युक्तियुक्ततान्नावहति। तादृशान्वयायोग्यत्वरूपकारकत्वज्ञानस्य तादृशान्वययोग्यत्वरूपकारकान्यत्वज्ञानस्य च परस्पराधीनत्वात्। अन्योन्याश्रयदोषदुष्टतयैव धात्वर्थान्वयायोग्यत्वं शेषत्वं, शेषभिन्नत्वं कारकत्वम् इत्यपि लक्षणन्न समीचीनम्। यतो ह्यभावबुद्धौ प्रतियोगिज्ञानं कारणमित्येष सिद्धान्तः। धात्वर्थान्वययोग्यत्वरूपकारकत्वज्ञानमन्तरा तद्योग्यत्वाभावरूपशेषत्वज्ञानमसंभवमतः शेषत्वलक्षणे कारकत्वप्रवेशः, शेषभिन्नत्वरूपकारकत्वलक्षणे निरुक्तदिशा शेषत्वप्रवेश इत्यन्योन्याश्रयत्वान्निरुक्तकारकत्वस्वरूपमप्यसमीचीनमेव।

किञ्च शेषत्वस्यापि स्वरूपमव्याप्तमेव। धात्वर्थान्वयायोग्यत्वरूपशेषत्वस्य "कान्तस्य त्रस्यति"इत्यादावभावाल्लक्ष्यैकदेशावृत्तितयाऽव्याप्तिः स्पष्टैव।

यदि तु धात्वर्थान्वितसुबर्थत्वं कारकत्वं विभक्त्यर्थस्य, विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वं विभक्तिप्रकृत्यर्थस्येति चेत् तदाऽपि कान्तस्य त्रस्यतीत्यत्र विभक्त्यर्थस्य प्रकृत्यर्थस्य च कारकत्वाद् दोषो दुर्वार एव।

---

१. आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥

वैयाकरणभूषणसारः का० सं० २४

इत्यनया कारिकया द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। यतो हि "कर्मणि द्वितीया" पा० सू० २।३।२ इति सूत्रं वर्तते, तच्च कर्तुरीप्सिततमम्, क्रियाजन्यफलाश्रय इत्यर्थः। तथा च क्रियायाः फलस्य च धातुनैव लाभादनन्यलभ्य आश्रयः अर्थादधिकरणमेव द्वितीयार्थ इति।

२. "अनुर्लक्षणे" पा० सू० १।४।८४ इत्यनेन कर्मप्रवचनीयसंज्ञायाम्।

३. "कर्मप्रवचनीययुक्ते द्वितीया" पा० सू० २।३।८ "इत्यनेन द्वितीया।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपादानाद्यन्यतमत्वं कारकत्वमित्यपि तत्स्वरूपं स्वीकर्तुन्न शक्यते। यतो हि 'ध्रुवत्वा-सोढत्वादिभेदेन तस्य बहुविधत्वान्निरुक्तान्यतमत्वस्य ज्ञानं सर्वथाऽसंभवमेव। ध्रुवत्वाद्यन्यतमत्वेन अपादानत्वस्य निरूपणं कृत्वा तावदन्यतमत्वेन कारकत्वस्य स्वरूपमङ्गीकृतं यदि स्यात्तदा कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहानापत्तिः। तथा ह्यन्यतमत्वस्य तद्भिन्नभिन्नत्वरूपतया प्रतियोगिज्ञानं विना अपादानादिभेदस्य ज्ञानमसंभवमिति कृत्वा तदन्यतमत्वस्य नितरां दुर्ग्रहत्वात्।

अथ गगनाभावस्य केवलान्वयितया[2] सर्वेष्वपि पदार्थेषु विद्यमानत्वेन नहि तद्भिन्नभिन्न-त्वरूपमन्यतमत्वमपि तु अपादानादिवृत्तिगगनाभावादिव्यक्तिरेवान्यतमत्वम्। तस्य यत्किञ्चिदपा-दाननिग्रहेऽपि ग्रहसंभवादिति चेदुच्यते गगनाभावादिव्यक्तेस्तावदपादानादिवृत्तित्ववैशिष्ट्योक्तौ बीजाभावाल्लक्षणमसमीचीनमेव। अपि च सर्वेषामेव कदाचित् क्वचित्कारकत्वेन तावद्वृत्ति-गगनाभावादेरव्यावर्तकत्वात्। यतो हि व्याघ्रस्य भयमित्यादौ षष्ठ्यर्थत्वात्।

अतः नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकधर्मवत्त्वे सति पदान्त-रासमभिव्याहृतसुबर्थत्वं कारकत्वमिति पर्यवसितलक्षणम्। अत्र धर्मे नामार्थान्वयप्रयोजकता-नवच्छेदकीभूतविशेषणदाने कान्तस्य त्रस्यतीत्यादौ शेषषष्ठ्याः न कारकत्वम्। यतो हि निरुक्तस्थलीयसंबन्धत्वस्य "कान्तस्य मुखमित्यादौ नामार्थान्वयप्रयोजकतावच्छेदकत्वेन अनवच्छेद-कत्वविरहेण क्रियान्वयितावच्छेदकधर्मवत्त्वेऽपि न कारकत्वम्। यद्यपि धर्मे नामार्थान्वयाप्रयोज-कत्वरूपविशेषणदानेनापि दोषनिराकरणं संभाव्यते, तथापि व्याघ्राद् बिभेतीत्यादौ हेतुतादेः कारकत्वस्याव्यापनाद्, व्याघ्रस्य भयमित्यादौ शेषषष्ठ्यां नामार्थान्वयित्वान्निरुक्तहेतुत्वरूपापा-दानकारकेऽव्याप्तिः स्पष्टैव। अनवच्छेदकत्वविवक्षणे तु हेतुत्वस्य सम्बन्धत्वेन रूपेण नामार्थान्व-

---

१. "ध्रुवमपायेऽपादानम्" पा० सू० १।४।२४।
"पराजेरसोढः" पा० सू० १।४।२६।

२. वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्, यथा—घटात्यन्ताभावो वृत्तिमान्, तत्प्रतियोगित्वं घटादौ, अप्रतियोगित्वं गगनाभावे। यद्यपि तदभावाभावत्वं प्रतियोगित्वमिति रीत्या गगनाभावस्य गगननिष्ठप्रतियोगित्वसिद्ध्ये गगनाभावाभावः स्वीकर्तव्यः, तथा च गगनाभावाभावस्य प्रतियोगितैव गगनाभावे, न त्वप्रतियोगित्वमिति न गगनाभावस्य केवलान्वयित्वमिति। तथापि गगनाभावा-भावस्य गगनस्वरूपतया तस्यावृत्तिपदार्थत्वेन वृत्तिमत्त्वविरहतया तादृशाभावस्य धर्तुमशक्यत्वेन घटाद्यत्यन्ताभावस्यैव धर्तुं शक्यत्वेन तत्प्रतियोगित्वं घटादेः, अप्रतियोगित्वं गगनाभावस्येति रीत्या तस्य केवलान्वयित्वम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यित्वेऽपि हेतुतात्वेन रूपेणानन्वयान्न दोषः । अतो हेतुतात्वस्य नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकत्वेन पदान्तरासमभिव्याहृतत्वेन च कारकत्वं संघटत एव ।

एतदभिलक्ष्यैव कर्तृत्वादिकारकस्य कृदन्तार्थे कर्तृत्वत्वादिनाऽन्वयार्थं [1]विशेषवचनं प्रतिपादितम् । अन्यथा शेषत्वेन कर्तृत्वादिकारकस्य कृदन्तार्थेऽन्वयसंभवे पृथक् सूत्रारम्भस्य वैयर्थ्यापत्तेः ।

कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय निरुक्तलक्षणे सुबर्थत्वमुक्तम् । एतल्लक्षणं प्राचां भट्टोजिदीक्षितप्रभृतिवैयाकरणानामिति सुधीभिराकलनीयम् ।

विभक्त्यर्थद्वारा क्रियान्वयि सत् क्रियानिमित्तं कारकमिति नैयायिकनये तत् स्वस्वरूपम्, राज्ञः पुरुषो गच्छतीत्यत्राज्ञाद्वारा गमनप्रयोजकस्य राज्ञो वारणाय क्रियान्वयीति । साक्षात्क्रियान्वयित्वं न ग्रामादेस्तदन्वितान्वयित्वं राज्ञोऽपीति, अतो विभक्त्यर्थद्वारेत्युक्तम् । संबन्धस्य तु न क्रियायामन्वयः, संबन्धप्रकारकबोधे नामजन्योपस्थितेर्हेतुत्वात् । अत एव सम्बन्धिनो न कारकत्वम् । यदि त्वपादाने संप्रदाने चाव्याप्तिस्तयोः क्रियानिमित्तत्वाभावात्, तदा परस्वत्वफलकत्यागविशेषो हि दानम् । तत्र विशेषणपरस्वत्वांशहेतुतया संप्रदानस्य कारकत्वम्, इति स्वीकारस्य स्वत्वहेतुत्वात् । विभागफलकत्वे सति अधःसंयोगफलिका क्रिया पतनम् । तत्र विभागांशहेतुतया अपादानस्य कारकत्वम् । यथोत्तरसंयोगनिमित्ततया संयोगफलकक्रियात्मकगमननिमित्तत्वं ग्रामस्येत्याहुः ।

नागेशमते तु करोति कर्तृकर्मव्यपदेशानिति व्युत्पत्त्या कारकशब्दः क्रियापरः, तदुक्तं भाष्ये[2] "यावद् ब्रूयात् क्रियायामिति तावत् कारके" इति । तथा च क्रियाविषयः कर्मादिसंज्ञको भवति । विषयत्वञ्च जनकत्वेनेति बोध्यम् । तत्र क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकांक्षोदयेन क्रियाया जनकाकांक्षया च तत्रैवान्वयस्यौचित्यात् । जनकत्वञ्च—तत्क्रियोपयोगिक्रियाश्रयत्वेन । यद्यपि कारकशब्दे कर्तरि ण्वुल्विधानात् कर्तृत्वपर्यायपरं कारकत्वम्, एवञ्च कर्मत्वादिविवक्षायां कर्तृत्वाभावात् कर्मकारकमिति व्यवहारो न समीचीनतां भजते, तथापि तत्तत्संज्ञाविधानसामर्थ्यात् कारकपदस्य स्वातन्त्र्यमात्रबोधकत्वम् । "स्वतन्त्रः कर्ता" पा० सू० १।४।५४ इत्यत्र कारकत्वादेव, स्वातन्त्र्ये लब्धे पुनस्तदुक्तिस्तत्कालिकीप्रधानीभूतधात्वर्थनिरूपितस्वातन्त्र्येण यस्य

---

१. "कर्तृकर्मणोः कृति" पा० सू० २।३।६५ ।

२. १।४।२३ । पा० सू० इत्यत्रत्यं भाष्यम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विवक्षा तद्ग्रहणार्था । कारकत्वं यदा कदाचिद् विद्यमानस्वनिष्ठतत्क्रियोपयोगक्रियानिरूपित-स्वातन्त्र्यमादायैव । अन्वर्थसंज्ञाविज्ञानाच्च क्रियाया अजनकस्य कारकत्वव्यपदेशाभावः ।

वस्तुतः सर्वतः पर्यालोचनया युक्तायुक्तत्वविचारे तु मन्मते क्रियान्वयित्वं कारकत्वमित्येव तत्स्वरूपस्यौचित्यं दृष्टिपथमवतरति । यतो हि जनकत्वस्य कारकत्वापरपर्यायतया कारणत्वज्ञानम् । तज्ज्ञानेऽन्यथासिद्धिशून्यत्वज्ञानम्, अन्यथासिद्धिशून्यत्वज्ञानेऽभावबुद्धौ प्रतियोगिज्ञानस्य कारणत्वेन प्रतियोगिनामन्यथासिद्धिशून्यानां ज्ञानमपेक्ष्यत इति महद्गौरवम्, निरुक्तस्वरूपाङ्गीकारे समायाता ये दोषाः सन्ति तेषां निराकरणं पूर्वमेव सञ्जातम् । शक्तिकारकं शक्तिमच्च कारकमिति तत्स्वरूपं विस्तरभिया नात्र विचार्यते । एतदनन्तरम् अग्रिमेऽङ्के तद्विचारः करिष्यत इति क्षन्तव्योऽयं जनः सुधीभिः ।

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# कर्मठः

## इतिहासात्मिका तुलनात्मिका गुणदोषनिरूपणात्मिका च समीक्षा

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
अनुसन्धानसंस्थानसदस्यो वाराणसेयसंस्कृतविश्वविद्यालये।

'सप्तम्यन्तात् कर्मशब्दाद् घट इत्यर्थे अठच् स्यादित्यर्थः' इति बालमनोरमाकारः। तत्त्वबोधिनीकारस्तु—सप्तम्यन्तात् कर्मन्-शब्दाद् 'घटते' इत्यर्थेऽठच् स्यादिति। समर्थानां प्रथमाद् वा (४-१-८२) इति नियमेन सूत्रे प्रथमोपस्थितत्वात् कर्मशब्दाद् अठच् प्रत्ययः 'कर्मणि घटः' इत्यर्थे। घटत इति घटः—पचाद्यच्। 'इत्यर्थे' इत्यस्य सर्वत्र योजना कर्तव्या यत्र प्रथमान्तता[1]। सप्तम्यन्ततायां तु सुस्पष्टतैवेति तत्र योजनाऽनपेक्षिता। यत्र तिङन्तता तत्रापि 'इत्यर्थे' इत्यस्य योजना कार्या[2]। अर्थप्रकाशकपदेषु सर्वत्र प्रथमान्ततैव नास्तीति[3] सूत्रकारस्य सूत्रनिर्माणपद्धतिर्न समाननियमानुसारिणी। सारस्वतव्याकरणे तु 'इत्यर्थे' इत्यस्योल्लेखः[4]।

जैनेन्द्रशाकटायनेतिव्याकरणद्वयमतिरिच्य सर्वत्र व्याकरणेषु 'घटते' इत्यस्य प्रयोगः[5]। शाकटायनव्याकरणे तु व्याख्यायामपि 'घटते' इति परित्यक्तः[6]।

---

१. ४, १, ९२; ४, २, ७; १०; १६; ६८; ६९; ७०; ४, ३, २५; ३८; ३९; ५२; ५३; ७४; ८९; ९०; १०१; ११२; १२०; १३४; ४, ४, २; ३; ४७; ५०; ५१; ५५; ५७; ६१; ६५; ६६; ८४; ८६; ८७; ८८; ९५; ९८; १०७; ११९; १२१; १२३; १३४; ५. १. ५; ३७; ४२; ४३; ४५; ५६; ५७; ७३; ७७; ७९; ८०; ९३; १०४; १०९; ११५; ११७; ११९; ५, २. ५; ११; १५; १९; २२; ३५; ३६; ४५; ६३; ६८; ६९; ७८; ८५; ९०; ९२।

२. ४, २, ५९; ४, ३. ५१; ८३; ८५; ८६; ४, ४, २; ५; ८; २७; २८; २९; ३०; ३२; ३३; ३४; ३५; ३६; ३७; ३९; ४०; ४१; ४२; ४३; ४६; ६०; ६६; ७२; ७६; ८३; १३७; ५, १, १६; ५२; ६३; ७२; ७४; ९६।

३. ४. ३, ८५; ११५; ११६; ४, ४, २२; २६; ९०; ९२; ९३; ९६; ११०; १२२; १३५; १४०; १४३; १४४; ५, १, ६०; ९९; ५, २, १; ९; ३; ४७; ४८; ६५; ६६; ६७; ७०; ७२; ७९; ८१; ८२; ८९; ९०; १२५।

४. कर्मणष्ठो घटते इत्यर्थे ७१०—सिद्धान्तचन्द्रिका।

५. कर्मणि घटतेऽठच्—चान्द्रव्याकरणम् ४, २, ३६। तत्र घटते कर्मणोऽठच्—सरस्वतीकण्ठा० ५, २, ५२। तत्र घटते कर्मणष्ठः—सिद्धहेमशब्दानु० ७, १, १३७। ५४ ठः कर्मणस्तत्र घटते (तद्धितपरिशिष्टम्)—संक्षिप्तसारव्याकरणम्।

६. कर्मणो घटः—३, ३, १०१—कर्मणि घटः, घटिता, घटमानः कर्मठः पुरुषः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अठच्-प्रत्ययेऽकारोच्चारणं ठस्येकादेशनिवृत्त्यर्थम् इति काशिका[1]। चकारोच्चारणं चित्स्वरार्थमिति केनापि नोक्तम्, राजतरङ्गिणी-भट्टिकाव्यातिरिक्तानुपलब्धेः! सूत्रमिदं पश्चान्निवेशितमष्टाध्याय्यामित्यपि नास्ति मनोरमम्, महाभाष्ये[2] कर्मठशब्दोपलब्धेः। महाभाष्यकारात् पूर्वं कात्यायनाच्च परं निवेशनाभावे नास्ति प्रबलं प्रमाणम्।

अत्र तावत् 'कर्मणि घटः' इत्यर्थ उपन्यस्यते। कर्मणि चेष्टमानः प्रयतमान[3] इत्यर्थे प्रावीण्यार्थः शूरतार्थो वा न घटते। अमरसिंहेन तु कर्मठशब्दस्यार्थः—'कर्मशूरः[4]' इति कृतः, भानुजिदीक्षितेन च "प्रयत्नेन प्रारब्धकर्मपरिसमापकः" इति। बालमनोरमायां तु "घटते = व्याप्रियत इत्यर्थः" इति कर्मव्यापृतः, कर्मव्याप्रियमाणो वा कर्मठ इति तदैदम्पर्यम्। नैतेनापि प्रारब्धपरिसमापकत्वस्य गतार्थता। प्रारब्धपरिसमापकत्वे 'कर्मान्तिक'[5] इति शब्दो वाल्मीकीयरामायणे (१, १३, ७; ३२) नूनं प्रयुक्तः किन्तु नेहार्थस्तेन कोऽपि। भट्टिकाव्यस्य टीकायां जयमङ्गलेन 'यागक्रियानिष्पादकः' इत्यर्थो व्यधायि कर्मठशब्दस्य[6]। अयं तु यागक्रियानिष्पादकरूपोऽर्थो नास्ति तदीयः, क्रतुशब्दसंनिधानेन तद्भावार्थत्वात्। राजतरङ्गिण्यामपि धर्मकर्मनिपुणोऽर्थो नास्ति कर्मठशब्दस्य, तत्रापि सुकृतशब्दस्य संनिधानात्[7]।

कस्तावत् पुनः पाणिन्यभिप्रेतः 'कर्मणि घटः' इत्यर्थे विहितस्य ठस्याभिप्राय इति चिन्तायां पाश्चात्त्या भाषाशास्त्रविदो विभिन्नान् दृष्टिकोणानुपस्थापयन्ति। थियोदोर-बेनफाइ-महाशयः कर्मठ-शब्दः 'कर्मस्थ' इत्यस्य विकृतं रूपमुपभाषागतं भवेदिति प्रतिपादयति[8]। ठ-प्रत्ययः 'स्थ'-इत्यस्य प्राकृतभाषात्मकं रूपमिति तदभिप्रायः। वाकर्नागलमहोदयस्तु दार्ढ्येन

---

१. अठचि 'नस्तद्धिते' इति टिलोपः। अठचि ठस्य अङ्गात् परत्वाभावादिकादेशाभाव इति भावः—बालमनोरमा।

२. एवमपि कर्मठ इत्यत्र प्राप्नोति—ठस्येकः ७, ३, ५०।

३. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (२, ३, १२) इति चेष्टा मानस्येव न भवति।

४. नामलिङ्गानुशासनम्—३, १, १८। वैजयन्ती—२०७, १४३। अभिधानचिन्ता० ३५४।

५. कर्मान्तिकान् = आसमाप्तिकर्मनिर्वाहकान् (भृत्यान्)—तिलकटीका।

६. ऐहिष्ट तं कारयितुं कृतात्मा क्रतुं नृपः पुत्रफलं मुनीन्द्रम्।

७. संपूर्णपुण्यमहिमा मर्त्यमाहात्म्यमन्दिरम्। पञ्चहस्तप्रदश्चक्रे मठं सुकृतकर्मठः॥ राजत० ५, २४।

८. कर्मठः (base कर्मन्, probably a dialect form of कर्मस्थ)
—Sanskrit English Dictionary.



CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्पक्षपोषकः[1]। स त्वेतादृशप्रयोगान् 'स्थ'-विशिष्टानप्युद्धरति महाभारत-मनुस्मृति-गतान्[2] विकर्मस्थ-पाप-कर्म-स्थ-स्व-कर्म-स्थ, इत्यादीन्। तदीयेयं प्रवृत्तिः प्राकृतभाषागतं 'कम्मट्ठाण'[3] (< कर्म-स्थान–) इति शब्दं दृष्ट्वा जाता भवेत् किन्तु प्राकृतभाषायां कर्मठ इत्यर्थेऽन्यार्थे वा कम्मट्ठादयः शब्दा नोपलभ्यन्ते। देशीनाममालायां दधिकलशी-पिठर-हलधर-मुख-वाचकः कमढशब्दोऽवश्यं लभ्यते[4]। वाकर्नागलमहाशयः "नर्मठ"—शब्दमप्युपस्थापयति। नर्म–ठ इत्यत्रापि कर्म-ठ'—इतिवट्ठकारः किन्तु नैतस्य क्वापि साहित्ये प्रयोगः। शमथ-शरठादिशब्देषु 'अथ—' 'अठ—' इति प्रत्ययौ किन्तु तौ धातुभ्यो जायेते। केषाञ्चन मतेन 'षष्ठ-कतिथ-चतुर्थ—' इत्यादिषु थकारो मूर्द्धन्यतां प्राप्तः ठकारत्वेन विपरिणतः 'कर्मठ' इत्यत्र दृश्यते, तन्न समीचीनम्, तस्य पूरणप्रत्ययत्वात्।

आर्० एल्० टर्नर-महोदयस्तु 'इष्ठ—' ( इष्ठन् )—प्रत्ययगतठकारं 'कर्मठ'—शब्दस्य ठकारे पश्यतीति तन्मतेन कर्मिष्ठशब्द एव कर्मठतां प्रपेद इति। टर्नरमहोदयस्येदं मतं कल्पनामेवावलम्बते, धर्मिष्ठशब्दस्य प्राकृतभाषायां धम्मिट्ठ[5]—, सिंहलीभाषायां दामिटु, दमिटु[6] इत्यादीनां विकाराणामुपलभ्यमानत्वात्, धम्मट्ठ, दामट, इत्यादीनामदर्शनात्।

केचित् 'कर्मनिष्ठ–'[7] शब्दस्य रूपान्तरं 'कर्मठ' इति वदन्ति। इदमपि 'कर्मस्थ'-वत् तर्काधारकमुपस्थापनम्। तत्र प्राकृतभाषाप्रभावेण 'स्थ' इति ठकारत्वेन विपरिणमते। अत्र तु प्राकृतभाषाप्रभावो न भवति, ठकारस्य 'निष्ठ' इति शब्दान्तर्गत्वात्। नैतदपि हृदयावर्जकम्, 'कर्मनिष्ठेऽठच्' 'कर्मस्थेऽठच्' इति वा सूत्रणे लाघवादपि न तथा सूत्रितं भगवता पाणिनिना।

---

१. द्र. Altindische Grammatik, § 413, pages 549.

२. सर्वे चापि विकर्मस्था भागं नार्हन्ति सोदराः—मभार० १३, १०५, १० ।
पापण्डिनो विकर्मस्थान् बैडालव्रतिकाञ्छठान्—मनु० ४, ३० ।
सर्वं एव विकर्मस्था नार्हन्ति भ्रातरो धनम्—मनु० ९, २१४ ।

३. आचारांगसूत्र ( द्र० पाइअसद्दमहण्णवो ) ।

४. कमढो मंथणिपिढरहलधरमुहेसु—देशीनाममाला २, ५५ ।

५. औपपातिकसूत्र, सुपासनाहचरिअ १४० ( द्र० पाइअसद्दमहण्णवो ) ।

६. R. L. Turner : A Comparative Dictionary of Indo-Aryan Languages.

७. अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम्—ऋ. १०, ८०, १ ।
कर्मनिष्ठाः—मनु० ३, १३४ ।
धनुर्वेदे च निष्ठिताः—वा० रा० १, १८, ३७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

टी० बरो-महाशयस्य पन्थाः सर्वतो भिन्नः। स 'कृ-धातोर्मर्-प्रातिपदिकाधारेण निर्मितस्य *कर्मृथ—[ कर्मृत् ( ह् ) ]—शब्दस्य विकसितं रूपं कर्मठ इति प्रतिपादयति'[1]। तदपि न रुचिरम्, मर्-प्रातिपदिकस्य कर्मठशब्दे नैरर्थक्यात्, मूर्द्धन्यरेफादिसान्निध्याभावेऽप्यनेकेषां धातूनां ठकारान्तत्वाच्च[2]।

अस्य दुर्घटत्वं पर्यालोच्य यद्यपि जैनेन्द्रव्याकरणे[3] निपातनावलम्बनं कृतम्, तथापि तत्रापि वृत्तावर्थः पाणिनिप्रतिपादित एव। एवं तावद् घट इत्यत्र विद्यते किमपि रहस्यम्। महाभारते √घट्-धातोरर्थः करणं व्यापृतिर्वा। द्रौपदी सत्यभामां वदति स्वव्यापृतिकथाम्[4]। अत्र

---

१. It was observed in dealing with the simple र् neuters that they might either appear with गुण ( ऊधर् ) or by the weak forms of the latter type can be deduced from certain derivatives of मर्–stems : कर्मठ—'workman' from * कर्मृथ [ * कर्मृत ( ह् )—'work'+a; aspiration as in कपृथ्—] likewise नर्मठ 'jester' and हर्मुट 'tortoise [ * harmṛt—a—'an animal possessing a हर्मृत, i, e, 'roof or shell' cf. हर्म्य 'roof' ].

—Sanskrit Language, pages 148–149.

२. √शठ्; √कठ्; √मठ्; √पठ्; √उठ्; √रुठ्; √हेठ्; √वठ्; √लुठ्; √हठ्; √श्वठ्; √श्वण्ठ्; √शुठ्; √शुण्ठ्; √शठ्; √वण्ठ्; √लुठ्; √लुण्ठ्; √रुठ्; √रुण्ठ्; √मुण्ठ्; √गुण्ठ्; √कुण्ठ्; √अण्ठ्; √कण्ठ्-प्रभृतयः। द्र० पाणिनीयधातुपाठसमीक्षा।

३. कर्मठः ३, ४, १५६—कर्मठ इति निपात्यते। कर्मशब्दादीप्समर्थेद् घटते इत्यस्मिन्नर्थेऽठो निपात्यते। कर्मणि घटते कर्मठः—जैनेन्द्रव्याकरणम्।

४. शतं दासीसहस्राणि कौन्तेयस्य महात्मनः।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलंकृताः॥ ३, २३३, ४६।
महार्हमाल्याभरणाः सुवर्णाश्चन्दनोक्षिताः।
मणीन् हेम च बिभ्रत्यो नृत्यगीतविशारदाः॥ ३, २३३, ४७।
तासां नाम च रूपं च भोजनाच्छादनानि च।
सर्वासामेव वेदाहं कर्म चैव कृताकृतम्॥ ३, २३३, ४८।
एतदासीत् तदा राज्ञो यन्महीं पर्यपालयत्।
येषां संख्याविधिं चैव प्रदिशामि शृणोमि च॥ ३, २३३, ५१।
अन्तःपुराणां सर्वेषां भृत्यानां चैव सर्वशः।
आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम्॥ ३, २३३, ५२।
सर्वं राज्ञः समुदयमायं च व्ययमेव च।
एकाहं वेद्मि कल्याणि पाण्डवानां यशस्विनि॥ ३, २३३, ५३।
मयि सर्वं समासज्य कुटुम्बं भरतर्षभ।
उपासनरताः सर्वे घटयन्ति वरानने॥ ३, २३३, ५४।
तमहं भारमासक्तमनाधृष्यं दुरात्मभिः।
सर्वं सुखं परित्यज्य रात्र्यहानि घटामि वै॥ मभार० ३, २३३, ५५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कर्मठतायाः स्वरूपं तच्चित्रं च दर्शनीयम्। बुन्देलखण्डीयभाषायां स्थैर्यपूर्वकं धैर्यपूर्वकं वा कर्मनिरतौ 'खटबौ' इति धातुः। अयं धातुः संस्कृतभाषागत- √घट्-धातुजन्यः। 'तुम इतै नैं खटैहौ' = 'त्वमिह स्थैर्यपूर्वकं कर्मनिरतो न भविष्यसि'। हिन्दीशब्दसागरे नास्त्येष 'खटना' इति धातुः। महाभारते √घट् धातुः सज्जा[1]-संसक्त्याद्यर्थकोऽपि।

भारोपीयधातुर्वर्तते * गेर्–, भारो० * ग्र्–ऐत (ह्) इति। √घट् धातुर्वै √ग्रथ् (√ग्रन्थ्)—धातो रूपान्तरम्[2]। डेविड्स्-स्टीड-महाशयौ पालिभाषाया घटिकाशब्दस्य मूलार्थः—'ग्रन्थि' इति वदतः (द्र० पी० टी० एस्० पालि-इँग्लिश् डिक्शनरी)। तौ तुलनार्थं गन्थ, गण्ठि, गण्ठ इति शब्दान् उपस्थापितवन्तौ। 'घटति' इत्यत्रापि √ग्रन्थ् धातुमुपस्थापयतः। ग्रथितः = रचितः, आबद्धो वेति घटः। प्राकृतभाषायां √घट् इत्यस्य √ग्रथ् इत्यस्य चैकं रूपं 'गढ' इति [(गढिअ (<ग्रथित, घटित)] गढ (<√घट्) गढइ—(हे० ४, ११२)। ग्रथ् (ग्रन्थ्) √इत्यस्य गंठ, 'ग्रन्थिका' इत्यस्य च गढिया (अंबगढिया निचू० १५) इति भवति। हिन्दीभाषायामपि 'गठयाना' इत्यत्र ग्रन्थार्थे, 'गठन' इत्यत्र च √घट्-रूपान्तरे 'गठ' इत्यनेन रूपेण समाना ध्वनयः। यथा ग्रन्थ् इत्यस्यार्थो रचनादिकं भवति, तथा संस्कृतभाषातः (√ग्रथ् > √गठ् > √घट् > घड्) पुनः प्राकृतीकृतस्य √घड (सक०) इत्यस्याप्यर्था भवन्ति—चेष्टायाम्, निर्माणे, परिश्रमे। प्रकृतभाषायां √घड सकर्मकोऽकर्मकश्च। संस्कृतधातुपाठे पुनरकर्मक एव।

---

१. अथापि घटतेऽस्माकमर्थे वानरपुङ्गवः—मभार० ३, २८१, ११ = सज्जते, चेष्टते (वागीशः)। घटस्व परया शक्त्या मुञ्च त्वमपि सायकान्—मभार० ३, ३९, ३१ = युक्तो भव (वागीशः)। स भीतस्तत्र तक्षाणं घटमानं शचीपतिः—मभार० ५,८, ३० = कार्यं कुर्वन्तम् (वागीशः)।

२. Ger—" drehen, winden "Dentalweiterungen : idg. * gr-et (h)—nasaliert * grenth : ags. (एँग्लो-सैक्सन्) Cradol, m." wiege "( *Kradula—" geflochtenes " ), ahd. (पु० उ० ज०) Kratto" Korb "( * Kraddan— ), Krezzo, mhd. (म० उ० ज०) Kratze, nhd, (न० उ० ज०) Kratze" Korb "( * Krattian ,-tt aus—tn-, oder zur Wzf. mit idg d ? ); सं० ग्रन्थ्—, ग्रथ्नामि,, winden, knupfen, einen knoten bindon " , ग्रन्थ; ,,knoten " , mit mind. Lautentw. घटते ,, sich verbinden, vereinigen mit, eifrig beschaftigt sein "Kaus." zusammenfugen, zustande bringen "

—Alois Walde : Vergleichendes Worterbuch der Indogermanischen Sprachen, I Band, pages 593–595.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं खलु √ग्रथ्-धातोस्थकारः √घट् ( हि० गठ् ) धातोष्ठकारो वा 'कर्मठः' इत्यत्र प्रत्ययत्वेन स्थितः । कर्मठः—कर्मणि ग्रथितो बद्धो व्यापृतो वा । वर्णद्वये शब्दे आदावन्ते चोभयत्र महाप्राणता न तिष्ठतीति ग्रथ् इत्यस्य प्राकृते गढ इति जातम्, पुनश्च √गढ, गड्ढ इत्यस्य √ग्रथ् इत्यस्य वा संस्कृतभाषायां √घट् इति जातम्, पुनः प्राकृत-भाषायां तस्य घड इति जातम् । हिन्दीभाषायाः प्रकृत्यनुसारेण त्वाद्यमहाप्राणताऽन्ते निपतितेति √गठ इति जातम् । तत्र गठ इति रूपान्तरं साक्षात् संस्कृतभाषात एव न तु प्राकृतभाषातः । प्राकृतभाषातस्तु सति रूपान्तरे 'गढ़ना, घड़ना' इति वा जायते । प्राकृतभाषारूपान्तरेऽप्यन्यतर आद्यमहाप्राणतां परिजहाति ।

'कर्मणि घटः' इतिवत् कर्मसु निबद्धम्[1], कर्मणि निबद्धाः[2], धर्मशास्त्रेषु निबद्धाः[3], वाचि बद्धाः[4] इत्यादयो लभ्यन्ते पदसंदोहाः । ऋग्वेदेऽपि 'ग्रीवायां बद्धः,[5] इति प्रयोगः । फलतः कर्मठशब्दः कर्मव्यापृत्यर्थकः । तुलसिदासेन[6] कर्मठशब्दस्यार्थः कर्मकाण्डीति कृतः, स नूनं भट्टिकाव्यगृहीतः, अन्यथा राजतरङ्गिण्यां 'सुकृतकर्मठः' इत्यत्र सुकृतविशेषणं निरर्थकम्, कर्मठ इत्येनेनैव तस्य चारितार्थ्यात् ।

√ग्रथ् इत्यस्य थकारष्टकारतां ठकारतां च प्राप्तः । टकारस्य ठकारतां गच्छतः संबन्धे निरुक्तकारस्य शिरिम्बिठशब्दनिरुक्तिनिर्दर्शनम् । 'शिरिम्बिठो मेघः । शीर्यते बिठे । बिठम् = अन्तरिक्षम् । बिठं बीरिटेन[7] व्याख्यातम् ( निरु० ६, ३० ) । 'कटम्भरा > कठम्भरा' 'कटिल्लकः > कठिल्लकः' इति शब्दद्वयमपि तुलनीयम् । काश्मीरी भाषा—छिठ् ( < चित्रम् )—द्र० कश्मीरीयभाषाकोशे १६६ पृ० ।

---

१. निबद्धं स्वेषु कर्मसु—मनु० ४, १५५ ।

२. आबद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ मभार० १०, २, २ ।

३. अथ गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥ मभार० ५३, ४५, १७ ।

४. दासाः स्म सर्वे तव वाचि बद्धाः—मभार० ३, ११३, १३ ।

५. ग्रीवायां बद्धो अपि कक्ष आसनि—ऋ० ४, ४०, ४ ।

६. करमठ कठमलिया कहै ज्ञानी ज्ञान विहीन ।
तुलसी त्रिपथ बिहाइगो रामदुआरे दीन ॥

७. बीरिटम् = अन्तरिक्षम्—भियो वा भासो वा ततिः—निरु० ५, २७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्रविडभाषाया घटवाचकः कुटम् इति कोड इति वा संस्कृतभाषायाः कुटम् इत्यस्य मूले विद्यते। घटशब्दमूले च कोड इति गुडक इति वेति मतं विचारणीयम्[1]। नौवाचकस्य कट्चु (कटत्ति) इति शब्दस्य घटरूपेण विपरिणतावपि न किमपि दृढं प्रमाणम्[2]।

—:o:—

---

१. १३७६ तमिळ—कुटम् waterpot, hub of a wheel. मलया. कुटम्—waterpot, कोताभाषायाम्—कोडम् waterpot with small mouth. तोदभाषायाम्—कुड् की कन्नड्—कोड earthen pitcher or pot; कुडिके small earthen, metal or wooden vessel; गुडुवन, गुडाण large water vessel used also for storing grain; earthen pot used for churning. कोडगुभाषायाम्—कुडिके pot in which food ( esp. rice ) is cooked. तुलुभाषायाम्—कुड्कि, कुड्के, गुड्के small earthen vessel. तेलगु—कुडक, कुडुक cup, bowl, scoop, any cup-like thing; गुडक, कुडक shell of a fruit prepared to serve as a snuff-box etc., small metal box.

—A Dravidian Etymological Dictionary.

२. ( तमिल् ) कट—go, proceed, pass ( as time, water, clouds etc. ), कट्चु ( कटत्ति )—boat. ( तमिल् ; मलया ) कटल—sea.—तदेव पुस्तकम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# सम्पादकीयम्

श्रीबदरीनाथशुक्लस्य

'सारस्वती सुषमा' नाम विश्वविद्यालयस्यास्य त्रैमासिकी गवेषणापत्रिका। अस्यां विभिन्नेषु विषयेषु विशिष्टानामधिकारिविदुषामनुसन्धानपूर्णा लेखाः प्रकाशन्ते। सुदुर्लभा हस्तलिखितग्रन्था अपि यथाकालं क्रमशोऽस्याः कलेवरं प्रसाधयन्ति। अत्र प्रकाशितानां लेखानां विपश्चिद्भिः प्रस्तूयमानालोचनस्याप्यनुसन्धानरसिकस्याध्येतृवर्गस्य पुरस्तादुपन्यासोऽस्या लक्ष्यम्।

पत्रिकाणां गणनीयेषु गुणेषु समयेन प्रकाशनं नामैको विशिष्टो गुणः। पत्रिकेयं कतिपयकारणेभ्य एतद्गुणधारणे मन्थरतया महामान्यैः पण्डितैर्विशिष्टकोटिकैर्विद्यारसिकैश्च किञ्चिद्विरक्तिस्पृशा दृशा दृश्यमानतया किमप्यनुशोचनीयतां भजते। इयमनुशोचनीयताऽस्यास्त्वरितं यथा निवर्तेत यथा चेयं यथाकालं ग्राहकाणां करगोचरं गता तेषामन्तःकरणप्रीणने प्रावीण्यं लभतां तथा नूतनतयैतत्प्रकाशनभारं दधानेन मया सावधानं प्रयतिष्यते।

पत्रिकायाः प्रस्तुतेऽङ्के ये लेखाः प्रकाशितास्ते सुयोग्यैर्विद्वद्भिर्लिखिततया मनीषिजनैर्मननीया आलोचनीयाश्चेति सप्रश्रयमभ्यर्थना।

## लेखानां संक्षिप्तः परिचयस्तावदित्थम्

### प्रथमो लेखः—

अयं लेखो वाराणसेयसंस्कृतविश्वविद्यालये प्राचीनव्याकरणदर्शनागमविभागाध्यक्षेण श्रीरामप्रसादत्रिपाठिमहोदयेन 'प्रतिभा वाक्यार्थः' इति शीर्षकमाश्रित्य लिखितः। लेखस्य घटकीभूता विषया लेखकेन प्रारम्भ एव संगृह्य सूचिताः। लेखे नानास्थलतः प्रतिभाया निर्वचनान्युद्धृत्य तस्यास्त्रीणि रूपाणि वर्णितानि। तथा हि प्रतिभा नाम बुद्धिविशेषः, तज्जन्यसंस्कारविशेषस्तज्जन्यव्यापारविशेषो वा। वाक्यार्थः' इत्यत्रार्थशब्दस्यार्थत्रयम्-धनम्, प्रयोजनम्, अभिधेयं चेति प्रतिपादितम्। तत्र प्रतिभाया बुद्धिविशेषात्मकतापक्षमर्थशब्दस्य च प्रयोजनार्थकतापक्षमादाय बुद्धिविशेषस्य वाक्यार्थत्वप्रतिपादने लेखकस्य मुख्यः संरम्भो भासते। अयमर्थः प्रसक्तानुप्रसक्तविषयत्यागेनापरैरपि विपश्चिद्भिर्विशदीक्रियेत चेत्समीचीनं स्यात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

## द्वितीयो लेखः—

अयं लेखो नागपुरविश्वविद्यालयस्य डा० प्रो० सुब्रह्मण्यशास्त्रिणा 'सत्तात्रैविध्यम्' इति शीर्षकेण लिखितः। अत्र लेखे पारमार्थिक-व्यावहारिकभेदेन सत्ताद्वयमाचार्यमते; पारमार्थिक-व्यावहारिक-प्रातिभासिकभेदेन सत्तात्रयमर्वाचीनाद्वैतिप्रभृतिमते; परिनिष्पन्न-परतन्त्र-परिकल्पितनामभिः सत्तात्रयं विज्ञानवादिबौद्धनये; संवृति-परमार्थभेदेन सत्ताद्वयं माध्यमिकमत इति प्रतिपाद्य प्रातिभासिक-व्यावहारिकसतोः सदसद्विलक्षणत्वं सोपपत्त्यावेदितम्। अन्ते 'सर्वेऽपि विषयाः सत्तासंवलिताः, तेषां च सत्ता विशेषणीभूतत्वात् तत्कारणं निर्विशिष्टं चिदेव भवितुमर्हति, इत्यादि ब्रुवाणो लेखकः सत्ताया एकविधत्व एवात्मनोऽभिमतिं प्रकटयन् प्रतीयते।

## तृतीयो लेखः—

अयं लेखो जयपुरस्थराजस्थानविश्वविद्यालयस्य डा० रामशङ्करजैतलीमहोदयेन 'रसानाथर्वणादपि' इति शीर्षकेण लिखितः। अत्र लेखे "काम एव सर्वजनस्पृहणीयं सर्वतो बलवत् प्रथमोत्पन्नं तत्त्वम्। तत एव सर्वेषां भावानां समुद्भवः। भावा एव रसस्य प्रतिष्ठाभूमिः। भावाश्चाथर्ववेदे बहुत्र चारुतरं चित्रिताः। भावकारणभूतौ रागद्वेषावेव पूज्यतुल्यहीनाश्रयेण समुद्भवन्तौ क्रमेण श्रद्धासम्मानादीन्, प्रणयसख्यादीन्, वात्सल्यदयादीन्, दैन्यशोकादीन्, क्रोधोग्रतादीन्, अपमानमोहादींश्च भावानुद्भाव्य तान् समुचितानां विभावादीनां सहकारेण रसात्मना परिणमयत" इत्यादिकं विविधोद्धरणैर्विज्ञाप्य 'रसानाथर्वणादपि' इति ब्रुवतो भरतमुनेः 'रसस्य मूलस्थानमथर्ववेद' इत्यभिप्रायोऽभिव्यक्तिं नीतः,। लेखस्य भाषा, शैली, विषयोपन्यासश्च सामीचीन्यमञ्चन्ति।

## चतुर्थो लेखः—

अयं लेखो वाराणसेयसंस्कृतविश्वविद्यालयस्य पुराणेतिहासविभागव्याख्यातृपदं प्रसाधयता श्रीश्रीकृष्णमणित्रिपाठिना 'पुराणलक्षणसमीक्षा' इति शीर्षकेण लिखितः। अत्र लेखे तत्तत्पुराणेषु प्राप्यमाणानि लक्षणान्युपन्यस्य तेषां समीक्षा, एकेनान्यस्य गतार्थत्वसम्भावना, पुराणेष्वंशतः साकल्येन वा तत्समन्वयप्रकारः, महापुराणोपपुराणात्मकलक्ष्यभेदेन लक्षणभेदव्यवस्था, पुराणस्य दशलक्षणानां भागवतानुसारेण व्याख्या, धर्मस्य पुराणप्रतिपाद्यत्वेऽपि पुराणलक्षणे 'जयमङ्गला' कारोक्तस्य तत्प्रवेशस्यालोचना चेत्यादयो विषया विस्पष्टं प्रतिपादिताः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्चमो लेखः—

अय लेखो बस्तीनगरस्थादर्शसंस्कृतमहाविद्यालयप्रधानाचार्येण श्रीवंशीधरत्रिपाठिना 'विपन्नाशोपयोगि बौद्धदर्शनम्' इति शीर्षकेण लिखितः। लेखे बौद्धधर्मस्य युगानुरूपोऽभ्युदयः, वैदिकधर्मेण तस्य बहुत्र सामञ्जस्यम्, यागापेक्षया कामत्यागस्य श्रेष्ठता, आलस्यस्याकर्मण्यतायाश्च विपन्मूलत्वम्, बौद्धधर्मस्य सामाजिकता, हीनयानमहायानयोश्चारुतरं संक्षिप्तं चित्रणम्, महायानस्य सर्वस्वभूताया महाकरुणाया महत्त्वम्, वर्तमाने विषमे समये बौद्धधर्मस्यैव धर्मान्तरापेक्षया लोकस्योपादेयत्वं विपन्नाशकत्वं चेति विषयाः सम्यक् प्रतिपादिताः।

षष्ठो लेखः—

अयं लेखः काशीहिन्दूविश्वविद्यालयस्यानुसन्धात्रा श्रीसुदर्शनमिश्रेण 'आचार्यमम्मटकृतकाव्यलक्षणवैशिष्ट्यम्' इति शीर्षकेण लिखितः। अस्मिन् लेखे प्रायः समेषामालङ्कारिकाणां काव्यलक्षणान्युद्धृत्य समालोच्य च मम्मटकृतस्य "तददोषौ शब्दार्थौ सगुणावलङ्कृती पुनः क्वापि" इत्येतत्काव्यलक्षणस्य लक्षणान्तरापेक्षया वैशिष्ट्यं पण्डितराजजगन्नाथकृततत्खण्डनप्रकारस्य नागेशभट्टभणित्याश्रयेण प्रतिक्षेपणम्, मधुमक्षिकाभिः क्रियमाणस्य मधुसञ्चयस्य मधुच्छत्रनिर्माणस्य चोदाहरणेन तल्लक्षणस्य श्रमकलापक्षयोरानुगुण्यं चेत्यादिविषयजातं सम्यग् विवेचितमस्ति।

सप्तमो लेखः—

अयं लेखः लङ्काया विद्यालङ्कारविश्वविद्यालये संस्कृतविभागाध्यक्षेण डा० शान्तिभिक्षुशास्त्रिणा 'ललितविस्तरस्य पाठसमीक्षणापेक्षा' इति शीर्षकेण लिखितः। अस्मिन् लेखे 'ललितविस्तरस्य' उपलभ्यमानपाठानां समीक्षणस्यापेक्षणीयता बहूनामुद्धरणानामुपन्यासेन वर्णिता। वस्तुतस्तदीयं तथाविधं नूतनं संस्करणं प्रकाशनार्हं यथोपलभ्यमानपाठानां ग्रहणस्य मूलं निर्दिश्य तदालोचनेन सह भोटभाषाया नियमानुसारेणावश्यकं संशोधनं कृतं स्यात्। ग्रन्थोऽयं बौद्धसम्प्रदायस्य ग्रन्थरत्नेष्वन्यतमः। अतोऽस्य विशुद्धतरसंस्करणप्रकाशनस्यानिवार्यं महत्त्वम्। लेखकस्य प्रकृतान्युद्बोधनानि नूनमवधेयानि प्रशस्यानि च।

अष्टमो लेखः—

अयं लेखः सागरस्थश्रीगणेशदिगम्बरजैनसंस्कृतमहाविद्यालयस्य श्रीदयाचन्द्रमहोदयेन "विश्वतत्त्वप्रकाशकः स्याद्वादः" इति शीर्षकेण लिखितः। अस्मिन् लेखे वस्तुनोऽनेकान्तात्मकताया विश्वतत्त्वात्मना प्रतिपादनम्, बहूनां प्रामाणिकजैनग्रन्थानां सम्बद्धांशोद्धरणेन स्याद्वादस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निरूपणम्, स्याद्वादस्य भङ्गानां सप्रयोजनमर्थवर्णनम्, एकान्तवादस्य दूषणजातम्, जैनदर्शनस्य दार्शनिकसिद्धान्तानां मिथः समन्वयनैपुण्यम् प्रमाणनययोः प्रवृत्तिक्षेत्रम्, वर्तमाने विषमे वैज्ञानिके राजनीतिके च युगे संकटग्रस्ताया मानवतायास्त्राणे जैनदर्शनदृष्टेः सामर्थ्यमेवमादयो विषयाः प्रावीण्येन प्रतिपादिताः सन्ति ।

## नवमो लेखः—

अय लेखो वाराणसेयसंस्कृतविश्वविद्यालयस्यानुसन्धात्रा श्रीश्रीकान्तपाण्डेयेन 'कारकस्वरूपम्' इति शीर्षकेण लिखितः । अस्मिन् लेखे कारकस्य लक्षणम्, कारकस्य भेदाः, तेषां लक्षणानि, वाक्यरचनायां कारकस्योपयोगः, कारकविभक्तीनां निष्पत्तयः, वाक्यार्थबोधे तदर्थभानौपयिकः प्रकार एवमादयो विषया अपेक्षितोद्धरणैरावश्यकैः प्रमाणैश्च सहोपन्यस्य पाटवेन प्रतिपादनकर्मतां गमिताः । परिष्कारस्य नवीनाया भाषायाः प्रयोग आवश्यकावधानवैकल्यमपि प्रतिभावद्भिः पाठकैः शक्यसंवेदनतया नारुन्तुदम् ।

## दशमो लेखः—

अयं लेखो वाराणसेयसंस्कृतविश्वविद्यालयेऽनुसन्धानसंस्थानसदस्येन वागीशापरनाम्ना डा० श्रीभागीरथप्रसादत्रिपाठिना 'कर्मठः' इति शीर्षकेण लिखितः । अस्मिन् लेखे 'कर्मठ' शब्दस्य साधुताया बोद्धव्यार्थस्य च विषये प्राचीनानां भारतीयविदुषां पाश्चात्यानां भाषाशास्त्रविदुषां च विभिन्नानि मतानि सप्रमाणमुपन्यस्य तेषां युक्तायुक्तत्वे च समीक्ष्य स्वकीयो विचार उपनिबद्धो विद्यते । इत्थमयं लेखः 'कर्मठ' शब्दस्य विषये व्यापकं विचारक्रममुपस्थाप्य तत्पदपृष्ठलग्नं पर्याप्तमैतिहासिकं तथ्यं प्रकाशयन्नेतादृशानामनेकशब्दानां विषये ईदृग्विचारप्रवर्तनाय विद्वज्जनानां प्रेरणाप्रद उत्साहवर्धकश्चेति निर्विवादम् ।

इत्थं प्रस्तुतेऽङ्के प्रकाशितलेखानामत्यन्तं संक्षिप्त एव परिचयः प्रकाशनेऽपरस्यापि विलम्बस्य परिजिहीर्षयोपन्यस्तः किन्त्वग्रिमाङ्कतो लेखानां परिचयं तथोपन्यसितुं प्रयतिष्यते यथा तेषां पूर्णः सारः संक्षेपेण विदितः सन् तेषु पाठकानामभिरुचिं प्रवृत्तिं च जनयितुं प्रभवेत् ।

पत्रिकायाः स्वरूपस्य विषये काचनेदृशी नवीना नीतिरप्यवलम्बनीयतयाऽनुचिन्त्यमाना विद्यते यस्या आश्रयेण तस्या अर्वाचीनपद्धतेरध्येतृवर्गेऽपि प्रसारो लेखकेषु लेखानां मौलिकतासम्पादने प्रवृत्तिश्च जायेतेति कृतमिदानीं वक्तव्यविस्तरेण ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रजिस्टर्ड न्यूजपेपर्स एक्ट के नियम के अन्तर्गत

## विज्ञप्ति

| | |
|---|---|
| १. प्रकाशन का नाम | सारस्वती सुषमा |
| २. प्रकाशन की तिथि | त्रैमासिकी |
| ३. मुद्रक का नाम | श्री घनश्याम उपाध्याय |
| राष्ट्रियता | भारतीय |
| पता | वाराणसेय संस्कृत विश्वविद्यालय-मुद्रणालय, वाराणसी। |
| ४. प्रकाशक का नाम | श्री बदरीनाथ शुक्ल |
| राष्ट्रियता | भारतीय |
| पता | वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी |
| ५. सम्पादक का नाम | श्री बदरीनाथ शुक्ल |
| राष्ट्रियता | भारतीय |
| पता | वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी। |
| ६. स्वामित्व | वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी। |

मैं बदरीनाथ शुक्ल घोषित करता हूँ कि उपरिलिखित विज्ञप्ति मेरी जानकारी के अनुसार पूर्णतया सत्य है।

बदरीनाथ शुक्ल

हस्ताक्षर

CC-0. Sampurnanand University Collection. Digitized by eGangotri

# सारस्वती सुषमा

## वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां वाराणसेयसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां मौलिकविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. लेखकेन प्रकाशितस्य निबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्लग्रन्थानां समालोचनाः प्रकाश्यन्ते ।

७. अस्या वार्षिकं मूल्यं सप्त रूप्यकाणि, प्रत्यङ्कं च रूप्यकद्वयं वर्तते ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, वाराणसेय-संस्कृत विश्वविद्यालय, वाराणसी–२" इति सङ्केतेन विधेयः ।

---

प्रकाशक—सञ्चालक, अनुसन्धान संस्थान, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी ।
मुद्रक—श्री घनश्याम उपाध्याय, वाराणसेय संस्कृत विश्वविद्यालय मुद्रणालय, वाराणसी
मु० सं०–६५।६६

CC-0. Sampurnanand University Collection. Digitized by eGangotri